बृहद्

पूजा-पद्धतिः

(बृहद् कर्मकाण्ड-पद्धतिः पूर्वार्द्धः)

जिसमें
समस्त देवताओं की वेद मंत्रों से पूजा विधि एवं
अनेकों दुर्लभ यंत्र आदि दिए गये हैं।

सम्पादक—

स्व० पं० गोपालदत्त शास्त्री

प्रकाशक—

उदित प्रकाशन

मथुरा (उ० प्र०)

द्वितीय संस्करण
सन् १९९६

मुद्रकः— गोवर्द्धन प्रेस काजी पाड़ा मथुरा

मूल्य
५०)

बृहद्

पूजा-पद्धतिः

(बृहद् कर्मकाण्ड-पद्धतिः पूर्वार्द्धः)

जिसमें

समस्त देवताओं की वेद मंत्रों से पूजा विधि एवं अनेकों दुर्लभ यंत्र आदि दिए गये हैं।

❖

सम्पादक—

स्व० पं० गोपालदत्त शास्त्री

प्रकाशक—

उदित प्रकाशन

मथुरा (उ०प्र०)

द्वितीय संस्करण सन् १६६६

मुद्रकः— गोवर्द्धन प्रेस काजी पाड़ा मथुरा

मूल्य ५०)

हमारे यहाँ की कुछ विख्यात पुस्तकें

पुस्तक	मूल्य	पुस्तक	मूल्य
बृहद् भक्तमाल नाभाजी	१४५)	उड्डीश तन्त्र	१५)
शालहोत्र भाषा टीका	४५)	अकबर बीरबल बड़ा जिल्द	१६)
शीघ्र बोध भाषा टीका	१६)	योगवाशिष्ठ भाषा दोनों प्रकरण	२५०)
मीराबाई के गीत	३)	शिव पार्वती विवाह	५)
तुलसी दोहाबली भा० टी०	५)	कौतुकरत्न भाण्डागार	१७)
लघुपाराशरी	२५)	श्री वाल्मीक रामायण भाषा	१५०)
शकुन मार्तण्ड भा० टी०	१५)	रामायण ध्वनि राधेश्याम	४८)
माधव निदान भा० टी०	६०)	तुलसीकृत रामायण गु० बड़ा	७५)
विवाह पद्धति भा० टी०	१५)	साबरितन्त्र सेवड़े का जादू	२०)
पूरनमल बालकराम	६०)	पत्नी पथ प्रदर्शक	२५)
जातकालंकार	२०)	सचित्र करामात	१७)
दुर्गासप्तशती भा० टी० बड़ी	२५)	पाक विज्ञान बड़ा	२०)
कबीर बीजक मूल	१५)	रमल नवरत्न	३८)
विचार चन्द्रोदय गुटका	४०)	रैदास रामायण	३०)
तत्व बोध भा० टी०	१५)	बृहद् सामुदिक शास्त्र	५५)
आत्मबोध भा० टी०	१६)	असली आल्हखण्ड बड़ा	८०)
श्रीमद् भगवद् गीता भा० ग्लेज	१८)	नया फिल्म सँगीत बहार	१८)
हारमोनियम तवला वाँसुरी	१५)	रसराज सुन्दर भा० टी०	१३०)
बृहद् पशुचिकित्सा बड़ी	५२)	दुर्गा सहस्त्रनाम भा० टी०	१५)
आसाम बंगाल का जादू	१७)	शिव सहस्त्रनाम भा० टी०	१५)
स्त्री सुबोधिनी	५५)	सोलह सोमवार कथा	३)
विवाहित आनन्द	३०)	संतान सप्तमी कथा	३)
सिलाई कटाई शिक्षा	१७)	हलषष्ठी कथा	३)
लाठी शिक्षा	१४)	बृहस्पतिवार कथा बड़ी	४)
वाशिष्ठी हबन पद्धति	१५)	शुक्रवार व्रत कथा	४)
अर्क प्रकाश	२५)	दत्तात्रेय तन्त्र	१५)
तुलसीकृत रामायण कलाँ	४००)	प्रेमसागर बड़ा	४८)
अष्टाँगहृदय अर्थातवाग्भट	२६०)	माघ माहात्म्य भा० टी०	३५)

विषय-सूची

• गणेश यन्त्रम् •

अथ श्रीगणेश ध्यानम्ः—उच्चैर्ब्रह्माण्डखण्डद्वितयसहचरं कुम्भ-युग्मं दधानं, प्रेंखं नागारिपक्षप्रतिभटविकटश्रोततालाऽभिरामम्। देवं शम्भो-रपत्यं भुजगपतितनुस्पर्धिवर्धिष्णुहस्तं, ध्याये पूजार्थमीशं गणपतिममलं धीश्वरं कुञ्जरास्यम्।।१।

अथ यन्त्रोद्धारः

षटकोणञ्च त्रिकोणञ्च, तद्बहिः अन्यत्सर्वं मातृकायन्त्रवत्।

अथ मन्त्रोद्धारः—श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत्। ङेऽन्तं गणपतिं पश्चाद्वरान्ते वरदं परम्।। उक्त्वा सर्वजनं मेऽन्ते वशमानय ठः द्वयम्। अष्टाविंशत्यक्षरोऽयन्ताराद्योमनुरीरितः।।

अथ मन्त्रः— ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय ठः ठः।। (शाक्त प्रमोदे)

• विष्णु यन्त्रम् •

अथ श्री विष्णु ध्यानम्—शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्, विश्वाधारं गगन सदृशं मेघवर्णं शुभांगम्।। लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्, वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।

अथ यन्त्रोद्धारः—अनुक्तकल्पे यन्त्रन्तु, लिखेत्पद्मदलाष्टकम्। षटकोणकर्णिकन्तत्र, वेदद्वारोपशोभितम्।।१।।

अथ मन्त्रोद्धारः—सचतुर्थी नमोऽन्तैश्च, नामभिर्विन्यसैत्सुधीः। तारन्नमः पदं ब्रूयात्ततो दीर्घसमन्वितौ। पवनोणाय मन्त्रोऽयं प्रोक्तो वस्वक्षरः परः।।

अथ मन्त्रः—ॐ नमो नारायणाय।

शिव यन्त्रम्

अथ शिव–ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभञ्चारु चन्द्रावतन्सं, रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम्।। पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं, विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्र त्रिनेत्रम।।१।। (शाक्त प्रमोदे)

अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु, लिखेत्पद्मदलाऽष्टकम्।। षटकोणकर्णिकन्तत्र, वेदद्वारोपशोभितम्।।१।।

अथ मन्त्रोद्धारः

नमस्कारं समुद्धृत्य, वाऽन्तं नेत्रसमन्वितम्।। वारुणं मुखवृत्तञ्च वायुं ललाटसंयुतम्।। अमुम्पञ्चाक्षरम्मन्त्रं, पञ्चकामफलप्रदम्।। प्रणवादिर्य्यदा देवि ! तदा मन्त्रः षडक्षरः।। इति।।

अथ मन्त्रः

ओन्नमश्शिवाय।। (शाक्त प्रमोदे)

सप्तशतिपूजन- यंत्रम्

प्रणवं सर्वत्रादौ पठेत्।

नोट—वाम भाग में 'ॐ मं महिषाय नमः' बनाना और दक्ष—भाग में 'ॐ सिं सिंहाय नमः' बनाना।

मन्त्रमहोदधिः १८ तरंगे, श्लोक—
१४८ तः १५७ पर्यन्तम्।

• कालीयन्त्रम् •

अथ श्री काली ध्यानम्।। शवारूढ़ां महाभीमां, घोरदंष्ट्रां हसन्मुखीम्।। चतुर्भुजां खंगमुण्डवराभयकरां शिवाम्।।१।। मुण्डमाला धरां देवीं ललजिह्वां दिगम्बराम्।। एवं सञ्चिन्तयेत्कालीं श्मशानालयवासिनीम्।।२।। (शाक्त प्रमोदे)

अथ यन्त्रोद्धारः :—आदौ त्रिकोणमालिख्य त्रिकोणं तद्बहिर्ल्लिखेत।। ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम्।।१।। ततस्त्रिकोणमालिख्य लिखेदष्टदलं ततः।। वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम्।।२।।

अथ मन्त्रोद्धारः —कालीबीजत्रयं प्रोक्त्वा, लज्जाबीजद्वयं ततः।। हूँकारौ द्वौ ततः पश्चाद् दक्षिणे कालिके ततः।।१।। कालीबीजत्रयं तस्मात्, लज्जाबीजद्वयम्पठेत्।। द्वौ च स्वाहान्त—हूङ्कारौ कालीमन्त्र-उदाहृतः।।२।।

अथ मन्त्रः

क्रीं क्रीं क्रीं ह्रीं ह्रीं हूँ हूँ दक्षिणे कालिके क्रीं ३ ह्रीं २ हूँ २ स्वाहा।।

• षोडशी यन्त्रम् •

अथ षोडशी ध्यानम् :—ॐ बालार्क्कमण्डलाभासां, चतुर्ब्बाहान्त्रिलोचनाम् ।। पाशांकुशशराँश्चापन्धारयन्तीं शिवाम्भजे ।।१।।

अथ यन्त्रोद्धारः—बिन्दुत्रिकोण वसु कोणदशार युग्मम्वस्वरत्रनागदलसंगतषोडशारम् ।। वृत्तत्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रराजमुदितम्परदेवतायाः (शाक्त प्रमोदे)

अथ मन्त्रोद्धारः—आदौ लज्जां समुच्चार्य्य, क ए ई ल ततः परम् ।। पुनश्च लज्जामुच्चार्य, ह स क हल् तु तत्परम् ।।१।। ततो लज्जाम्पुनः प्रोच्य, लज्जान्तं सकलन्ततः ।। षोडशाक्षरमन्त्रोऽयं, षोडश्यास्समुदाहृतः ।।२।। इयन्तु सुन्दरी–विद्या देवानामपि दुर्ल्लभा । गोपनीया प्रयत्नेन, सर्व्वसम्पत्करी मता ।।३।।

अथ मन्त्रः— ह्रीं क ए ल ह्रीं –ह स क ल ह्रीं –स क ल ह्रीम् ।। इति ।।

घटार्गल-यंत्रम्

'अग्निकोणे नमः'

इस यंत्र के ऊपर कलश तथा दीपक-स्थापन करना चाहिए।

शारदायां नवमपटले-

श्लोक ६५ तः, १०० पर्यन्तम्।

सर्वतोभद्रचक्रम्

(१९ रेखात्मकम्)

वर्ण धान्य

श्वेत - चावल

हरित - मूंग

कृष्ण - उर्द

पीत - चना

रक्त - मसूर

शिवार्चने चतुर्लिङ्गतोभद्रचक्रम्

गृहवास्तुचक्रम्

(८१ कोष्ठक)

	श्वेत
	पीत
	रक्त
	धूम्र
	कृष्णा

मङ्गल (भौम) पूजनयन्त्रम्

नवग्रह-मण्डल चक्रम्

स्कन्दपुराणे—शुक्रार्को प्राङ्मुखो ज्ञेयो, गुरुसौम्याबुदङ्मुखौ। प्रत्यङ्मुखः शनिः सोमः, शेषाःदक्षिणतोमुखाः।।१।।
आदित्याऽभिमुखाः सर्वे, साधिप्रत्यधिदेवताः। स्थापनीया मुनिश्रेष्ठाःनान्तरेण पराङ्मुखाः।।२।।

चक्रव्यूह

प्रवेशद्वारः

१५ यन्त्रम्-

६	१	८
७	५	३
२	९	४

स्वास्तिक-

अथ षोडश मातृका आसनम्

आमनः कुल देवता १६	लोक मातरः १२	देव-सेन ८	मेधा ४
तुष्टिः १५	मातरः ११	जया ७	शची ३
पुष्टि १४	स्वाहा १०	विजया ६	पद्मा २
धृतिः १३	स्वधा ९	सावित्री ५	गौरी + गणेश १

लक्ष्मी ३४ यन्त्रम्

७	१२	१	१४
२	१३	८	११
१६	३	१०	५
९	६	१५	४

हनुमत-यंत्रम्

इस यंत्र को अष्टगंध से ग्रहण में भोजपत्र पर लिखकर ग्रीवा या दक्षिण भुजा में धारण करने से समस्त कार्यों की सिद्धि होती है और मनुष्य सर्व–व्याधियों से तथा शत्रु–भय से दूर होता है।

अथ पंचोंकार पूजनम्

	पूर्व	
	ब्रह्मा १	
उत्तर — पृथ्वी ४	यज्ञ पुरुष ५	गायत्री २ — दक्षिण
	गोवर्द्धन ३	
	पश्चिम	

॥ श्रीगणेशाय नमः ॥

पूजापद्धतिः

ॐ ॐ ॐकाररूपं त्र्यहमिति च परं यत्स्वरूपं तुरीयं
त्रैगुण्यतीत नीलं कलयति मनसस्तेजसिन्दूरमूर्तिम् ।
योगीन्द्रैर्ब्रह्मरन्ध्रैः सकलगुणमयं श्रीहरेन्द्रेण सङ्गं,
गं गं गं गंगणेशं गजमुखमभितो व्यापकं चिन्तयन्ति ॥

अथ स्वस्तिवाचनम्

ॐस्वस्ति नऽइन्द्रोव्वृद्धश्रवाःस्वस्ति नः पूषा व्विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१॥ ॐपयः पृथिव्व्यां पयऽओषधीषु पयो दिव्व्यन्तरिक्षे पयोधाः। पयस्वतीः प्प्रदिशः सन्तु मह्यम् ॥२॥ ॐव्विष्णो रराटमसि व्विष्णोः श्नप्त्रेस्त्थो व्विष्णोःस्यूरसि विष्णोर्द्ध्रुवोसि। व्वैष्णवमसि व्विष्णवे त्त्वा ॥३॥ ॐअग्निर्देवताव्वातो देवता सूर्यो देवता चन्द्रमा देवता

"सदोपवीतिना भाव्यं, सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च, यत्करोति न तत्कृतम् ॥"

व्वसवो देवतारुद्रादेवता ऽऽदित्या देवता मरुतो देवता । व्विश्वेदेवादेवता बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता ॥४॥ ॐद्यौः शान्ति-रन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयःशान्ति र्व्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥५॥ॐव्विश्वानि देव सवितर्दुरितानि परा-सुव । यद्भद्रं तन्नऽआसुव।६।सुशान्तिर्भवतु॥

॥ अथ रक्षाविधानम् ॥

यवान्कुशाँस्तथा दूर्वां, सर्षपान्गन्धमक्ष-तान् । गोमयं दधिसंयुक्तं, कारयेत्ताम्रभाजने। ॐगणाधिपं नमस्कृत्य, नमस्कृत्य पितामहम्। विष्णुं रुद्रं श्रियं देवीं, वन्दे भक्त्या सरस्व-तीम् ॥ स्थानं क्षेत्रं नमस्कृत्य, दिननाथं निशा-करम् । धरणीगर्भसम्भूतं, शशिपुत्रं बृहस्प-तिम् । दैत्याचार्य्यं नमस्कृत्य, सूर्यपुत्रं महा-ग्रहम् ॥ राहुं केतुं नमस्कृत्य, यज्ञारम्भे विशे-

षतः । शक्राद्या देवताः सर्व्वान्नमस्कृत्य मुनीं-स्तथा ।। गर्गं मुनिं नमस्कृत्य, नारदं मुनिसत्तमम् ।। वशिष्ठं मुनिशार्दूलं, विश्वामित्रं महामुनिम् । व्यासंकविं नमस्कृत्य, सर्वशास्त्रविशारदम् ।। विद्याधिका ये मुनय, आचार्य्याश्च तपोधनाः । सर्वे ते मम यज्ञस्य, रक्षां कुर्वन्तु विघ्नतः ।।

प्राचीं रक्षतु गोविन्द, आग्नेयीं गरुडध्वजः । याम्यां रक्षतु वाराहो, नरसिंहस्तु नैर्ॠतीम् । केशवो वारुणीं रक्षेद्वायवीं मधुसूदनः । उदीचीं श्रीधरो रक्षेदीशानीन्तु गदाधरः ।। ऊर्ध्वं गोवर्द्धनधरो, ह्यधस्ताद्धरणीधरः । एवं दशदिशो रक्षेद्, वासुदेवो जनार्दनः ।। यज्ञाग्रे रक्षताच्छङ्खः, पृष्ठे पद्मं तथोत्तमम् । वामपार्श्वे गदारक्षेद्दक्षिणे च सुदर्शनः ।। उपेन्द्रः पातु ब्राह्मणं, आचार्य्यं पातु वामनः । अच्युतः पातु ॠग्वेदं, यजुर्वेदमधोक्षजः ।। कृष्णो रक्षतु सामानि, ह्यथर्वं

माधवस्तथा । उपविष्टाश्च ये विप्रास्तेऽनि-रुद्धेन रक्षिताः ।। यजमानं सपत्नीकं, पुण्ड-रीकविलोचनः । रक्षाहीनं तु यत्स्थानं, तत्सर्वं रक्षताद्धरिः ।। वेदमन्त्रैश्च कर्त्तव्या, रक्षा शुभ्रैश्च सर्षपैः। कृत्वा पोट-लिकां पूर्वं, बध्नीयाद् दक्षिणेकरे ।। अथ वेद मन्त्राश्च ।। तत्रादौ-गायत्री मन्त्रः ।।१।।ॐ गणनान्त्वा० ।।२।। ॐजातवेदसे सुनवाम सोममरातीयतो निजदहाति वेदः । स नः पर्षदति दुर्ग्गाणि विश्वानावेवसिन्धुं दुरिता-त्यग्निः।।३।।ॐरक्षोहणं व्वलगहनं व्वैष्णण-वीमिदमहन्तं व्वलगमुत्किरामियम्मे निष्टचो यममात्यो निचखानेदमहन्तं व्वलगमुत्कि-रामि यम्मे समानो यमसमानो निचखानेद-महन्तं व्वलगमुत्किरामि यम्मे सबन्धुर्य्यम सबन्धुर्निचखानेदमहन्तं व्वलगमुत्किरामि

सत्यं शौचं जपो होमस्तीर्थं देवस्य पूजनम् ।
तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्डं न धारयेत् ।।

यस्मे सजातो यमसजातो निचखानोत्कृत्या-
ङ्किरामि ॥४॥

इत्यादिमन्त्रैः पोटलिकामभिमंत्र्य दक्षिणकरेवध्नीयात् ।

रक्षाबन्धनमन्त्रः

ॐ येन बद्धो बली राजा, दानवेन्द्रो महाबलः ।
तेन त्वामभिबध्नामि, रक्षे माचल माचल ॥

❀ अथ पञ्चगव्यकरणम् ❀

अतः परं प्रवक्ष्यामि पञ्चगव्यमनुत्तमम् ।
पावनार्थं द्विजातीनामिहलोके परत्र च ॥१॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
निर्दिष्टं पञ्चगव्यं तु, पवित्रंमुनिपुङ्गवैः ॥२॥
गोमूत्रे वरुणो देवो, हव्यवाहस्तु गोमये ।
क्षीरे शशधरो देवो, वायुर्दध्नि समाश्रितः ।३।
भानुःसर्पिषि संदिष्टो, कुशे ब्रह्मादिदेवताः ।
जलेसाक्षाद्धरिःसंस्थः, पवित्रं तेन नित्यशः ।४।
मूत्रंतु नीलवर्णायाः, कृष्णायाःगोमयं स्मृतम् ।
क्षीरं तु ताम्रवर्णायाः, श्वेताया उच्यते दधि ।
सर्पिस्तु कपिलाया वै, ग्राह्यं पातकनाशनम् ।

अलभ्ये सर्ववर्णानां,कपिलायाःहिगृह्यते।।६।।
पलमात्रन्तु गोमूत्रमङ्गुष्ठार्धं तु गोमयम् ।
क्षीरं सप्तपलं ग्राह्यं,दधि त्रिपलमीरितम्।७।
सर्प्पिस्त्वेकपलं देयमुदकं पलमात्रकम् ।
सर्वमेतत्स्वर्णपात्रे,स्थापयेच्च यथाविधिः।८।
गायत्र्या ग्राह्यंगोमूत्रं,गन्धद्वारेतिगोमयम् ।
आप्यायस्वेति वैक्षीरं,दधिक्राब्णेति वै दधि।।
तेजोऽसि शुक्रमित्याज्यं,देवस्य त्वा कुशोदकं।
मंत्रयित्वा गृहेक्षेप्यमापोहिष्ठेतिमन्त्रतः१०।
यत्त्वगस्थिगतं पापं, देहे तिष्ठति देहिनाम् ।
ब्रह्मकूर्च्चो दहेत्सर्वं, दीप्ताग्निरिव काष्ठकम्
पञ्चगव्यं पिबेद्विप्रो, बिभृयाच्छिरसा नृपः ।
वैश्यस्याभ्युक्षणंप्रोक्तं,शूद्रस्य तु निरीक्षणम्
आलोडनं प्रमथनं, प्रणवेनैव कारयेत् । दूर्वा-
भिःस्वर्णपात्रेण, ब्रह्मपर्णेन वा पिबेत्।।१३।।
*ॐगायत्री त्रिष्टुब्जगत्यनुष्टुप्पंक्त्या
सह।बृहत्युष्णिहा ककुप्सूचीभिःशम्यंतुत्त्वा ।

*अत्र गायत्रीमंत्रः "ॐभूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्ॐ ।।"

इति गोमूत्रम् ॥१॥ ॐगन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरी सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इतिगोमयम्॥२॥ ॐआप्यायस्व स मे तु ते विश्वतःसोम वृष्ण्यम् । भवाव्वाजस्य सङ्गथे॥इतिक्षीरम्॥ दधिक्राब्णोऽअकारिषं जिष्णोरश्वस्य व्वाजिनः । सुरभि नो मुखा करत्प्रणऽआयूंषि तारिषत् ॥इतिदधि॥४॥ ॐतेजोऽसि शुक्रमस्यमृतमसि धामनामासि । प्रियं देवानामनाधृष्टं देवयजनमसि ॥इत्याज्यम् ॥५॥ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुब्भ्यां पूष्णो हस्ताब्भ्याम् । सरस्वत्यै व्वाचो यन्तुयन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्ज्येनाभिषिञ्चाम्यसौ ॥ इति कुशोदकम् ॥६॥

प्रणवेन हस्तेनालोड्य, प्रणवेनैवा यज्ञियकाष्ठेन वा निर्मथ्य, प्रणवेनैवाभिमन्त्रयेत् । एवं सिद्धेन पञ्चगव्येन--

"ॐ आपो हिष्ठा मयो०"

इति ऋचेन भूमिमभ्युक्षेत् पिबेच्च ॥ इतिपञ्चगव्यम् ॥

❀ अथ गणेशादिपञ्चांगदेवतापूजनम् ❀

पूर्वं तु पूजा-सामग्रीं सम्पाद्य, स्नात्वा, शुद्धवस्त्रे च परिधाय, स्वासने चोपविश्य-

ॐविष्णुर्विष्णुर्हरिर्हरिरिति त्रिराचम्य सिद्धं, ॐअपवित्रःपवित्र-इत्यस्य वामदेव ऋषिर्विष्णुर्देवता,अनुष्टुप्छन्दः शरीरपवित्रकरणार्थे विनियोगः ॥ ॐअपवित्रः पवित्रो वा,सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं, स बाह्याभ्यन्तरः शुचिः ॥

इत्यनेन वामहस्तस्थं जलमभिमंत्र्य शिरसि क्षिपेत्। पुनर्हस्ते गौरसर्षपानादाय-

ॐअपसर्पन्तु ते भूता,ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥

इति भूतशुद्धिं संविधाय-

ॐअस्य श्रीआसनमन्त्रस्य मेरुपृष्ठ ऋषिः,सुतलंछंदः,कूर्मोदेवता,आसनोपवेशनेविनियोगः।

ततः भूमौ--

ॐ महो द्यौः पृथिवी च न ऽ इमँ यज्ञम्मिमिक्षताम्। पिपृतान्नो भरीमभिः ॥

इत्यक्षतान् क्षिप्त्वा-

ॐभूर्भुवः स्वः, पृथ्वि ! इहागच्छेह तिष्ठ। पाद्यादीनि समर्प्पयामि ।ॐपृथिव्यै नमः- इति भूमिं सम्पूज्य-ॐपृथ्वित्वया धृतालोका, देवि त्वं विष्णुना धृता। त्वञ्चधारय मांभद्रे, पवित्रं कुरुचासनम् ॥इति संप्राथ्यं-

ततो भूमौ गन्धेन त्रिकोणषट्कोणमण्डलं विधाय, तदुपरि त्रिपादिकां, तदुपरि ताम्रमयार्घपात्रं निधाय, तत्र जलंदद्यात्-

ॐगंगे च यमुने चैव, गोदावरि सरस्वति । नर्मदे सिन्धु कावेरि, जलेऽस्मिन् सन्निधिं कुरु। पुष्कराद्यानि तीर्थानि, गंगाद्याः सरितस्तथा आयान्तु मम रक्षार्थं, दुरितक्षत् कारकाः ।

इत्यावाह्य अक्षतान् क्षिपेत्-

ॐदशकलात्मने धर्म्मप्रदवह्निमण्डलाय नमः। ॐद्वादशकलात्मने-अर्थप्रदाय सूर्यमण्डलाय नमः । ॐषोडशकलात्मने कामप्रदाय चन्द्र-मण्डलाय नमः। ॐसं सत्त्वाय नमः ॐ रं रजसे नमः । ॐतं तमसे नमः ।

इति धेनुमुद्रयामृतीकृत्य मत्स्यमुद्रयाच्छाद्य योनिमुद्रां प्रदर्श्य--

---

आदित्यं गणनाथं च देवीं रुद्रं च केशवम् ।
पंचदैवतमित्युक्तं, सर्वकर्मसु पूजयेत् ॥

ॐभूर्भुवः स्वः गङ्गादिसप्तसरित इहागच्छत सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि। पाद्यादीनि समर्पयामि ।श्रीगङ्गादिसरिद्भ्यो नमः। श्रीप्रयागादितीर्थेभ्यो नमः। ॐसर्ववा-द्यमयीघण्टायै नमः।ॐगन्धर्वदेवाय धूपपात्राय नमः। ॐवह्निदैवत्याय दीपपात्राय नमः ॥

गन्धाक्षतपुष्पैः सम्पूज्य, कुशेषु वामतो घण्टां स्थापयेत्--

ॐआगमार्थञ्च देवानां,निर्गमार्थञ्च रक्षसाम्। सर्वभूतहितार्थाय घण्टानादं करोम्यहम् ॥

इतिघण्टां वादयित्वा वामपार्श्वे स्थापयेत्--

पाद्यादीनि समर्प्पयामि ।

दक्षिणपार्श्वे गन्धाक्षतपुष्पैः पूजयित्वा जलेनापूर्य-

ॐपाञ्चजन्याय विद्महे, पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयात् ।

इतिमन्त्र पठित्वा तत्र स्थापयेत् । ततः-

ॐ दीपनाथभैरवाय नमः (सम्पूज्य) ॐ करकलितकपालः कुण्डलीदण्डपाणिस्तरुण-तिमिरनीलव्यालयज्ञोपवीती । क्रतुसमयस-

---

भोजनं हवनं दानमुपहारः प्रतिग्रहः ।
बहिर्जानोर्न कार्याणि, तद्वदाचमनं विदुः ॥

पय्या विघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदःसाधकानाम् ॥पुनः दीप सम्प्रार्थ्य, गंधाक्षतपुष्पाणि समर्पयामि।ॐदिवाकरायनमः,
इति सम्पूज्य ताम्रपात्रे सूर्यं चन्दनादिना लिखित्वा सपुष्पहस्तः ध्यायेत्-"अथध्यानम्" ध्येयः सदा सवितृमण्डलमध्यवर्ती, नारायणः सरसिजासनसन्निविष्टः । केयूरवान्मकरकुण्डलवान्किरीटी, हारी हिरण्मयवपुर्धृत शंखचक्रः। इति ध्यात्वा सूर्यमावाहयेत्-आवाहयेत्तं द्विभुजं दिनेशं, सप्ताश्ववाहं द्युमणिं ग्रहेशम् । सिन्दूरवर्णप्रतिमावभासं, भजामि सूर्यं कुलवृद्धिहेतोः॥ ॐभूर्भुवः स्वः। भो सूर्यदेव ! इहागच्छ,स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्यामि, तावत्त्वं सन्निधो भव ॥इति॥

मस्तके तिलकं विधाय सन्ध्योपासनञ्च कुर्यात् । तत्रादौ-

ॐअद्येत्यादि-देशकालौ संकीर्त्य,अमुकगोत्रोत्पन्नोऽमुक शर्माहं मम मनोवाक्कायकृतसकलपापक्षयार्थं ब्रह्मत्वसिद्धये धर्मार्थकाम-

हेतवे प्रातः सन्ध्योपासनं करिष्ये ।

इतिसंकल्प्य, प्रातः पूर्वस्यां दिशि मुखमुपढौक्य-

ॐकेशवाय नमः स्वाहा । ॐनारायणाय नमः स्वाहा । ॐमाधवाय नमः स्वाहा ।

इत्याचम्य, हस्तौ प्रक्षाल्य-

'ॐनमो भगवते वासुदेवाय'

इति पठित्वा परितो जलं निक्षिपेत् । ततः--

ॐचिद्रूपिणि महामाये, दिव्यतेजः समन्विते।
तिष्ठ देवि शिखाबन्धे, तेजोवृद्धिं कुरुष्व मे।।

इतिमन्त्रेण शिखाबन्धनं विधाय-

अघमर्षण-सूक्तस्याघमर्षण-ऋषिरनुष्टुप्छन्दो भावभृतो देवता, पापनिरसने विनियोगः ।

ॐ ऋतञ्चसत्यञ्चाभीद्धात्तपसोऽध्यजायत
ततो रात्र्यजायत ततः समुद्रोऽअर्णवः ।।
समुद्रादर्णवादधि--सम्वत्सरोऽअजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशो ।।
सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।।

इत्यनेन जलं नासिकाग्रमभिनीयाघमर्षणं कुर्यात्-

ॐकारस्यब्रह्माऋषिर्गायत्रीछन्दोऽग्नि-देवता शुक्लोवर्णःसर्वकर्म्मारम्भे विनियोगः। ॐसप्तव्याहृतीनां प्रजापतिविश्वामित्रजमदग्निभरद्वाजगौतमाऽत्रिवशिष्ठकश्यपा ऋषयो, गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्ति त्रिष्टुब्जगत्यश्छन्दांसि, अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवता, अनादिष्टप्रायश्चित्ते प्राणायामेविनियोगः ॥ ॐतत्सवितुरित्यस्य विश्वामित्रऋषिः, सवितादेवता,गायत्रीछन्दःप्राणायामे विनियोगः।ॐ आपोज्ज्योतिरित्यस्य प्रजापति-ऋषिर्ब्रह्माऽग्निवायुसूर्या देवताः यजुश्छन्दः प्राणायामे विनियोगः ॥ तत्र मन्त्राः ॥ ॐभूः ॐ भुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐ सत्यम् । ॐ तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् । ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

इति पूर्वं पूरको दक्षिणनासापीडनपूर्वकं श्वासस्यान्तः

प्रवेशनम्।कुम्भको नाम दक्षिणोभयनासापीडनपूर्वं पूरकेणांतः प्रवेशितस्य श्वासवायोरवष्टम्भनम् । रेचको दक्षिणनासापुटावरोधं दूरीकृत्य तद्द्वाराऽन्तःस्थस्य श्वासस्य शनैः २ बहिर्निस्सारणम् । इत्थंकारं प्रतिपूरकादित्रिवारं तद्देवताध्यानाऽनुकूलपुरस्सरं मन्दं २ जपनीयः।जपित्वा जलग्रहणं कुर्यात् तन्नमंत्रः

-"ॐसुमित्रियान आप ओषधयःसन्तु" ।

इति शिरसि जलं क्षिपेत ।। ततः-

ॐआपोहिष्ठेतिऋचस्य सिन्धुद्वीपऋषिः, आपोदेवता,गायत्रीछन्दःमार्जने विनियोगः । ॐआपोहिष्ठठामयो भुवस्तानऽऊर्ज्जेदधातन। महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः । तस्मा ऽअरङ्गमामवो(इतिशिरसि) ।यस्य क्षयाय जिन्न्वथ(इति भूमौ)। आपो जनयथा च नः ।।

इति-'शिरसि', मार्जनं विधाय-

ॐसूर्यश्च मेत्यस्य ब्रह्माऋषिः, सूर्योदेवता, प्रकृतिश्छन्दः, अपामुपस्पर्शने विनियोगः ।। ॐसूर्यश्च मा मन्युश्च मा मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्राऽया पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्या-

मुदरेण शिश्ना । रात्रिस्तदवलुम्पतु यत्कि-
ञ्चिद् दुरितं मयि । इदमहम्माम मृतयोनौ
सूर्ये ज्योतिषि जुहोमि-स्वाहा ।।

इत्यनेन प्रातः सन्ध्यायामाचामेत-

ततो ॐ द्रुपदादिवेत्यस्य कोकिलो राजपुत्र-
ऋषिः, आपोदेवता, अनुष्टुप्छन्दः, मस्तक-
शोधने (मार्जने) विनियोगः ।। ॐद्रुपदादिव
मुमुचानः स्विन्नः स्नातो मलादिव । पूतं
पवित्रेणेवाज्ज्यमापः शुन्धन्तु मैनसः ।।

अत्र सूर्यगायत्रीमन्त्रेणार्घ्यम् ।। ततः-

सूर्योपस्थानम् ।। ॐ उद्वयमुदुत्यमिति द्वयोः
प्रस्कण्वऋषिः, सूर्योदेवता, अनुष्टुप् गायत्री-
छन्दः ।। ॐ चित्रन्देवानामित्यस्य कुत्सां-
गिरसऋषिःसूर्यो-देवता त्रिष्टुप्छन्दः ।। ॐ
तच्चक्षुरित्यस्य दध्यङ्गाथर्वण-ऋषिः,सूर्यो
देवता ऽक्षरातीतपुर उष्णिक्छन्दः, सूर्यो-
पस्थाने विनियोगः ।। ॐ उद्वयन्तमसस्परि-
स्वः पश्यन्तऽउत्तरम् । देवन्देवत्रा सूर्यमग-

न्मज्ज्योतिरुत्तमम्।१। ॐउदुत्तयञ्जातवेद-
सन्देवंव्वहन्तिकेतवः। दृशेव्विश्वायसूर्य्यम्२
ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य
व्वरुणस्याग्ग्नेः। आप्प्रा द्यावापृथिवीऽअन्त-
रिक्ष ँसूर्य्यऽआत्त्मा जगतस्तस्त्थुषश्च ।३।
ॐतच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत्।
पश्येम शरदः शतञ्जीवेम शरदःशत ँश्रृणु-
याम शरदः शतम्प्रब्ब्रवामशरदःशतमदीनाः
स्याम शरदःशतम्भूयश्च्च शरदः शतात्।४।

पुनराचम्य हस्तौ प्रक्षाल्य अंगन्यासं कुर्यात्—

ॐहृदयाय नमः। ॐ भूः शिरसे स्वाहा।
ॐभुवः शिखायै बषट्। ॐ स्वः कवचाय
हुम्। ॐ भूर्भुवः स्वः नेत्रत्रयाय वौषट्।
ॐ भूर्भुवः स्वः अस्त्राय-फट् ॥

इति हृदयादीनि त्रिः स्पृशेत् ॥ ततो गायत्रीमावाहयेत्—

ॐ गायत्रीं त्र्यक्षरां बालां, साक्षसूत्रकमण्ड-
लुम्। रक्तवस्त्रां चतुर्हस्तां,हंसवाहनसंस्थि-
ताम् ॥१॥ ऋग्वेदञ्च कृतोत्सङ्गां,सर्वदेवन-

मस्कृताम् । ब्राह्मणीं ब्रह्मदैवत्यां, ब्रह्मलोक-निवासिनीम् ॥२॥ आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात् । आगच्छ वरदे देवि ! त्र्यक्षरे ब्रह्मवादिनि ! गायत्रि छन्दसां मातर्ब्रह्मयोनि नमोऽस्तु ते ॥३॥ ॐ तेजोऽसीत्यस्य परमेष्ठी ऋषिः, शुक्रो देवता, गायत्री छन्दः, गायत्र्यावाहने विनियोगः ॥ ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि । प्रियं देवानामनाधृष्टन्देवयजनमसि ॥ ततः-उपस्थानम् ॥ तुरीयपादस्य विमल-ऋषिः, परमात्मा देवता, गायत्री-छन्दः, गायत्र्युपस्थाने विनियोगः ॥ ॐगायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यसि न हि पद्यसे, नमस्ते तुरीयाय दर्शिताय पदाय परोरजसेऽसावदोम् ॥ॐकारस्य ब्रह्मर्षिर्गायत्रीछन्दः सविता देवता । त्रिव्याहृतीनां श्रीप्रजापतिऋषिः गायत्र्युष्णिगनुष्टुप्छंदांसि, अग्निवायुसूर्या देवताः, सर्वपापक्षयार्थे गायत्रीमन्त्रजपे विनियोगः ॥

ॐभूर्भुवः स्वः। ॐ तत्सवितुर्व्वरेण्यं भर्ग्गो देवस्य धीमहि।धियो यो नः प्रचोदयात् ॐ।।

एवं यथाशक्त्या *गायत्रीं जपेत् । ततः पुष्पहस्तः–

यदक्षरं पदभ्रष्टं, मात्राहीनञ्च यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि,काश्यपप्रियवादिनि ।।

इति ।। ततः सूर्य्यार्घ्यं दद्यात्–

ॐऐहि सूर्य सहस्रांशो, तेजोराशे जगत्पते ।
अनुकम्पय मां भक्त्या,गृहाणाऽर्घ्यं नमोऽस्तुते

इति त्रिवारं सूर्यायार्घ्यजलं दत्वागायत्रीं विसर्जयेत् । तत्र श्लोको यथा--

ॐउत्तरे शिखरे जाता, भूम्यां पर्वतमस्तके।
ब्राह्मणैरभ्यनुज्ञाता,गच्छ देवि ! यथासुखम्।।

❀ अथा ऽऽचार्य्यादिब्राह्मणानां पूजनम् ❀
ॐनमोऽस्त्वनन्तायेत्यादिमन्त्रैः–

विप्राणां पादप्रक्षालनं विधाय 'ॐगन्धद्वारेति'-गन्धविलेपनञ्च कृत्वा, पुष्पाक्षतैः सम्पूज्य--

ॐ ब्राह्मणाय नमः। ॐ आपद्घनध्वान्त-

---

*अष्टोत्तरशतं नित्यमष्टाविंशतिरेव वा ।।
विधिना दशकं वाऽपि. त्रिकालन्तु जपेद् बुधः ।।
तत्र गायत्रीमन्त्रजपाऽदौ चतुर्विंशतिमुद्रायाः प्रदर्शनम् । तथाऽन्तेऽष्टौ मुद्राः प्रदर्शनं त्वत्यावश्यकीयम् । तत्करणमन्यत्रावलोकनीयम् ।

सहस्रभानवः, समीहितार्थार्पणकामधेनवः अपारसंसारसमुद्रसेतवः, पुनन्तु मां ब्राह्मणपादरेणवः ॥इति सम्प्रार्थ्य—ॐअद्येत्यादि० करिष्यमाणाऽमुककर्मणीह, अमुकगोत्रोत्पन्नोऽमुकशर्माऽहं स्वायुरारोग्यैश्वर्य्याभिवृद्धिद्वारासकलाऽरिष्टशान्त्यर्थमाराध्यदेवताप्रीत्यर्थममुकगोत्रोत्पन्नं ब्राह्मणं त्वां शान्तिपाठादिकर्तृ त्वेनाचार्य्यरूपेणाऽत्वा महं वृणे।

इति वरणद्रव्यं आचार्य्यहस्ते दद्यात्-

वृतोऽस्मीत्युक्त्वाऽऽचार्य्यः- ॐव्रतेन दीक्षामाप्नोतीति वदेत् ॥

ततो ब्राह्मणाः शान्तिपाठादिकं ब्रुवन्तु-

❀ अथ शान्तिपाठम् ❀

ॐ आनोभद्राः क्रतवो यन्तुव्विश्वतोदब्धासोऽअपरीतासऽउद्भिदः । देवानो यथा सदमिद्वृधेऽअसन्नप्प्रायुवो रक्षितारो दिवे दिवे ॥१॥ ॐ देवानाम्भद्रा सुमतिर्ऋजूयतान्देवाना ँ रातिरभिनो निर्वर्त्तताम् ।

देवाना ँ सख्यमुपसेदिमाव्वयन्देवा नऽआयुः प्रतिरन्तु जीवसे ॥२॥ तान्पूर्व्वयानिविदाहूमहे व्वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम् । अर्य्यमणं व्वरुण ँ सोममश्विना सरस्वती नः सुभगामयस्करत् ॥ ३ ॥ तन्नो व्वातो मयोभुव्वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना श्रृणुतन्धिष्ण्यायुवम् ॥४॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसे हूमहे व्वयम् । पूषानो यथा व्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥ स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनःपूषा व्विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु ॥ ६ ॥ पृषदश्वामरुतः पृश्निमातरः शुभँ य्यावानो व्विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो व्विश्वेनोदेवाऽअवसागमन्निह ॥७॥ भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्य्य-

जत्रा: । स्थिरैरङ्गैस्तुष्टुवा ᳪ सस्तनूभिर्व्यशेमहि देवहितँ य्यदायुः ॥८॥ शतमिन्नु शरदोऽअन्तिदेवाय त्रानश्चचक्राजरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः ॥९॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपिता सपुत्रः । विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ १० ॥ ऋचं व्वाचम्प्रपद्ये मनो यजुःप्रपद्ये साम प्राणम्प्रपद्ये चक्षुः श्रोत्रम्प्रपद्ये । व्वागोजः सहौजो मयि प्राणापानौ ॥ ११ ॥ तम्पत्नीभिरनुगच्छेम देवाः पुत्त्रैर्भ्भ्रातृभिरुतवाहिरण्यैः । नाकङ्गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे ऽअधिरोचने दिवः ॥ १२ ॥ आयुष्यं वर्च्चस्य ᳪ रायस्पोषमोद्भिदम् । इद ᳪ हिरण्यं वर्च्चस्वज्जैत्रायाविशतादुमाम् ।१३। ॐ द्यौःशान्तिरन्तरिक्ष ᳪ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वन-

स्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्म- शान्तिः सर्व्वं ँ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि।१४।ॐ यतो यतः समीहसे ततो नो ऽअभयंकुरु। शन्नः कुरुप्रजाभ्यो- भयन्नः पशुभ्यः॥१५॥ ॐशान्तिः शान्तिः सुशान्तिर्भवतु ॥

❀ अथ गणेश पूजनम् ❀

ततो यजमानो दूर्वाक्षतपुष्पहस्तः स्वकुलदेवञ्च स्मृत्वा

ॐसुमुखश्चैकदन्तश्च, कपिलो गजकर्णकः।
लम्बोदरश्च विकटो, विघ्ननाशो विनायकः*।
धूम्रकेतुर्गणाध्यक्षो, भालचन्द्रो गजाननः।
द्वादशैतानि नामानि, यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च, प्रवेशे निर्गमे तथा।
संग्रामे सङ्कटे चैव, विघ्नस्तस्य न जायते।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
अभीप्सितार्थसिद्ध्यर्थं, पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥

---

*"गणाधिपः"—इत्यपि पाठः,

यत्र योगेश्वरः कृष्णो,यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवानीतिर्मतिर्मम ॥
अनन्याश्चिन्तयन्तो मां,ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां,योगक्षेमं वहाम्यहम् ।
स्मृतेः सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं, व्रजामि शरणं हरिम् ॥
सर्वेष्वारम्भकार्येषु. त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं,ब्रह्मविष्णुमहेश्वराः ।
सर्वदा सर्वकार्येषु, नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः ॥
लाभस्तेषां जयस्तेषां,कुतस्तेषां पराजयः ॥
येषामिन्दीवरश्यामो,हृदयस्थो जनार्दनः ॥
विनायकं गुरुं भानुं, ब्रह्मविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ, सर्वकार्यार्थसिद्धये ।
तदेवलग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव, लक्ष्मीपते तेंऽघ्रियुगं स्मरामि॥ सर्वमङ्गलमाङ्गल्ये, शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारा-

यणि नमोऽस्तु ते ।। इति गणेशसमीपे हस्तस्थदूर्वाऽक्षतपुष्पाणि संस्थाप्य, हस्ते जलाक्षतान् गृहीत्वा—

ॐतत्सत्परमात्मने श्रीपुराणपुरुषोत्तमाय नमः ।। ॐविष्णुर्विष्णुर्विष्णुः, श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्याद्य श्रीब्रह्मणोऽह्नि द्वितीये प्रहरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलि-प्रथमचरणे भूर्लोके जम्बूद्वीपे, भरतखण्डे, भारतवर्षे, आर्य्यावर्तान्तर्गतक्षेत्रे, (हिमवत्पर्वतैकदेशे, केदारखण्डान्तर्गतसुमेरुदक्षिणपार्श्वेऽलकनन्दामन्दाकिनीसमीपे वा) षष्टिसम्वत्सराणां मध्येऽमुकनाम्नि सम्वत्सरेऽमुकाऽयने श्रीसूर्य्येऽमुक-ऋतौ, सन्माङ्गल्यप्रदेऽमुकमासेऽमुकपक्षेऽमुकतिथौ, अमुकनक्षत्रेऽमुकयोगेऽमुकवासरेऽमुकराशि-स्थिते श्रीसूर्ये, चन्द्रे, भौमे, बुधे, बृहस्पतौ, शुक्रे, शनौ, राहौ, केतौ, एवं ग्रहगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ, अमुकगोत्रोत्पन्नोऽमुक

प्रवरोऽमुकशाखाध्यायी, अमुकनामराशिः, अमुकनाम शर्मा,वर्मा,गुप्तोऽहं वा ममात्मनो (यजमानस्य वा) सकलदुरितोपशमनार्थं समस्तदुर्ग्रहदुरन्तमहादशाऽऽदिजनिताधिव्याधिजरामरणाल्पमरणपरिहारद्वारा,आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं सर्वोपद्रवविनाशहेतवे, तथा चतुर्लक्षज्योतिः शास्त्रोक्तमहापातकोपपातकज्ञाताऽज्ञातवाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुः स्पर्शन श्रोत्रमनोभिश्चरितसमस्ताऽघस्तोमनिरसनपूर्वकाऽऽधिभौतिकाऽऽधिदैविकाऽऽध्यात्मिकोत्थ-तापत्रयोन्मूलनाय श्रुतिस्मृतिपुराणोक्तसत्फलप्राप्तये दुःस्वप्न-दुःशकुन- दुर्विपाक-दुर्ग्रह- डाकिनी शाकिनी-हाकिनी- मातृका- भैरव-नारसिंह-जलचर-स्थलचर- गगनचर-चराचर-समुद्भूत-नानाविधातङ्कनिरसनाय जन्मजन्मान्तरजनितनिखिलाऽमङ्गलदूरी करणाय,सपत्नी, पुत्रादिकोऽहममुककर्मणि धर्मार्थकामहेतवे,

श्रीगणपत्यादिदेवताप्रीतये, एवमेव कलश-स्थापनपुण्याहवाचननीराजनमातृकापूजनव-सोर्धाराऽभ्युदयिकनान्दीश्राद्धादिकर्माङ्गत्वेन, तत्रादौ कार्यनिर्विघ्नार्थं गणपतिपूजनञ्च करिष्ये ॥

इति-संकल्प्य (शुद्धमानसैः) हस्ते रक्ताक्षतान् गृहीत्वा-"अथावाहनम"-

ॐहेहेरम्ब त्वमेह्येहि,अम्बिकात्र्यम्बकात्मज,
सिद्धिबुद्धिपते त्र्यक्ष,लक्षलाभ पितुःपितः ।१।
नागास्य नागहार त्वं, गणराज चतुर्भुज ।
भूषितः स्वायुधैर्दिव्यैः,पाशांकुशपरश्वधैः ।२।
आवाहयामि पूजार्थं,रक्षार्थञ्च मम क्रतोः ।
इहागत्य गृहाण त्वां,पूजां क्रतुञ्च रक्ष मे ।३।

आवाह्यैवं गणेशं तं, पूजाद्रव्यैः प्रपूजयेत्-

ॐएतन्ते देव सवितर्य्यज्ञम्प्राहुर्ब्बृहस्पतये ब्ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिन्तेन मामव। ॐगणपतये नमः । ॐ मनो जूतीर्ज्जुषता-माज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टं य्यज्ञ ७ समिमन्दधातु । व्विश्श्वेदेवा स ऽइह

मादयन्तामों३ प्प्रतिष्ठ ।। इति प्रतिष्ठाप्य।। ॐ गणानान्त्वेति प्रजापति-ऋषिर्यजुश्छन्दो गणपतिर्देवता, गणपत्यावाहने विनियोगः। ॐ गणानान्त्वा गणपति ँ हवामहे प्प्रियाणान्त्वा प्प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम्। ॐभूर्भुवः स्वः गणपतये नमः।। गणपतिमावाहयामि,स्थापयामि,पूजयामि ।अथाऽऽसनम्-सुमुखाय नमस्तुभ्यं,गणाधिपतये नमः। गृहाणासनमीश त्वं,विघ्नपुञ्जं निवारय ।। इत्यासनं समर्पयामि।। अथ पाद्यम् ।। उमापुत्राय देवाय, सिद्धवन्द्याय ते नमः । पाद्यं गृहाण देवेश,विघ्नराज नमोऽस्तु ते ।। इति पादयोः पाद्यं समर्पयामि ।। अथार्घ्यम्।।एक दन्त महाकाय,नागयज्ञोपवीतक । गणाधिदेव देवेश, गृहाणार्घ्यं नमोऽस्तु ते । इत्यर्घ्यं समर्पयामि ।। अथ पञ्चामृतम् ।। पयो

दधिघृतक्षौद्रैः,शर्करामिश्रितैः कृतम् । पञ्चा-
मृतं गृहाणेदं, स्नानार्थं विघ्नभञ्जन । इति
पञ्चामृतं समर्पयामि ॥ अथस्नानीयं जलम् ।
नर्मदाचन्द्रभागादि-गङ्गासङ्गमजैर्जलैः । स्ना-
पितोऽसि मया देव, विघ्नसंघं निवारय ॥
इतिस्नानीयजलं समर्पयामि ॥ अथ वस्त्रम् ॥
रक्ताम्बरधराधीश !, पाशाङ्कुशधरेश्वर! ।
वस्त्रयुग्मं मया दत्तं, गृहाण परमेश्वर ! ॥
इति वस्त्रे समर्पयामि ॥ अथोपवीतम् ॥ सूर्य-
कोटिसमाभास,नागयज्ञोपवीतक ।सुवर्णमूलै-
रचितमुपवीतं गृहाण मे ॥इत्युपवीतं समर्प-
यामि ॥ अथाऽऽचमनीयम् ॥ सुगन्धमिश्रं
तीर्थादि-पूतं पानीयमुत्तमम् ॥ आचमनं
गृहाण त्वं, विघ्नराज वरप्रद ॥ इत्याचम-
नीयं समर्पयामि ॥ अथ गन्धम् ॥ ईशपुत्र
नमस्तुभ्यं, नमो मूषकवाहन । गन्धं गृहाण
देवेश !, सर्वसौख्यं विवर्धय ॥ इति गन्धं
समर्पयामि ॥ अथाऽक्षतान् ॥ अक्षतान्निर्म-

लान् शुद्धान, रक्तचन्दनमिश्रितान् । गृहाणेमान्सुरश्रेष्ठ, देहि मे विमलां मतिम्।। इत्यक्षतान् समर्पयामि ।। अथ-पुष्पाणि ।। पाटलामल्लिकादूर्वाशतपत्राणि विघ्नहृत् । सुपुष्पाणि गृहाण त्वं, विबुधप्रिय सर्वतः ।।इति पुष्पाणि समर्पयामि ।।अथ धूपम् ।। लम्बोदर विशालाक्ष,धूम्रकेतो नमो नमः । धूपं गृहाण देवेश, विघ्नपुञ्जं निवारय ।। इति धूपमाघ्रापयामि ।। अथदीपम् ।।घृताक्तवर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश ! रुद्रप्रिय नमोऽस्तुते।।इति प्रत्यक्षदीपं दर्श०।।

(पुनर्हस्तप्रक्षालनम्) अथ नैवेद्यम् -

भालचन्द्र नमस्तुभ्यं, विघ्नहृन्मोदकप्रिय । नानाविधं गृहाणेदं,नैवेद्यंकृपया प्रभो! ।इतिनैवेद्यं निवेदयामि।। अथ जलम् ।। लम्बोदर गणाधीश ! गौरीपुत्र ! नमोऽस्तुते । करानन-विशुद्ध्यर्थं, जलमेतद् गृहाण मे ।। इति जलं समर्पयामि ।। अथोपायनम् ।। हिरण्यं रजतं

ताम्रं, यत्किञ्चिदुपकल्पितम् ॥ उपायनं गृहाणेदं, सिद्धिबुद्धीश ! ते नमः ॥ इत्युपायनमर्पयामि ॥

ततो नारिकेलादियुतमर्घ्यं वामहस्ते धृत्वा, तदुपर्युत्तानं दक्षिणहस्तं निधाय--

ॐ रक्ष २ गणाध्यक्ष, रक्ष त्रैलोक्यरक्षक।
भक्तानामभयं कृत्वा, त्राता भव भवार्णवात्१
द्वैमातुर कृपासिन्धो, षाण्मातुराग्रज प्रभो !
वरद त्वं वरं देहि, वाञ्छितं वाञ्छितार्थद ॥
अनेन फलदानेन, फलदोऽस्तु सदा मम ॥२॥
इदं फलं मया देव, स्थापितं पुरतस्तव ॥
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि।३।

इति देवाग्रे नारिकेलं, समर्प्य ततः प्रार्थना-

ॐ विघ्नेश्वराय वरदायसुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणनाथ ! नमो नमस्ते ॥ भक्तार्तिनाशनपराय गणेश्वराय, सर्वेश्वराय शुभदाय सुरेश्वराय । विद्याधराय विकटाय च वामनाय भक्तप्र

सन्नवरदाय नमो नमस्ते ।। नमस्ते ब्रह्मरूपाय, विष्णुरूपाय ते नमः । नमस्ते रुद्ररूपाय करिरूपाय ते नमः ।। विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे।भक्तप्रियाय देवाय, नमस्तुभ्यं विनायक ।। त्वां विघ्नशत्रुदलनेति च सुन्दरेति,भक्तिप्रदेति सुखदेति फलप्रदेति। विद्याप्रदेत्यघहरेति च ये स्तुवन्ति, तेभ्यो गणेश वरदो भव नित्यमेव ।। लम्बोदर नमस्तुभ्यं, सततं मोदकप्रिय । निर्विघ्नं कुरु मे देव, सर्वकार्येषु सर्वदा आवाहनं न जानामि,न जानामि तवाऽर्चनम् । पूजाञ्चैव न जानामि, क्षमस्वेति गणेश्वर ।। अनया पूजया श्रीमन्महागणाऽधिपतिः प्रीयताम् ।। इति सम्प्रार्थ्य ।।

❀ अथ कलशे वरुणपूजनम् ❀

महीं स्पृष्ट्वा-ॐ महीद्यौः पृथिवी च नऽ इमं य्यज्ञम्मिमिक्षताम् । पिपृतान्नो भरीमभिः ।। तत्र यव-प्रक्षेपः ।। ॐ ओषधयः

समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्ब्राह्मणस्त ७ राजन्पारयामसि ॥

अष्टदले कलशं संस्थापयेत्—

ॐआजिग्घ्रकलशम्मह्या त्वा विवशन्त्विन्दवः । पुनरूर्ज्जानिवर्तस्वसानः सहस्रन्धुक्क्ष्वोरुधारा पयस्वती पुनर्म्मा विवशताद्द्रयिः ।

'वरुणस्येति' पवित्रजलेन कलशं पूरयेत्

ॐव्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थो व्वरुणस्यऽऋतसदन्न्यसि व्वरुणस्यऽऋत सदनमसि व्वरुणस्यऽऋतसदनमासीद ॥ ततो गन्धं क्षिपेत् ॥ ॐगन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥ ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियम् ॥

तत सर्वौषधीं क्षिपेत्

ॐयाऽओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगम्पुरा । मनैनुबब्भ्रूणामह ७ शतन्धामानि सप्प्त च ॥ ततः कलशेधान्यप्रक्षेपः ॥ ॐधान्न्यमसि धिनुहि देवान्प्राणायत्वोदानायत्वा व्व्यानाय त्वा। दीग्घामनुप्प्रसिति-

मायुषेधान्देवो वः सविता हिरण्यपाणिः प्प्र-
तिगृब्भ्णात्वच्छिद्द्रेण पाणिना चक्षुषे त्त्वा
महीनाम्पयोसि ॥

ततः सप्तमृत्तिकाः क्षिपेत् ॥ (गजाऽश्वरथवल्मीक-राजद्वार-
ह्रदोद्भवाम् । गोकुलोद्भवमृत्स्नाञ्च, कलशाऽभ्यन्तरे क्षिपेत्)

ॐ स्योना पृथिवि नो भवानृक्षरा निवे-
शनी । यच्छानः शर्म्म सप्प्रथाः ॥

ततो दूर्वान्निक्षिपेत्–

ॐकाण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्प्परि,
एवानो दूर्व्वे प्प्रतनु सहस्रेण शतेन च ॥

ततः पञ्चपल्लवान् ॥ [अश्श्वत्स्थोदुम्बरप्लक्षचूतन्यग्रो-
धपल्लवाः । पञ्च स्थाप्या क्रमेणैव, कलशाऽभ्यन्तरे तदा] ॥

ॐअश्श्वत्थेवो निषदनम्पर्णेव्वो व्वसतिष्कृता।
गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥

ततस्तत्रफलानि–

ॐ याः फलिनीर्य्याऽ अफलाऽ अपुष्पा
याश्च पुष्पिणीः । बृहस्प्पतिप्प्रसूतास्ता नो
मुञ्चन्त्व ँ हसः ॥ ततःकलशे पञ्चरत्नानि
क्षिपेत् ॥ ॐ परिवाजपतिः कविरग्ग्निर्ह-
व्यान्न्यक्रमीत् । दधद्द्रत्नानि दाशुषे ॥

(कनकं कुलिशं नीलं, पद्मरागञ्च मौक्तिकम् । एतानिप ञ्चरत्नानि, कलशाऽभ्यन्तरे क्षिपेत्) ।। ततो हिरण्यम्-

ॐ हिरण्यगर्ब्भः स मवर्त्तताग्ग्रे भूतस्य जातः पतिरेक ऽआसीत् । सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा व्विधेम ।।

ततो वस्त्रपरिधानम्-

*ॐ युवासुवासाः परिवीत ऽआगात्सऽ उश्श्रेयान् भवति जायमानः । तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ।।

अक्षतपूर्णपात्रस्थापनं कलशोपरि-

ॐ पूर्ण्णादर्व्विपरापतसुपूर्ण्णा पुनरापत । व्वस्नेव व्विक्क्रीणावहाऽइषमूर्ज्जं शतक्क्रतो

तत स्तत्र श्रीफलस्थापनम्-

ॐ श्रीश्च्च ते लक्ष्मीश्च्च पत्क्न्यावहोरात्रे पाश्श्र्वे नक्षत्राणि रूपमश्श्विनौ व्यात्तम् । इष्ण्णन्निषाणामुम्मऽ इषाण सर्व्वलोकम्मऽइषाण ।। ॐ तत्त्वायामीत्यस्य शुनः शेपऋषिस्त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः ।।ॐ तत्त्वायामि ब्ब्रह्मणा

---

*ॐ सुजातोज्ज्योतिषा॰ इतिमन्त्रेण कलशे सूत्रवेष्टनञ्च कुर्य्यात् ।

व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो व्वरुणेह बोध्युरुश ँ समानऽ
आयुः प्प्रमोषीः ॥

पुनः "ॐ एतन्ते देव०"-इति प्रतिष्ठाप्य-

ॐभूर्भुवः स्वः, भो वरुण ! इहागच्छेह तिष्ठ ।

अथाऽऽवाहनम्-

आगच्छागच्छ वरुण, विघ्नविध्वंसकारक ।
मम कार्य्यविबृद्धचर्थं, स्थितिं कुरु जलाधिप! ।

अथाऽऽसनम्-

पुष्पासनं महादिव्यं, सर्वरङ्गविरञ्जितम् ।
जलाधिप ! गृहाण त्वं, सर्वसौख्यं विवर्धय ॥

अथ पाद्यम्-

गङ्गादितीर्थसम्भूतं, सुतप्तं जलमुत्तमम् ॥
पाद्यं गृहाण देवेश, जलेशाय नमो नमः ॥

अथाऽर्घ्यम्-

सुतीर्थजं जलं शुद्धं, गन्धपुष्पाक्षतैर्युतम् ।
अर्घ्यं गृहाण वरुण, सर्वापत्तिनिवारक ॥

अथ पञ्चामृतम्-

पयो दधि घृतक्षौद्रशर्करासम्भवं परम् ।
पञ्चामृतं गृहाण त्वं, जलाधिप! नमोऽस्तु ते ॥

अथ स्नानीयं-जलम्–

गङ्गासरस्वतीकृष्णासरयूसम्भवं जलम् ।
नानासुगन्धसंमिश्रं,स्नानीयं स्वीकुरु प्रभो !।

अथ चन्दनम्–

श्रीखण्डं चन्दनं दिव्यं,गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ, चन्दनं प्रतिगृह्यताम् ॥

अथाऽक्षतान्–

शुद्धमुक्ताफलाभैस्तै, रक्षतैः शशिसन्निभैः ।
द्योतयामि जलेश त्वां,सर्वसम्पत्करो भव ॥

अथ पुष्पाणि-

मालतीमल्लिकादीनि,पुष्पाणि ऋतुजानि च।
प्रकल्पयामि वरुण, सर्वाऽभीष्टफलप्रद ॥

अथ धूपम्-

चन्दनागुरुचन्द्रैश्च, संयुतं गुग्गुलान्वितम् ।
घृताभ्यक्तं गृहाण त्वं, धूपं वरुण सर्वतः ॥

अथ दीपम्-

साज्यं सद्वर्तिकायुक्तं,वह्निना योजितं मया।
दीपं गृहाण वरुण, शान्ति कुरु दयानिधे ॥

अथ नैवेद्यम्-

शर्कराघृतसम्मिश्रं, गोधूमं साधुसत्कृतम् ।

पाशिन् गृहाण नैवेद्यं,सदा सौख्यं विवर्धय।।

अथ जलम्-

सुशीतलं जलं शुद्धं,करपादाऽऽस्यशोधनम् ।
गृहाण परया प्रीत्या, जलेशाय नमोनमः ।।

अथोपायनम्-

हैमराजतताम्रद्यन्यतमं यन्मयाहृतम् ।
उपायनं जलेश त्वं, गृहाण मम सिद्धये ।।

ततः कलशे गंगाद्यावाहनम्-

ॐसर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु मम शान्त्यर्थं, दुरितक्षयकारः ।।

इत्यक्षतान् कलशे क्षिपेत् ।। ततः कलशाऽभिमन्त्रणम्-

कलशस्य मुखे विष्णुः,कण्ठे रुद्रः समाश्रितः।
मूले तस्य स्थितो ब्रह्मा,मध्ये मातृगणःस्मृतः।।
कुक्षौ तु सागराः सप्त, सप्तद्वीपा वसुन्धरा।।
ऋग्वेदोऽथ यजुर्वेदः, सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहिताःसर्वे,कलशन्तु समाश्रिताः ।।

ततः कलशप्रार्थना-

ॐदेवदानवसम्वादे, मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ,विधृतो विष्णुनास्वयम्

त्वत्तोये सर्वतीर्थानि, देवाःसर्वे त्वयि स्थिताः।
त्वयितिष्ठन्ति भूतानि, त्वयि प्राणाःप्रतिष्ठिताः
शिवःस्वयं त्वमेवासि, विष्णुस्त्वञ्च प्रजापतिः।
आदित्या वसवो रुद्रा, विश्वेदेवाःसपैतृकाः॥
त्वयि तिष्ठन्ति भूतानि, यतःकामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥
सान्निध्यं कुरु मे देव, प्रसन्नो भव सर्वदा।

❀ अथ पुण्याहवाचनप्रयोगः ❀

"ॐब्राह्मणेभ्यो नमः"

इति ब्राह्मणान्सम्पूज्य-

ॐअद्येत्यादि० (अमुकोऽहम्) ममामुक-कर्मणि पुण्याहवाचनाख्यकर्मकर्तुमेभिर्वासोऽ-ङ्गुलीयकासनादिभिर्बृहस्पतिर्दैवतैः (अमुक) गोत्रान्(अमुक)शर्म्मब्राह्मणान् पुण्याहवाच-कत्वेन युष्मान् वृणे। 'स्वस्तीति-प्रतिवचनम्'।

(ॐकारपूर्वविप्रस्य, भवेत्पुण्याहवाचनम्)। ततोऽक्षतान् क्षिप्त्वा तत्र अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय तत्र च दक्षिणेन पाणिना सुवर्णपूर्णकलशं धार-यित्वा वदेत्-

ॐ त्रीणि पदा व्विचक्रमे व्विष्णुर्गोपाऽ अदाभ्यः। अतो धर्म्माणि धारयन्॥ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च॥ तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु। (ब्राह्मणाः वदेयुः)- तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ३॥ अपां मध्ये स्थिता देवाः, सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणानां करे न्यस्ताः, शिवा आपो भवन्तु ताः॥ ब्राह्मणानां हस्ते सुप्रोक्षितमस्तु। शिवा आपः सन्तु। (ब्राह्मणाः)- सन्तु शिवा आपः।सौमनस्यमस्तु। [ब्राह्मणाः]- अस्तु सौमनस्यम्। अक्षतञ्चारिष्टञ्चास्तु। [ब्राह्मणाः]-अस्त्वक्षतमरिष्टञ्च। गन्धाः पान्तु, सौमङ्गल्यं चाऽस्तु-इति भवन्तो ब्रुवन्तु [ब्राह्मणाः]-गन्धाः पान्तु, सौमङ्गल्यं चाऽस्तु। अक्षताः पान्तु आयुष्यमस्तु, इति भवन्तो ब्रुवन्तु। [ब्राह्मणाः]-अक्षताः पान्तु, आयुष्यमस्तु॥ पुष्पाणि पान्तु, सौश्रियमस्तु,

इति भ० (ब्राह्मणाः)- ॥ पुष्पाणि पान्तु, सौश्रियमस्तु॥सफलताम्बूलानि पान्तु,ऐश्वर्यमस्तु, इति भ०॥(ब्राह्मणाः) सफलताम्बूलानि पान्तु, ऐश्वर्यमस्तु ॥ दक्षिणाः पान्तु, बहुदेयञ्चाऽस्तु, इति भवन्तो ब्रुवन्तु ॥ (ब्राह्मणाः)-दक्षिणाः पान्तु,बहुदेयं चाऽस्तु॥ सकलाराधने स्वर्चितमस्तु ॥ (ब्राह्मणाः) अस्तु स्वर्चितम् ॥ ॐदीर्घमायुःश्रेयःशान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्याविनयो वित्तं बहुपुत्रं चायुष्यं चास्तु ॥ यत्कृत्वा सर्ववेदयज्ञक्रिया-करण कर्म्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते, तमहमोङ्कारमादिं कृत्वा ऋग्यजुः सामाथर्वणाशीर्वचनं बहुऋषिसम्मतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ॥ ॐवाच्यताम् ॥ ॐभद्द्रं कर्णोभिः शृणुयाम देवा भद्द्रम्पश्येमाक्षभिर्य्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेम हि देवहितं य्यदायुः ॥ ॐ देवानाम्भद्द्रा सुम-

तिर्र्जूयतान्देवाना ँ रातिरभिनो निवर्त्त-
ताम् । देवाना ँ सक्ख्यमुपसे दिमा व्वयं
देवान्ऽआयुः प्प्रतिरन्तु जीवसे ॥ ॐदीर्ग्घा-
युस्तऽओषधे खनिता यस्म्मै च त्वा खना-
म्म्यहम् । अथोत्त्वन्दीर्घायुर्ब्भूत्त्वा शतवल्शा
व्विरोहतात् ॥ॐनतद्द्रक्षा ँ सि न पिशा-
चास्तरन्ति देवानामोजः प्रथमज ँ ह्ये तत्।
यो बिभर्त्ति दाक्षायण ँ हिरण्ण्य ँ स देवेषु
कृणुते दीर्ग्घमायुः समनुष्ष्येषु कृणुते दीर्ग्घ-
मायुः ॥ ॐ द्रविणोदा द्रविणसस्तुरस्य
द्रविणोदाः स नरस्य प्रयं सत् । द्रविणोदा
वीरवतीमिषन्नो द्रविणोदारासते दीर्ग्घ-
मायुः ॥ ॐ सविता पश्चातात्सविता पुर-
स्तात्सवितोत्तरात्तात्सविताधरात्तात्। सवि-
तानःसुवतु सर्वतातिं सविता नो रासतां दीर्घ-
मायुः ॥ ॐनवो नवो भवति जायमानोऽह्नां
केतुरुषसामेत्यग्ग्रम् । भागं देवेभ्यो विदधा-
त्यायन्प्रचन्द्रमास्तिरते दीर्घमायुः ॥ ॐ

उच्चादिवि दक्षिणावन्तोऽअस्थुर्य्ये ऽअश्वदाः सहते सूर्य्येण। हिरण्यदाऽअमृत्वं भजन्ते वासोदाः सोमप्प्रतिरन्तऽआयुः ॥ (यजमानो वदेत्)-ॐव्रतजपयमनियमतपः स्वाध्यायक्रतुशमदमदयादानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् ॥ (ब्राह्मणा-वदेयुः) ॥समाहितमनसःस्मः॥(यजमानः०) प्रसीदन्तु भवन्तः।(ब्राह्मणाः)-प्रसन्नाः स्मः। ॐशान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ ऋद्धिरस्तु । ॐ अविघ्नमस्तु।ॐ आयुष्यमस्तु। ॐ आरोग्यमस्तु। ॐशिवमस्तु।।ॐकर्मसमृद्धिरस्तु ॐ धर्मसमृद्धिरस्तु ।ॐ वेदसमृद्धिरस्तु।ॐ शास्त्रसमृद्धिरस्तु। ॐ पुत्रपौत्रसमृद्धिरस्तु। ॐधनधान्यसमृद्धिरस्तु।ॐ इष्टसम्पदस्तु ॥

ततो बहिरक्षतान् क्षिपेत्-

ॐ अरिष्टनिरसनमस्तु ॥ यत्पापं रोगं शोकमकल्याणं तद्दूरे प्रतिहतमस्तु॥(ततः-

पुनर्मार्जनम्) ॥ ॐ यच्छ्रेयस्तदस्तु । ॐ उत्तरे कर्मण्यविघ्नमस्तु । ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु । ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् । ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु। ॐ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाऽधिदेवता प्रीयन्ताम् । ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदेवते प्रीयेताम् । ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् । ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् । ॐ वशिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् ।ॐमाहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् । ॐ अरुन्धतीपुरोगाः पतिव्रताः* प्रीयन्ताम् । ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । ॐ आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। ॐब्रह्म च ब्राह्म-

* 'एक पत्न्यः' इत्यपि पाठः क्वचित् ।

णाश्च प्रीयन्ताम्। ॐ श्रीसरस्वत्यौ प्रीयेताम्। ॐ श्रद्धामेधे प्रीयेताम्। ॐ भगवती कात्यायनी प्रीयताम्। ॐ भगवती माहेश्वरी प्रीयताम्। ॐ भगवती ऋद्धिकरी प्रीयताम्। ॐ भगवती वृद्धिकरी प्रीयताम्। ॐ भगवती तुष्टिकरी प्रीयताम्। ॐ भगवती पुष्टिकरी प्रीयताम्। ॐ भगवन्तौ विघ्नविनायकौ प्रीयताम्। ॐ सर्वाः कुलदेवताः प्रीयन्ताम्। ॐ सर्वाः ग्रामदेवताः प्रीयन्ताम्। ॐ सर्वा इष्टदेवताः प्रीयन्ताम्॥

(पुनरक्षतानां बहिस्त्यागः)–

ॐ हताश्च ब्रह्मद्विषः॥ ॐ हताश्च परिपन्थिनः॥ ॐ हताश्च विघ्नकर्तारः॥ ॐ शत्रवः पराभवं यान्तु॥ ॐ शाम्यन्तु घोराणि॥ ॐ शाम्यन्तु पापानि॥ ॐ शाम्यन्त्वीतयः॥(पुनर्मार्जनम्)॥ ॐ शुभानि वर्द्धन्ताम्॥ ॐ शिवा आपः सन्तु। ॐ शिवा ऋतवः सन्तु॥ ॐ शिवा अतिथयः सन्तु॥ ॐ

शिवा अग्नयः सन्तु । ॐ शिवा आहुतयः सन्तु । ॐ शिवा वनस्पतयः सन्तु।ॐ शिवा ओषधयः सन्तु* । ॐ अहोरात्रे शिवेस्याताम् ।। ॐनिकामे निकामे नः पर्ज्जन्योऽअभिर्वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।

इति योगक्षेमो वै तत्र कल्पते, यत्रैतेन यज्ञेन यजन्ते १क्लृप्तः प्रजानां योगक्षेमो भवति तस्याद्यत्रैतने यज्ञेन यजन्ते ।।

ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताः आदित्यपुरोगाः सर्वेग्रहाः प्रीयन्ताम् । ॐ भगवान्पर्जन्यः प्रीयताम् । ॐभगवान्स्वामी महासेनः प्रीयताम् ।ॐभगवान्नारायणः प्रीयताम् ।। ॐ पुण्यं पुण्याहं वाचयिष्ये।।ब्राह्मणाः ब्रूयुर्वाच्यताम्।।ब्राह्मयं पुण्यं महर्घ्यञ्च, सृष्ट्युत्पादनकारकम् । वेदवृक्षोद्भवं नित्यं, तत्पुण्याहं ब्रुवन्तु नः ।। भो ब्राह्मणाः !मम गृहेऽमुककर्म्मणः पुण्याहं भवन्तो ब्रुवन्तु।।[ब्राह्मणाः]-ॐपुण्याहम्३।।

---

* शिवा नद्यः सन्तु । ॐशिवा गिरयः सन्तु । १ क्लिष्टः

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियाः।
पुनन्तु व्विश्श्वा भूतानि जातवेदः पुनीहि मा।
पृथिव्यामुद्धृता यान्तु, यत्कल्याणं पुरा कृतम्।
ऋषिभिः सिद्धिगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः।
भो ब्राह्मणाः! मम गृहेऽमुककर्मणः कल्याणं
भवन्तो ब्रुवन्तु ॥(ब्राह्मणाः)-ॐ कल्याणं ३
ॐयथेमांव्वाचङ्कल्याणीमावदानि जनेभ्यः।
ब्रह्मराजन्न्याभ्याᳬशूद्द्राय चार्य्याय च स्वाय
चारणाय च। प्प्रियो देवानां दक्षिणायै दातु-
रिह भूयासमयम्मे कामः समृद्धयतामुपमादो
नमतु ॥ सागरस्य यथा वृद्धिर्महालक्ष्म्या-
दिभिः कृताः। सम्पूर्णा सुप्रभावा च,ताञ्च
ऋद्धिं ब्रुवन्तु नः॥ भोब्राह्मणाः ममगृहेऽमुक
कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ॥ (ब्राह्मणाः)-
ॐकर्म ऋद्धयताम् ३ ॥ ॐ सत्रस्यऽऋद्धि-
रस्यगन्न्मज्ज्योतिरमृताऽअभूम। दिवम्पृथि-
व्व्याऽअद्धयारुहामाविदाम देवान्त्स्वज्ज्यो-
तिः ॥ स्वस्तस्तु याऽविनाशाख्या, पुण्यक-

ल्याणवृद्धिदा । विनायकप्रिया नित्यं,ताञ्च स्वस्ति ब्रुवन्तु नः ।। भो ब्राह्मणाः !मम गृहेऽमुककर्म्मणि स्वस्तिभवन्तो ब्रुवन्तु।(ब्राह्मणाः) ॐ आयुष्मते स्वस्तिः ३ ।। ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्वश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। ॐसमुद्रमथनाज्जाता जगदानन्दकारिका ।हरिप्रिया च माङ्गल्या, श्रियं ताञ्च ब्रुवन्तु नः ।। भो ब्राह्मणाः ! मम गृहेऽमुक कर्म्मणि श्रीरस्त्विति भवन्तो ब्रुवन्तु(ब्राह्मणाः)अस्तु श्रीः ३।।ॐ श्रीश्चच ते लक्ष्मीश्च पत्न्यावहो रात्त्रे पाश्श्वें नक्षत्राणि रूपमश्श्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण, सर्व्वलोकम्मऽ इषाण ।। यत्कृतं पुण्याहवाचनं' तदुपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च परिपूर्णमस्तु । [ब्राह्मणाः]-अस्तु परिपूर्णम् ।। अथसङ्कल्पः ।। ॐ अद्येत्यादि० अमुकगोत्रोत्प-

न्नोहममुकनामशर्माऽहं, वर्माऽहं, गुप्तोऽहं वा, कृतस्य पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो मनसोद्दिष्टां दक्षिणां दातुमहमुत्सृजे ॥ततो-ऽभिषेकः॥ ॐ स्वस्ति नऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्श्ववेदाः ।स्वस्तिनस्ता-क्ष्यों ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्द-धातु ॥१॥ ॐपयः पृथिव्व्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीःप्र-दिशः सन्तु मह्यम् ॥२॥ ॐ व्विष्णोरराट-मसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोसि । व्वैष्णवमसि व्विष्णवे त्त्वा॥३॥ॐअग्निर्द्देवता व्वातो देवता सूर्य्यो देवताचन्द्रमादेवता व्वसवो देवतारुद्द्रादेवता-ऽऽदित्या देवता मरुतो देवता । विश्श्वेदेवा देवता बृहस्पतिर्द्देवतेन्द्रो देवता व्वरुणो देवता ॥४॥ ॐमूर्द्धासिराड्ध्रुवोसि व्वरुणा धर्त्र्यसि धरणी । आयुषे त्त्वा व्वर्च्चसे त्त्वा कृष्यै त्त्वा क्षेमाय त्त्वा॥५॥ॐद्यौः शान्ति-

रन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयःशान्तिः । व्वनस्पतयःशान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्ब्रह्म शान्तिः सर्व्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥६॥ ॐ व्विश्श्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्नऽआसुव ॥७॥

इत्याभिषेकः ॥ ततो यजमानो ब्राह्मणदक्षिणासङ्कल्पं कुर्य्यात् ॥

ॐअद्येत्यादि० अमुकोऽहं ममाऽमुककर्म्मणः साङ्गफलावाप्तये तद्दक्षिणार्थमिमानि सोपस्कराणि सदक्षिणादिकानि आमान्नादीनि पूर्वपूजितब्राह्मणेभ्यो विभज्य दातुमुत्सृजे ॥

॥ इति ॥

लोकाचारेणात्र नीराजनम्-

एकस्मिन्पात्रे ज्वलन्तीं वर्तिकान्निधाय, तथा यजमानं 'ॐ अनाधृष्टेति' मन्त्रेण नीराजयेत् –

ॐ अनाधृष्टा पुरस्तादग्ग्नेराधिपत्यऽ आयुर्म्मे दाःपुत्रवती दक्षिणतऽ इन्द्रस्याधिपत्येप्रजाम्मे दाः। सुषदो पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्म्मे दाऽ आश्रुतिरुत्तरतो द्यातु-

राधिपत्ये रायस्पोषम्मे दाः । व्विधृतिरुप-
रिष्टाद् बृहस्पतेराधिपत्यऽ ओजो मे दा व्वि-
श्श्वाभ्योमानाष्ट्राभ्यस्पाहि मनोरश्श्वा-
सि ॥ ततस्तिलककरणम् ॥ ॐ भद्रमस्तु
शिवञ्चाऽस्तु, महालक्ष्मीः प्रसीदतु । रक्षन्तु
त्वां सुरास्सर्वे, सम्पदः स्युः पदे-पदे ॥ १ ॥
मन्त्रार्थाः सफलाः सन्तु, पूर्णाः सन्तु मनो-
रथाः । शत्रूणां बुद्धिनाशोऽस्तु, मित्राणामुद-
यस्तथा ॥२॥ अव्याधिना शरीरेण, मनसा
च निराधिना । पूरयन्नर्थिनामाशां, जीव त्वं
शरदां शतम् ॥ ३ ॥ सपत्न्या दुर्ग्रहाः पापा,
दुष्टसत्त्वाद्युपद्रवाः । तमालपत्रमालोक्य, सदा
सौम्या भवन्तु ते ॥ ४ ॥ आयुरारोग्यमैश्व-
र्य्यं, यशस्तेजोज्ज्वलामतिः । ब्रह्मपुत्रभव-
स्तेजस्तिलकेन कृतेन ते ॥५॥ ॐ अंहो मुच
माङ्गिरसं गयञ्च स्वस्त्या त्रेयम्मनसा च
तार्क्ष्यम् प्रयतपाणिः शरणं प्रपद्ये स्वस्ति
सम्बाधेष्वभयन्नोऽअस्तुपुण्यसमपत्तिरस्तु ।

मङ्गलकार्येऽत्र ब्राह्मणेभ्यो नूनं दक्षिणाः प्रदेयाः । इति ।

❁ अथ षोडशमातृकापूजनम् ❁

अकृत्वा मातृयागन्तु, वैदिकं यः समाचरेत् ।
तस्य क्रोधसमाविष्टाः, हिंसामिच्छन्ति मातरः ॥ १ ॥

पञ्चोदूर्ध्वाः पंचतिर्य्यक् च, रेखाः कार्य्याःप्रयत्नतः ।
कुलदेवीं गणेशञ्च, गौरीं पद्मां तथैव च ॥ २ ॥

पूजयेन्मध्यमे कोष्ठे, शेषाः बाह्ये हि कोष्ठके ।
मध्यकोष्ठचतुष्के तु स्थापयेच्च पृथक्-पृथक् ॥ ३ ॥

गणेशं वायुकोणे च, मध्यमे च कुलेश्वरीम् ।
गौरी च नैर्ऋते पूज्या, पद्मा पावककोणके ॥४ ॥

शची च पश्चिमे स्थाप्या, मेधा चैव द्वितीयके ।
सावित्री दक्षिणे पूज्या, विजया च द्वितीयके ॥५ ॥

जयोत्तरे च संस्थाप्या, देवसेना द्वितीयके ।
स्वाहामग्नौ समभ्यर्चेदीशान्याञ्च स्वधां तथा ॥६ ॥

पूर्वे तु मातरः पूज्यास्तदग्रे लोकमातरः ।
धृतिः पुष्टिर्वायुकोणे, तुष्टिर्नैर्ऋत्यके तथा ॥७ ।

एवं हि मातरः स्थाप्याः, स्वस्वस्थाने पृथक्-पृथक् ॥इति॥

॥ अथ सङ्कल्पः ॥ (ॐ आयङ्गौरिति मेधातिथिऋषिस्त्रिष्टुप्छन्दो गौरी देवता गौर्य्याऽऽवाहने विनियोगः) ॐ आयङ्गौः पृश्निरक्रमी दसदन्नमातरम्पुरः । पितरञ्च प्प्रयन्त्स्वः ॥ ॐगौरी पद्मा शची मेधा, सावित्री

विजया जया । देवसेना स्वधा स्वाहा, मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता । *गणेशसहिता देव्यः, पूजितव्याश्च षोडश ॥ ॐएतन्तेति प्रतिष्ठाप्य ॥ ॐगौर्य्यै नमः । ॐपद्मायै नमः

—इत्यादि नाममन्त्रैर्वा पूजयेत् ॥

अथाऽऽसनम् ॥ सौवर्णमणिभिर्दिव्यै:, खचितं शुद्धमासनम् ॥ गृह्णीत मातृका यूयं, स्थित्यर्थं परया मुदा ॥ इत्यासनम् ॥ अथ पाद्यम् ॥ गङ्गादितीर्थजं वारि, निर्मलं तप्तमुत्तमम् । गृह्णीत कृपया पाद्यं, यूयं षोडशमातृकाः ॥ इति पाद्यम् ॥ अथाऽर्घ्यम् । नानातीर्थोद्धृतं वारि, शुद्धपात्रस्थमुत्तमम् । गौर्य्याद्या मातृका यूयमर्घ्यं गृह्णीत सर्वतः ॥ इत्यर्घ्यम् ॥ पुनः पञ्चामृतस्नानम् ॥ पयो दधि घृतञ्चैव, शर्करामधुसंयुतम् । पञ्चाऽमृतं मयानीतं, स्ना-

*'गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश' इत्यपि पाठः ।

नार्थं प्रतिगृह्यताम् ॥ इति पञ्चामृतस्नानम् ॥

अथाऽऽचमनीयम्—

गङ्गाहृतं शुद्धजलं, सुगन्धेन समन्वितम् ।
आचमार्थं मयानीतं, यूयं गृह्णीत मातृकाः ॥

अथ स्नानीयञ्जलम्—

गङ्गागोदावरीकृष्णाकावेरीजलमुत्तमम् ।
गृह्णीत मातृका यूयं, स्नानार्थं परिकल्पितम् ।

अथ युग्मवस्त्रम्—

वस्त्रयुग्मं समानीतं, शुद्धकार्पासतन्तुजम् ।
सुवर्णसूत्रग्रथितं, यूयं गृह्णीत मातृकाः ॥

अथाऽऽभरणानि—

नासिकेयाङ्गदादीनि, भूषणानि शुभानि च ।
गृह्णीत मातृका यूयं, देहालङ्करणाय च ॥

अथ चन्दनम्-

मलयाचलसम्भूतं, कस्तूरीशशिमिश्रितम् ।
गृह्णीत चन्दनं दिव्यं, यूयं षोडशमातृकाः ॥

अथाऽक्षतान्—

शुद्धमुक्तफलाभैस्तैरक्षतैःशशिसन्निभैः । द्यो-

तयामि सदा भक्तया, देहि मे निर्मलां धियम्

अथ पुष्पाणि—

जातीचम्पकमालादिपुष्पाणिऋतुजानि च ।
पूजार्थं मातृका यूयं, गृह्णीत परया मुदा ॥

अथ धूपम्—

लाक्षागुग्गुलजं धूपं, घृताभ्यक्तं परं शुभम् ।
ज्वलद् गृह्णीत सततं, यूयं षोडशमातृकाः ॥

अथ दीपम्—

साज्यं सद्वर्तिकायुक्तं, वह्निना योजितं मया ।
दीपं गृह्णीत सततं, यूयं षोडशमातृकाः ॥

अथ नैवेद्यम्—

सशर्करां घृताभ्यक्तं, परमान्नं यथाऽऽहृतम् ।
गृह्णीत यूयं नैवेद्यं, मातृकाः भक्तवत्सलाः ॥

अथोपायनम्—

हिरण्यरौप्यताम्राद्यन्यतमं यन्मयाहृतम् ।
गृह्णीतोपायनं प्रीत्या, यूयं षोडशमातृकाः ॥

अथ फलानि—

सताम्बूलं फलं शुद्धं, क्रमुकं खदिरान्वितम् ।

गृह्णीत मातृका यूयं, मुखसंशोधनाय च ॥

ततः प्रार्थना—

गौर्य्याद्याःमातृका यूयं,भक्तियुक्तं समर्चनम्।
मया कृतं प्रगृह्णीत,क्षमध्वञ्च ममागसम्॥
'ॐ ब्रह्माणी कमलेन्दुसौम्य०' ॥

इति सम्प्रार्थयेत् ॥ इति मातृकापूजनम् ॥

❁ अथ वसोर्धारा-पूजनम् ❁

पूर्व-पूर्वोत्तरक्रमेण भित्तौ सप्तधाराः कुर्य्यात्—

ॐ'व्वसोः पवित्रमसि'-इतिमन्त्रस्य प्रजापतिर्ऋषिर्गायत्री-छन्दः, वसोर्धारा देवता, शतधाराकरणे विनियोगः । *ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः

नन्दिनी च वशिष्ठा च, वसुदेवी च भार्गवी ॥ जया च विजया चैव, सप्तैता द्वारमातरः ॥१॥ कुमारी धनदा नन्दा, मंगला विमला बला ॥ जयेति शुभदा प्रोक्ताः, सप्तैतास्तृणमातरः ॥ २ ॥

*श्रीश्च लक्ष्मी धृतिर्मेधा, स्वाहा प्रज्ञा सरस्वती । कृतेषु वृद्धिकार्येषु, सप्तैताः घृतमातरः ॥ ततः सप्तघृतमातॄन् नाममन्त्रैर्मंत्रैवाह्य घृतधारां दद्यात् । तद्यथा-ॐ नमोऽस्तु वसुमातृभ्यो, घृतमातृभ्य एव च स्वयज्ञकार्यसिद्ध्यर्थं, धारां दास्यामि मातरः ॥ इत्युक्त्वा शुद्धघृतस्य सप्तधाराः कृत्वा, गुडेनैकीकृत्य च गन्धादिभिः सम्पूजयेत् ।

पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥

इति कृत्वैतन्ते० इति प्रतिष्ठाप्य–

पाद्यादीनि समर्पयामि ॥ ॐ वसोर्धारादेवताभ्यो नमः । सम्पूज्य प्रार्थयेत् ॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः । श्रद्धा सतां कुलजनप्रभवस्य लज्जा, तां त्वां नताःस्म परिपालय देवि ! विश्वम् ॥ दिव्यवस्त्राः दिव्यदेहा, दिव्यमालाविभूषिताः । वसवोऽष्टौ महाभागा, वरदाः सन्तु मे सदा ॥

❀ अथ नान्दीश्राद्धविधिः ❀

ॐविष्णुः ३ हरिः ३ ॥ ॐअपवित्रःपवित्रो वा, सर्वावस्थां गतोऽपि वा।यः स्मरेत्पुण्डरीकाक्षं, स बाह्याभ्यन्तरः शुचिः । इति जलमभिमन्त्र्य ॐपुण्डरीकाक्षः पुनातु ३ ॥

इत्यन्नमात्मानञ्च सिक्त्वा पूर्वमुखोऽञ्जलिं बध्वा-

ॐ देवताभ्यः पितृभ्यश्च, महायोगिभ्य एव च।नमःस्वाहायै स्वधायै,नित्यमेव नमो नमः।

इति वारत्रयं पठित्वा दूर्वायवजलान्यादाय-

अद्य मात्रादित्रय-श्राद्धसम्बन्धिनः सत्यवसु-संज्ञकाः विश्वेदेवाः नान्दीमुखाः इदमन्नं सोपकरणं वो नमः ॥१॥ अद्य पित्रादित्रय-श्राद्धसम्बन्धिनः सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदमन्नं सोपकरणं वो नमः।२। अद्य मातामहादित्रय-श्राद्धसम्बन्धिनः सत्य-वसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदमन्नं सोपकरणं वो नमः ।।३।।पुनश्च ।। अद्याऽमुक-गोत्रे मातरमुकदेवि ! गायत्रीस्वरूपिणि नान्दीमुखीदमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिः श्रियै।।१।। अद्याऽमुकगोत्रे पितामह्यमुकदेवि सावित्रीस्वरूपिणि नान्दीमुखीदमन्नं सोप-करणन्ते नमोऽस्तु वृद्धिः श्रियै ।।२।। अद्या-ऽमुकगोत्रे प्रपितामह्यमुकदेवि सरस्वतीस्व-रूपिणि नान्दीमुखीदमन्नं सोपकरणन्ते नमो-ऽस्तु वृद्धिः श्रियै ।।३।। पुनश्च।। अद्याऽमुक-गोत्र पितरमुकशर्मन् वसुस्वरूप नान्दीमुखे-दमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिःश्रियै।१।

अद्याऽमुकगोत्र पितामह! अमुकशर्मन् रुद्रस्वरूप नान्दीमुखेदमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिः श्रियै ॥ २ ॥ अद्याऽमुकगोत्र प्रपितामहाऽऽदित्यस्वरूप नान्दीमुखेदमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिः श्रियै ॥३॥ पुनश्च॥ अद्याऽमुकगोत्र मातामह सपत्नीक वसुस्वरूप नान्दीमुखेदमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिः श्रियै ॥१॥ अद्याऽमुकगोत्र प्रमातामह सपत्नीक रुद्रस्वरूप नान्दीमुखेदमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिः श्रियै ॥२॥ अद्याऽमुकगोत्र वृद्ध-प्रमातामह सपत्नीकाऽऽदित्यस्वरूप नान्दीमुखेदमन्नं सोपकरणन्ते नमोऽस्तु वृद्धिः श्रियै ॥३॥ ततः पाद्यादीनि समर्पयामि, सोपस्करदक्षिणाञ्च समर्पयामि। ब्राह्मणायनमः । ततः सम्पूज्य । अद्येहेत्यादि ममामुककर्मणि पितृृणां प्रीतये नान्दीश्राद्धकर्म्मणः साङ्गफलाप्तये, इदं सोपस्करणं दक्षिणामामान्नञ्च प्रजापतिदैवतममुकगोत्रा-

यामुकनामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।
इति दत्त्वा "ॐदेवताभ्यः०" इति त्रिवारं पठेत् ॥ आचामेत् ॥
ॐप्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः,सम्पूर्णं स्यादिति श्रुतिः॥
॥ इति नान्दीश्राद्धम् ।

❀ अथ नवग्रहपूजनम् ❀

ॐआ कृष्णेनेत्यस्य हिरण्यस्तूपऋषिस्त्रिष्टुप्छन्दः, सूर्य्योदेवता, सूर्य्यावाहने विनियोगः ॥ ध्यानम् ॥ पद्मासनः पद्मकरो द्विबाहुः, पद्मद्युतिः सप्ततुरङ्गवाहनः । दिवाकरो लोकगुरुः किरीटी, मयि प्रसादं विदधातु देवः ॥ ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् । ॐ भूर्भुवः स्वः, कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भोः!सूर्य्येहागच्छेह तिष्ठ, सूर्यायनमः, सूर्यमावाहयामि, स्थापयामि ॥ एवं सर्वत्र ॥१॥ ॐ इमन्देवेति

गौतमऋषिः, द्विपदाविराट् छन्दः, सोमो देवता सोमावाहने विनियोगः ॥ ध्यानम् ॥ श्वेताम्बरःश्वेतविभूषणश्च, श्वेतद्युतिर्दण्डधरो द्विबाहुः।चन्द्रोऽमृतात्मा वरदःकिरीटी मयि प्रसादं विदधातु देवः ॥ ॐ इमन्देवा ऽअसपत्नꣳसुबद्ध्वम्महते क्षत्राय महतेज्ज्यैष्ठ्याय महते जानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्ष्य पुत्रममुष्ष्यै पुत्रस्यै विश्वश ऽएषवोमी राजा सोमोऽस्म्माकं ब्राह्मणानाꣳ राजा ॥ ॐ भूर्भुवः स्वः यमुनातीरोद्भवात्रेयसगोत्र शुक्लवर्ण भोः ! सोमेहागच्छेह तिष्ठ ॥ २ ॥ ॐ अग्निर्म्मूर्द्धेति विरूपाक्षऋषिः, गायत्रीछन्दोऽङ्गारको देवता, भौमावाहने विनियोगः ॥ ध्यानम् ॥ रक्ताम्बरो रक्तवपुः किरीटी, चतुर्भुजो मेषगमो गदाधरः । धरासुतः शक्तिधरश्च शूली, सदा मम स्याद्वरदः प्रशान्तः ॥ ॐ अग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्व्याऽअयम् । अपा-

ँ रेता ँ सि जिन्वति ॥ ॐ भूर्भुवः स्वः, अवन्तिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण भोः! भौमेहागच्छेह तिष्ठ ॥३॥ ॐउद्बुद्ध्यस्वेति परमेष्ठीऋषिस्त्रिष्टुप्छन्दो बुधो देवता, बुधावाहने विनियोगः ॥ ध्यानम् ॥ पीताम्बरःपीतवपुः किरीटी, चतुर्भुजो दण्डधरश्च सौम्यः ॥ सिंहस्थितश्चन्द्रसुतो हरिप्रियः, सदा मम स्याद्वरदस्तु सौम्यः ॥ ॐ उद्बुद्ध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते स ँ सृजेथामयञ्च ॥ अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्श्वे देवा यजमानश्च्च सीदत ॥ ॐभूर्भुवः स्वः, मगधदेशोद्भवात्रेयसगोत्रपीतवर्ण भोः! बुधेहागच्छेह तिष्ठ।४ ॐबृहस्पत-इति गृत्समद ऋषिस्त्रिष्टुप्छन्दो गुरुर्देवता,बृहस्पत्यावाहने विनियोगः॥ध्यानम् ॥ पीताम्बरः पीतवपुः किरीटी, चतुर्भुजो देवगुरुः प्रशान्तः। सदाऽक्षसूत्रं सुकमण्डलुञ्च,दण्डञ्च बिभ्रद्वरदोऽस्तु मह्यम्॥

ॐ बृहस्पते ऽअतियदर्य्यो ऽअर्हाद्द्युमद्विभाति ऋतुमज्जनेषु । यद्दीदयच्छवस ऽऋत प्रजात तदस्म्मासु द्द्रविणन्धेहि चित्रम् ॥ॐ भूर्भुवः स्वः, सिन्धुदेशोद्भवाङ्गिरसगोत्र पीतवर्ण भोः! बृहस्पते! इहागच्छेह तिष्ठ ।५।ॐ अन्नात्परिस्रु त-इति प्रजापत्यश्विसरस्वतीन्द्राऋषयः, अतिजगतीछन्दः, शुक्रो देवता, शुक्राऽऽवाहने विनियोगः ॥ध्यानम्॥ श्वेताम्बरः श्वेतवपुः किरीटी, चतुर्भुजो दैत्यगुरुः प्रशान्तः । तथाऽक्षसूत्रञ्च कमण्डलुञ्च, दण्डञ्च बिभ्रद् वरदोऽस्तु मह्यम् ॥ ॐ अन्नात्परिस्रु तोरसम्ब्रह्मणा व्व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः। ऋतेन सत्यमिन्द्रियं व्विपान ᳪ शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु।ॐ भूर्भुवः स्वः, भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भोः! शुक्र इहागच्छेह तिष्ठ ॥६॥ ॐ शन्नो देवीति दध्यङ्गाथर्वण ऋषिः, गायत्रीछन्दः शनिर्देवता शन्यावाहने विनियोगः।

ध्यानम्-नीलाम्बरः शूलधरः किरीटी, गृध्र-स्थितस्त्रासकरो धनुष्मान् । चतुर्भुजः सूर्य्य-सुतः प्रचण्डः, सदास्तु मह्यं वरदोऽल्पगामी ॐशन्नोदेवी रभिष्टय ऽआपो भवन्तु पीतये।। शँय्योरभिस्रवन्तु नः ॥ ॐ भूर्भुवः स्वः, सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शने!इहागच्छेह तिष्ठ ।।७।। ॐकयान-इत्य-स्य वामदेवऋषिर्गायत्रीछन्दः राहुर्देवता राहोरावाहने विनियोगः ।।ध्यानम्।। नीला-म्बरो नीलवपुः किरीटी, करालवक्त्रः कर-तालशूली चतुर्भुजश्चक्रधरश्च राहुः, सिंहासनस्थो वरदोऽस्तु मह्यम् ॥ ॐ कया-नश्चित्र ऽआ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता । ॐ भूर्भुवः स्वः, राठिनापुरोद्भव पैठिनसगोत्र नीलवर्ण भो राहो ! इहागच्छेह तिष्ठ ।।८।। ॐ केतुङ्कृ-ण्वन्नितिमधुच्छन्दाऋषिर्गायत्रीछन्दः केतु देवता, केत्वावाहने विनियोगः । अथ

ध्यानम् ।। धूम्रो द्विबाहुर्वरदो गदाधरो, गृध्रासनस्थो विकृताननश्च । किरीटकेयूर-विभूषितो यः, स चास्तु मे केतुग्रहः प्रशान्त्यै ।। ॐकेतुङ् कृण्वन्न केतवे पेशो मर्य्याऽअपेशसे । समुषद्भिरजायथाः । *ॐभूर्भुवः स्वः, अन्तर्वेदिसमुद्भव जैमिनिसगोत्र धूम्रवर्ण भोः केतो ! इहागच्छ इह तिष्ठ ।।९।। ॐ एतन्ते० ।।

अथ ग्रहाणामावाहनम्-

आगच्छन्तु महाभागा, भास्कराद्या नवग्रहाः।
यज्ञस्यास्य प्रशान्त्यर्थं, सर्वाऽनुग्रहकारकाः।।

अथाऽऽसनम्-

सुवर्णरत्नखचितं, शुद्धोर्णानिर्मितं शुभम् ।
आसनन्तु मयानीतं, भास्कराद्या नवग्रहाः ।।

अथ पाद्यम्-

शुद्धपात्रे स्थितं दिव्यं, जलं तीर्थोद्भवं परम् ।
प्रतिगृह्णन्तु मे पाद्यं, भास्कराद्या नवग्रहाः ।।

*दक्षिणाभिमुखं केतु वायव्यां दिशि ध्वजाकारे षडङ्गुलमण्डले स्थापयेत् ।

इति पादयोः पाद्यं समर्पयामि ।

अथाऽर्घ्यम्–

नानातीर्थोद्भवं वारि, कर्पूरादिसुवासितम् ।
अर्घ्यं गृह्णन्तु सम्प्रीत्या, भास्कराद्या नवग्रहाः

इति हस्तयोरर्घ्यं समर्प० ॥ सर्वाङ्गे स्नानीयं समर्प० ॥

अथ पञ्चाऽमृतम्--

दधिदुग्धघृतक्षौद्रसिताभिः परिकल्पितम् ।
स्नानार्थं प्रतिगृह्णन्तु, भास्कराद्या नवग्रहाः।

इति पञ्चाऽमृतस्नानं समर्प० ॥ अथ जलम्--

गङ्गागोदावरीकृष्णागोमतीभ्यः समाहृतम् ।
सलिलं प्रतिगृह्णन्तु, भास्कराद्या नवग्रहाः ।

इतिशुद्धोदकस्नानीयं समर्प० ॥ मुखे ह्याचमनीयंसमर्प० । पुनराचमनं समर्प० ॥ अथवस्त्रोपवस्त्रम्--

सम्यक् शुद्धानि वासांसि, तथालङ्करणानि च।
मया नीतानि गृह्णन्तु, भास्कराद्या नवग्रहाः।

इति वस्त्रोपवस्त्रार्थे वस्त्रं, यज्ञसूत्रं वा समर्प० ॥

अथ यज्ञोपवीतम्--

नवभिस्तन्तुभिर्युक्तं, त्रिगुणं देवतामयम् ।
उपवीतानि दत्तानि, गृह्णन्त्वत्र नवग्रहाः॥

इति यज्ञोपवीतानि समर्प०, पुनराचमनीयं समर्प० ॥

अथ चन्दनम्

मलयाऽद्रिसमुद्भूतं, कस्तूरीशशिसंयुतम।
मयाऽर्पितञ्च गृह्णन्तु, भास्कराद्या नवग्रहाः॥

इति गन्धं समर्पयामि ॥ अथाऽक्षतान्-

शुद्धमुक्ताफलाभैस्तैरक्षतैः शशिसन्निभैः।द्योतयामि महाभक्त्या, भास्करादीन्नवग्रहान् ॥

इति गन्धान्तेऽक्षतान् समर्प० ॥ अवीरं गुलालं हरिद्राचूर्णञ्च समर्प० ॥ सौभाग्यद्रव्याणि समर्प० ॥ सिन्दूरं समर्प०॥ नानासुगन्धिद्रव्याणि समर्प० ॥

अथ पुष्पाणि--

मालत्यादीनि पुष्पाणि, दूर्वायुक्तान्यनेकशः।
मयाऽर्पितानि गृह्णन्तु, भास्कराद्या नवग्रहाः ॥ इति पुष्पाणि समर्प०॥ततो धूपमाघ्रापयामि। प्रत्यक्षदीपं दर्शयामि ॥ नैवेद्यं निवेदयामि, नैवेद्यं पुरतः कृत्वा, गन्ध-पुष्पे प्रक्षिप्य, "धेनुमुद्राञ्च प्रदर्श्य"-

१-ॐ प्राणाय स्वाहा ॥ २-ॐ अपानाय स्वाहा । ३-ॐ समानाय स्वाहा । ४-ॐ उदानाय स्वाहा । ५-ॐ व्यानाय स्वाहा । मध्ये

मध्ये आचमनीयम् । उत्तरापोषणम् । मुख-प्रक्षालनम् । हस्त प्रक्षालनम् । करोद्वर्त्तनार्थे पुनर्गन्धं समर्प० ।। मुखवासनार्थे ताम्बूलं समर्प० ।। पूगीफलानि समर्प० ।। *कृतायाः पूजायाःसाद्गुण्यार्थे यथाशक्तिद्रव्यं दक्षिणाञ्च समर्प० ।।पुनर्बलिदानं समर्प०।।आरार्त्तिकमर्घ्यञ्च समर्प०।।प्रदक्षिणाञ्च समर्प०।। विशेषार्घ्यं समर्प०।। ततः प्रार्थना।।ॐब्रह्मा मुरारिस्त्रिपुरान्तकारी, भानुः शशी भूमि-सुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतव-स्सर्वे ग्रहाः शान्तिकरा भवन्तु ।। मन्त्रहीनं क्रियाहीनं भक्तिहीनं समर्चनम्।मया कृतञ्च यत्तद्वोः क्षमध्वं ग्रहदेवताः ।। अनेन पूजनेन श्रीसूर्यादि-नवग्रहमण्डलदेवताः प्रीयन्ताम्।।

❀ नवग्रह-मंगलाष्टकम् ❀

भास्वान्काश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः,
षट्त्रिस्थो दशशोभनो गुरुशशिक्षोणीजमित्रं सदा ।।

* फलेन फलितं सर्वं, त्रैलोक्यं सचराचरम् । तस्मात्फलप्रदानेन, पूर्णाः सन्तु मनोरथाः ।। इति ऋतु फलानि समर्प० ।।

दैत्येज्यार्किरिपुः कलिंगजनितश्चाग्नीश्वरौ देवते,
मध्ये वर्तुलपूर्वदिग्दिनकरः कुर्यात्सदा मंगलम् ॥१॥
चन्द्रः कर्कटकप्रभुः सितनिभश्चात्रेयगोत्रोद्भवश्चा-
ग्नेय्यां चतुरस्त्रवारुणमुखश्चापोप्युमाधीश्वरः ।
षट्सप्ताग्निदशैकशोभनफलो नारिर्बुधाऽर्कप्रियः,
स्वामी यामुनदेशजो हिमकरः,कुर्यात्सदामंगलम् ॥२॥
भौमो दक्षिणदिक्त्रिकोणनिहितोऽवन्त्युद्भवो रक्तभः,
स्वामी वृश्चिकमेषयोर्यमहरिद् गुर्विन्दुसूर्य्यप्रियः,
ज्ञाऽरिः षट्त्रिफलप्रदश्च वसुधास्कन्दौ क्रमाद्देवते,
भारद्वाजकुलोद्भवः क्षितिसुतः कुर्यात्सदा मंगलम् ।३।
सौम्योदङ्मुखपीतवर्णमगधश्चात्रेय — गोत्रोद्भवो,
बाणेशानदिशः सुहृच्छनिभृगुः शत्रुःसदा शीतगोः ।
कन्यायुग्मपतिर्दशाष्टचतुरः षण्नेत्रगः शोभनो,
विष्णुः पौरुषदेवते शशिसुतः कुर्यात्सदा मंगलम् ॥४॥
जीवश्चांगिरगोत्रजोत्तरमुखो दीर्घोत्तरासंस्थितः
पीतोऽश्वत्थसमिच्च सिन्धुजनितश्चापोऽथ मीनाऽधि-
पः। सूर्य्येन्दुक्षितिजप्रियो बुधसितौ शत्रू समाश्चापरे
सप्तांकद्विभवः शुभः सुरगुरुःकुर्यात्सदा मंगलम् ॥५॥
शुक्रो भार्गवगोत्रजः सितनिभः प्राचीमुखः पूर्वपः,
पञ्चास्त्रो वृषभस्तुलाऽधिपमहाराष्ट्राधिपोदुम्बरः ।
इन्द्राणी मघवानुभौ बुधशनी मित्राऽर्कचन्द्रौ रिपू,

द्विकषष्ठद्व्ययशुभो मतो भृगुसुतः,कुर्यात्सदा मंगलम् ६।
मन्दःकृष्णनिभस्तु पश्चिममुखः सौराष्ट्रकः काश्यपः,
स्वामी यो मृगकुम्भयोर्बुधसितौ मित्रे समश्चांगिराः।
स्थानं पश्चिमदिक् प्रजापतियमौ देवौ धनुष्यासनः,
षट्त्रिस्थः शुभकृच्छनीरविसुतः,कुर्यात् सदा मंगलम् ७
राहुः सिंहलदेशजश्च निऋर्तिः, कृष्णांगशूर्पासनो
यः पैठीनसिगोत्रसम्भवसमिद्दूर्वामुखो दक्षिणे ।,
यः सर्वाद्यधिदैवते च निऋर्तिः प्रत्याऽधिदेवः सदा,
षट्त्रिस्थः शुभकृच्च सिंहिकसुतः कुर्यात्सदा मंगलम्।८
केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणे स्थितश्चि-
त्रांगध्वजलाञ्छनो हिमगुहो, यो दक्षिणाशामुखः ।
ब्रह्मा चैव सचित्रचित्रसहितः प्रत्याऽऽधिदेवः सदा,
षट्त्रिस्थः शुभकृच्च वर्वरपतिः,कुर्यात् सदा मंगलम्९
इत्येतद् ग्रहमंगलाष्टनवकं लोकोपकारप्रदं,
पापौघप्रशमं महच्छुभकरं सौभाग्यसंवर्द्धनम् ॥
यः प्रातः शृणुयात्पठत्यनुदिनं श्रीकालिदासोदितं,
स्तोत्रं मंगलदायकं शुभकरं, प्राप्नोत्यभीष्टं फलम् १०

❀ अथ तुलादानपद्धतिः ❀

श्री युधिष्ठिर उवाच-

भगवन् ! श्रोतुमिच्छामि, तुलापुरुषसंज्ञकम् ।
को होमः कस्य पूजा च, सङ्कल्पस्य च का विधिः ॥ १ ॥

श्रीकृष्ण उवाच-

ग्रस्ते सूर्ये तथा चन्द्रे, पुण्यतीर्थे सरित्तटे।
लक्षहोमे, विशेषेण, ह्यात्मानं तोलयेन्नृप ! ॥ २ ॥
भूमिकम्पे तथोल्कायां, निर्घातोत्पातदर्शने।
दुर्ग्रहग्रहपीडायामात्मानं तोलयेत्तथा ॥ ३ ॥
आत्मानं तोलयेद्यस्तु, तृणैर्वाऽपि कथञ्च न।
त्रैलोक्यं तोलितं तेन, सर्वकामार्थसिद्धये ॥ ४ ॥
पलाशखदिराश्वत्थदेवदारुशमीमयम्।
स्तम्भमेकं प्रकुर्वीत, यजमानप्रमाणतः ॥ ५ ॥
मानहीनाधिकं कृत्वा कृतमप्यकृतं भवेत्।
तस्मात्सर्वप्रयत्नेन, प्रमाणं कारयेद् बुधः ॥ ६ ॥
यत्र वेदविदो विप्राः, धर्म्माचाररतास्तथा।
रविसङ्क्रान्तिकालेऽपि, स्वां तनुं परितोलयेत् ॥ ७ ॥
वेश्ममानेन कर्तव्यं, मण्डलं चतुरस्रकम्।
यमवामे पश्चिमायां, शालिपिष्टेन वाक्षतैः ॥ ८ ॥
रोपयेन्मण्डलस्याग्रे, तस्योपरि तुलां न्यसेत्।
पीतवस्त्रेण संच्छाद्य, चन्दनेनाऽनुलेपयेत् ॥ ९ ॥
ब्राह्मणं सत्यसम्पन्नं, वेदवेदाङ्गपारगम्।
धर्माचाररतं शान्तं, वृणुयात्फलचन्दनैः ॥ १० ॥
तत्राऽऽदौ तु गणेशञ्च, मातृकामण्डलं तथा।
पूजयेद् गन्धपुष्पैश्च धूपैर्दीपैस्तथोत्तमैः ॥ ११ ॥
पूजितोऽसि मया देव, यज्ञादौ त्वं गणेश्वर !।
त्वत्प्रसादान्महासिद्धिर्विघ्नराज नमोऽस्तु ते ॥ १२ ॥

मातृके त्वं महादेवि, नानातङ्कसमाकुलम् ।
सर्वतो रक्ष भीतिभ्यो, नमस्ते जगदम्बिके ॥ १३ ॥
ब्राह्मणैर्वाचयेच्छान्ति, पञ्चवाद्यानि वादयेद् ।
वेदोक्तेन विधानेन, तुलाह्वानं तु कारयेत् ॥ १४ ॥

तत्र सर्वां सामग्रीं सम्पाद्य, आचम्य, प्रणानायम्य, देशकालौ सङ्कीर्त्य--

ॐ अद्येत्यादि० अमुकगोत्रोत्पन्नोहममुकनामशर्माऽहं (वर्माऽहं गुप्तोऽहं वा) मम जन्मकालिक-वर्षकालिक-गोचरिक-सूर्य्यादिनवग्रहाणां दुर्दशादिकं महारोगोपरोगञ्च शमनार्थं, तथाऽल्पमृत्युमहामृत्युदोषनिवारणार्थं, मनोवाञ्छितफलप्राप्त्यर्थं, तथा च-शान्तिपूर्वकदीर्घायुनैरुज्यत्वफलप्राप्तिहेतवेऽमुक वस्तुभिरात्मतोलनञ्च करिष्ये । तदङ्गतयादौ स्तम्भेन सह तुलायाः, हेमरजतताम्रलौहमय-विष्णुब्रह्मरुद्रयमदेवानां, यमदशनामदेवानां, चतुर्दशयमानाञ्च, हेमरजतताम्रकार्पासमयचतुर्णां सूत्राणामर्चनमहं करिष्ये।

तुलाऽऽवाहनम्–

ॐआवाहयाम्यहं देवि, तुले त्वां सत्यसंस्थितां
मम तोलय चात्मानं, सर्वोपद्रवनाशिनि।।१।।

"ॐ आपो देवीति मन्त्रेण, तुलाऽऽह्वानं कुर्यात्"--

तत्राऽऽदौ विनियोगः--

ॐआपो देवीति-मन्त्रस्य प्रजापतिर्ऋषिर्गा-यत्रीच्छन्दस्तुलादेवता, तुलाऽऽवाहने विनि-योगः। *ॐ आपो देवी बृहतीर्व्विश्शव शम्भुवो द्यावा पृथिवीऽउरोऽअन्तरिक्ष। बृहस्प्पतये हविषा व्विधेम स्वाहा ।।

इत्यक्षतान् क्षिप्त्वा, कुशोदकेन च--
ॐदेवस्यत्वेति तिसृभिर्मन्त्रैस्तुलामभिषिञ्चेत् ।।"

ॐ देवस्यत्वेति त्रयाणां मन्त्राणां प्रजा-पतिर्ऋषिस्त्रिष्टुप्छन्दस्तुलादेवता, तुलाऽभि-षेचने विनियोगः ।। ॐ देवस्य त्वा सवितुः प्प्रसवेऽश्श्विनोर्बाहुब्भ्याम्पूष्ष्णोहस्ताब्भ्याम्

---

* ॐ आपोदेवीः प्प्रतिगृभ्ण्णीत भस्म्मै तत्स्योने क्रृणुद्ध्व ᳪ सुरभा ऽउलोके। तस्म्मै नमन्ताञ्जनयः सुपत्क्नीम्मातेव पुत्त्राम्बभृता प्प्स्वेनत् ।।

*ॐ अश्विनो र्भैषज्ज्येन तेजसे ब्ब्रह्मवर्च्चसायाभिषिञ्चामि ॥ २ ॥ ॐ सरस्वत्यै भैषज्ज्येन व्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण ब्बलाय । श्रियैयशसेऽभिषिञ्चामि। ३

इत्यभिषिच्य, तुलादेवीं ॥

ॐ मनोजूतिरिति मन्त्रेण प्रतिष्ठाप्य–

ॐभूर्भुवः स्वः, भोस्तुले ! इहागच्छेह तिष्ठ । पाद्यादीनि समर्पयामि ॥ ॐस्तम्भसहित-तुलादेव्यै नमः ॥ ॐ अर्चितासि मया देवि, ग्रहदौष्ट्योपशान्तये । आयुरारोग्यमैश्वर्य्यं, तुले देहि नमोऽस्तु ते ॥ इति सम्प्रार्थ्य–

स्थापयेत्षोडशस्तम्भान्धान्यानाञ्च तुलातले । तिलतण्डुलमाषैश्च, यमस्य प्रतिमाऽसिता । दक्षशीर्षा सौम्यपादा, कर्त्तव्या खड्गदण्डिनी ॥ अनड्वानिति मन्त्रेण, वस्त्रञ्च परिधापयेत् ॥

ॐअनड्वानितिमन्त्रस्य श्रीउशनाऋषिः, पंक्तिश्छन्दः, इष्टकादेवता, वस्त्रपरिधानार्थे विनियोगः ॥ ॐअनड्वान्व्वयः पंक्तिश्छन्दो

---

* ॐ अश्विना भेषजम्मधुभेषजन्नः सरस्वती । न्द्रे त्वष्टा यशः श्रिय ७ रूप ७ रूपमधुः सुते ॥

धेनुर्व्वयो जगतीछन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छ-न्दो दित्यवाड्व्वयोव्विराट् छन्दः पञ्चावि-र्व्वयो गायत्री छन्दस्त्रिवत्सो व्वयऽउष्णिक् छन्दस्तुर्य्यवाड्व्वयोऽनुष्टुप्छन्दो लोकन्ता-ऽइन्द्रम् ॥ इत्यनेन वस्त्रपरिधानम् ॥

"कलशं स्थापयेत्तत्र, हिरण्याम्बरसंयुतम् । पञ्चनद्येति-मन्त्रेण, वरुणस्येति वा तथा । हिरण्यहस्त इति वा, प्रति-ष्ठाञ्चैव कारयेत्-" कलशपूजनम्-

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशे भवत्सरित्॥१॥ *ॐ व्वरुणस्योत्तम्भनमिति ॥२॥ ॐ हिर-ण्यहस्तोऽअसुरः सुनीथः सुमृडीकः स्व वा यात्वर्वाङ् । अपसेधन् रक्षसो यातुधानान-स्थाद्देवः प्प्रतिदोषं गृणानः ॥ ३ ॥

इति वरुणं पाद्यार्घ्यादिभिः सम्पूजयेत्-

अथ यमादिदशनामदेवतार्चनम्-

प्रथमस्तु यमः प्रोक्तो,द्वितीयः पाशवर्द्धकः ।

---

*ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्थो व्वरुणस्यऽ ऋतसदन्न्यसि व्वरुणस्यऽ ऋतसदनमसि व्वरुणस्यऽ ऋतसदनमासीद ॥ ॥ ॐ वरुणाय नमः ॥

तृतीयः कालपुरुषश्चतुर्थो यमकिङ्करः ॥
पञ्चमो मृत्युनामा च, षष्ठो दारुणसंज्ञकः ।
सप्तमस्तु महारौद्रोऽष्टमो भयकरस्तथा ॥
नवमस्तु महाकान्तो, दशमस्तु बलाकृतिः ।
एतानि दशनामानि, यमपार्श्वे प्रपूजयेत् ॥
ॐ भूर्भुवः स्वः, भो यमादिदशनामदेवता इहागच्छत इह तिष्ठत ॥ ॐ यमादिदशनामदेवताभ्यो नमः ॥ इति सम्पूज्य–

"ॐ यमायत्वेति मन्त्रेण यममावाहयेत्"–

ॐ यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे । देवस्त्वा सविता मद्ध्वा नक्तु पृथिव्याः स ᳪस्पृशस्पाहि । अर्चिचरसि शोचिरसि तपोऽसि ॥

ततः "ॐ समुद्रोसीति मन्त्रेण यमस्य मूर्ति पूजयेत्"-

ॐसमुद्रोसीत्यस्य मन्त्रस्य श्रीमधुश्छन्द ऋषिर्गायत्रीछन्दो यमो देवता यमप्रतिमापूजने विनियोगः ॥ॐ समुद्द्रोसि व्विश्वव्व्यचा अजोस्येकपादहिरसि बुध्न्न्यो व्वाग-

स्यैन्द्रमसि सदोस्षृतस्यद्वारौ मामासताप्त-मध्वनामध्वपते प्रमातिरस्वस्ति मेऽस्मि-न्पथि देवायाने भूयात् ।। ॐभूर्भुवः स्वः, यमेहागच्छेह तिष्ठ,पाद्यादीनि समर्पयामि ।

अथ ध्यानम्–

एह्येहि दण्डायुध धर्मराज, कालाञ्जना-भाल विशालनेत्र ।। विशालवक्षस्थल रुद्र-रूप, गृहाण पूजां भगवन्नमस्ते ।। ॐयमाय नमः ।।

ततस्सम्पूज्य–

अर्चितोऽसि मया देव, धर्मराज महाबल !
आयुरारोग्यमैश्वर्य्यं,सौभाग्यं नाथ देहि मे।१
अघोरं रौरवाकारं, दुस्तरं यमपन्थिभिः ।
त्वत्प्रसादाद्धर्मराज, दुस्तरं सन्तराम्यहम् ।२

पुनः "* तत्त्वायामीति"–मन्त्रेण, प्रणमेदिति ।। ब्रह्मविष्णुशिवान् भक्त्या, गोमयप्रतिमासु वा ।। अर्चयेद्विधिना भक्त्या, सर्गस्थित्यन्तकारिणः ।। "आब्रह्मन्निति"–मन्त्रेण ब्रह्माणं प्रथमं यजेत् ।।

---

* ॐतत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुश ँ स मान ऽआयुः प्रमोषीः ।।

ॐ आ ब्ब्रह्मन्निति—प्रजापतिर्ऋषिर्यजुश्छन्दो ब्रह्मादेवता, ब्रह्मावाहने विनियोगः। एह्येहि विप्रेन्द्र पितामहेश, हंसाऽधिरूढस्त्रिदशैकवन्द्यः। श्वेतोत्पलाभास कुशाम्बुहस्त, गृहाण पूजां भगवन्नमस्ते॥ ॐ आ ब्ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामा राष्ट्रे राजन्न्यः शूरऽइषव्व्योऽतिव्व्याधी महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्ज्जन्न्यो वर्षतु फलवत्यो नऽओषधयः पच्च्यन्तां य्योगक्षेमो नः कल्पताम्॥ ॐ भूर्भुवः स्वः, भोः ब्रह्मन्निहागच्छेह तिष्ठ॥ पाद्यादीनि समर्पयामि ॐ ब्रह्मणे नमः॥

ततः "ॐ विष्णोरराट' इतिमन्त्रेण विष्णुं सम्पूजयेत्—

ॐ विष्णोरराटमित्यस्य दीर्घतमाऋषिर्गायत्रीछन्दो विष्णुर्देवता विष्ण्वावाहने विनियोगः। ॐ एह्येहि विष्णो गरुडासनस्थ,

लक्ष्मीसमावन्दितपादपद्म । सदा शुभानन्द शुचामधीश, गृहाण पूजां भगवन्नमस्ते ॥ ॐ व्विष्णो रराटमसि व्विष्णोः श्नप्त्रे-स्थो व्विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोसि । व्वैष्णवमसि व्विष्णवे त्वा ॥ ॐ भूर्भुवः स्वः, विष्णो! इहागच्छेह तिष्ठ ॥ पाद्यादीनि समर्पयामि ॥ ॐ विष्णवे नमः ॥

ततः "ॐ नमस्ते रुद्र०" -मन्त्रेण शिवं सम्पूजयेत्-

ॐनमस्ते रुद्रेत्यस्य परमेष्ठीऋषिर्गायत्री छन्दः, शिवो देवता, शिवावाहने विनियोगः॥ ॐएह्येहि गौरीश पिनाकपाणे, शशाङ्कमौले वृषभाधिरूढ । देवाधिदेवेश महेश नित्य, गृहाण पूजां भगवन्नमस्ते॥ ॐ नमस्ते रुद्द्र मन्न्यवऽ उतो तऽ इषवे नमः । बाहुब्भ्यामुत ते नमः॥ॐभूर्भुवः स्वः, शिवेहागच्छेह तिष्ठ, पाद्यादीनि समर्प्पयामि ॥ ॐशिवाय नमः॥ ॐब्रह्मविष्णुशिवा यूयं, पूजिता भक्तिभावतः। रक्षध्वं सर्वमनिशं, यज्ञं मम शुभाऽर्थदम् ॥

एहि धर्मभृतां श्रेष्ठ, धर्माऽधर्मविचारक ।
धर्म्मेण धारयँल्लोकान्धर्मराज!नमोऽस्तु ते ।

अथ चतुर्दशयमपूजनम्-

यमाय धर्म्मराजाय,मृत्यवे चाऽन्तकाय च ।
वैवस्वताय कालाय, सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय, नीलाय परमेष्ठिने ।
वृकोदराय चित्राय, चित्रगुप्ताय वै नमः ॥
ॐ भूर्भुवः स्वः, यमादिचतुर्दशनामदेवता इहागच्छतेह तिष्ठत ॥ पाद्यादीनि समर्पयामि । ॐयमादिचतुर्दशनामदेवताभ्यो नमः॥

पाद्यादिभिः सम्पूज्य-

यद्बाल्ये यच्च कौमारे,यौवने वार्द्धकेऽपि वा।
सर्वं हरसि मे पापं, धर्मराज !नमोऽस्तु ते॥

अथ यमाय बलिदानम् । एकस्मिन्पात्रे दधिमाषभक्तबलिं संस्थाप्य, तत्र दीपञ्च प्रज्वाल्य-

ॐनमो भगवते यमाय प्रेताऽधिपतये रौद्राय दण्डपाणये महिषवाहनसमधिरूढाय घनगर्जितघोरगम्भीरनादाय दक्षिणदिक्संस्थिताय एह्येहि सपरिवार प्रभो ! धर्मराज ! बलिं

गृहाण-गृहाण, यजमानं माञ्च पाहि-पाहि, यज्ञ-रक्षां कुरु-कुरु स्वाहा॥ॐयमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे। देवस्त्वा सविता मद्ध्वानक्तु पृथिव्व्याः स ँ स्पृशस्पाहि। अर्च्चिरसि शोचिरसि तपोसि। समर्च्य-

भो यम! दिशं रक्ष, अमुं सदीपं दधि-माषभक्तबलिं भक्ष, मम शरीरे ह्यायुः कर्त्ता, क्षेमकर्ता, शान्तिकर्ता, पुष्टिदस्तुष्टिदो भव॥ मण्डले सर्वदेवानां, मया भक्त्या निवेदितम्। इदमर्घ्यमिदं पाद्यं, दीपोऽयं प्रतिगृह्यताम्।१।

अथ ब्रह्मणे बलिदानम्-

ॐनमो भगवते ब्रह्मणे चतुर्मुखाय चतुर्भुजाय कमण्डलुहस्ताय हंसवाहनसमधिरूढाय ए-ह्येहि सपरिवार प्रभो! ब्रह्मन्! बलिं गृहाण२, यजमानं मां रक्ष२, यज्ञरक्षां कुरु-कुरु स्वाहा। ॐ ब्रह्म यज्ञानम्प्रथमम्पुरस्ताद् द्विसीमतः सुरुचो व्वेनऽआवः। सबुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमस-

तश्श्च विवः ॥ इतिमन्त्रेण सम्पूज्य ॥ भो ब्रह्मन्! दिशं रक्षाऽमुं सदीपं दधिमाषभक्तबलिं भक्ष, मम शरीरे ह्यायुःकर्ता, क्षेमकर्ता, शान्तिकर्ता पुष्टिदस्तुष्टिदो भव ॥ मण्डले संप्रवक्ष्यामि, मया भक्त्या निवेदितम्। इदमर्घ्यमिदं पाद्यं, दीपोऽयं प्रतिगृह्यताम् ॥२॥

अथ विष्णवे बलिदानम्-

ॐ नमो भगवते विष्णवे त्रिभुवनेश्वराय घन-श्यामवर्णाय पीताम्बरधराय वनमालाविभूषिताय त्रयस्त्रिंशत्कोटयु पशोभिताय चतुर्भुजाय गरुडवाहनसमधिरूढाय एह्येहि सपरिवार प्रभो ! भगवन् ! विष्णो ! बलिं गृहाण-गृहाण, यजमानं मां पाहि-पाहि, यज्ञरक्षां कुरु-कुरु स्वाहा ॥ ॐ विष्णो रराटमसि विष्णोःश्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ ॐ नमो भगवते विष्णवे साङ्गाय सपरिवाराय सायुधाय इमं सदीपदधिमाष-

भक्तबलिं समर्पयामि ।। भो विष्णो ! दिशं रक्ष, इमं सदीपं दधिमाषभक्तबलिं गृहाण, मम शरीरे दीर्घायुःकर्त्ता क्षेमकर्ता शान्ति-कर्ता पुष्टिदस्तुष्टिदो वरदो भव ।। मण्डले संप्रवक्ष्यामि,मया भक्त्या निवेदितम् । इद-मर्घ्यमिदं पाद्यं,दीपोऽयं प्रतिगृह्यताम् ।।३।।

अथ शिवाय बलिदानं—

ॐ नमो भगवते रुद्रायार्द्धचन्द्रविभूषिताय त्रिनेत्राय त्रिशूलहस्ताय वृषभवाहनस-मधिरूढाय, एह्येहि सपरिवार प्रभो ! भगवन् ! शम्भो ! इमं बलिं गृहाण-गृहाण, यजमानं मां पाहि-पाहि, यज्ञरक्षां कुरु-कुरु स्वाहा ।।ॐनमः शम्भवाय च मयो भवाय च नमः।शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।। शिवाय साङ्गाय, इमं सदीपदधिमाषभक्तबलिं समर्पयामि ।। भोः शिव ! दिशं रक्ष,इमं सदीपं दधिमाषभक्त-बलिं भक्ष, ममशरीरे ह्यायुः कर्ता,क्षेमकर्ता,

शान्तिकर्ता, पुष्टिदस्तुष्टिदो वरदो भव ॥ मण्डले संप्रवक्ष्यामि, मया भक्त्या निवेदितम्। इदमर्घ्यमिदं पाद्यं, दीपोऽयं प्रतिगृह्यताम्।४।

अथोपवारनिवेशनम् ॥ दक्षिणे विन्यसेद् द्रव्यमात्मार्नं चोत्तरे न्यसेत् । व्रीहयश्चेति मन्त्रेण, सप्तधान्यानि योजयेत् । यवगोधूमधान्यानि, तिलाः कंगुस्तथैव च । नीवाराः श्यामकाश्चैव. सप्तधान्यमिदं स्मृतम् ॥)

ॐव्व्रीहयश्चच मे यवाश्चच मे माषाश्चच मे तिलाश्चच मे मुद्गाश्चच मे खल्वाश्चच मे प्रियङ्गवश्चच मे ऽणवश्चच मे श्यामाकाश्चच मे नीवाराश्चच मे गोधूमाश्च मे मसूराश्चच मे यज्ञेन कल्पन्ताम् ॥

"ॐ अश्मा च मेति मन्त्रेण, ह्यष्टधातून्नियोजयेत्" [हिरण्यं रजतं ताम्रं, मारकूटञ्च शीशकम् । लोहं रागञ्च खर्जूरमित्यष्टौ धातवः स्मृताः ॥]

ॐअश्श्मा च मे मृत्तिका च मे गिरयश्च मे पर्व्वताश्च मे सिकताश्च मे व्वनस्पतयश्च मे हिरण्यञ्च मेऽयश्चच मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्त्रपु च मे यज्ञेन कल्पन्ताम् ॥

ततस्तुलाप्रार्थनां कुर्य्यात्-

सत्यं तुलाप्रमाणेनाऽसत्यं नैवाऽभिजायते । मम पापविनाशाय, तुले ! देवि ! नमोऽस्तु ते ।। ब्रह्मविष्णुमहेशाद्यैः, पूजितासि तुले ! सदा । मयाऽपि पूजिता भक्त्या, सदा शान्तिं प्रयच्छ मे ।। इति ।।

अथ तुलासूत्रपूजनम्-

ॐरूपेण वीरूपमभ्या, गान्तुथोवो व्विश्वेवेदा व्विभजतु । ऋतस्य पथा प्प्रेतचन्द्र दक्षिणा व्विश्वःपश्यव्यन्तरिक्षं यतस्व सदस्यैः ।।१।। ॐ हिरण्यगर्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽ आसीत् । स दाधार पृथिवीन्द्यामुतेमाङ्कस्स्मै देवाय हविषा व्विधेम।।२।।ॐयदश्श्वाय वास ऽउपस्तृणं त्यधीवासं या हिरण्यान्न्यस्स्मै । सन्दानमर्व्वन्तं पड्वीशं प्प्रिया देवेष्वायामयन्ति ।। ३ ।। ॐस्वर्णघर्म्मः स्वाहा स्वर्णार्क्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्ज्योतिः स्वाहा स्वर्ण-

सूर्य्यः स्वाहा ॥ ॐ भूर्भुवः स्वः,स्वर्णरजत-ताम्रकार्प्पाससूत्रगता विष्णुविरञ्चिशिवयमदेवता इहागच्छतेह तिष्ठत ॥

ततः सर्वेभ्यः पाद्यादीनि समर्प्य०-

ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्द्रम् ॥ ह्वयामि शक्क्रम्पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्त्विन्द्रः ॥ ॐ अद्येत्यादि० अमुकनामशर्माऽहं (वर्म्माहं गुप्तोऽहं वा) सर्वाऽरिष्टखण्डनपूर्वकश्रीधर्म्मराजप्रीत्यर्थं स्वर्णरजतताम्र-कार्प्पाससूत्रखण्डनमहं करिष्ये ॥

ततो दक्षिणहस्ते खड्गं गृहीत्वा-

ॐअखण्डं खण्डयेद्यस्तु,ह्यापदाञ्चैव खण्डनम्
स्वर्णसूत्रप्रदानेन, गोविन्दः प्रीयतामिति।१।
ॐअखण्डं खंडयेद्यस्तु,ह्यापदानाञ्च खण्डनम्।
रौप्यसूत्रप्रदानेन,ब्रह्मा सम्प्रीयतामिति॥२॥
अखण्डं खण्डयेद्यस्तु,ह्यापदाञ्चैव खण्डनम्।
ताम्रसूत्रप्रदानेन,शिवःसम्प्रीयतामिति॥३॥

अखण्डं खण्डयेद्यस्तु, ह्यापदाञ्चैव खण्डनम्।
कार्प्पासमूत्रदानेन, यमः सम्प्रीयतामिति।४।

[स्वयं वै प्राङ् मुखो भूत्वा, सालङ्कारः सवस्त्रकः। पाद्यगन्धाक्षतैश्चैव, संक्षेपात्पूजयेद् ग्रहान्। कुर्य्यात्प्रदक्षिणां राजन्!, चतस्रश्च तुलातले। ततः स्वस्त्ययनं विप्रैः, पाठयेद्विधिपूर्वकम्॥]

ॐनमो ब्रह्मण्यदेवाय, गौब्राह्मणहिताय च॥
जगद्धिताय कृष्णाय, गोविन्दाय नमो नमः॥

[पुनश्च 'प्रतिपदसीति' मन्त्रेण, घटपादं विधापयेत्।]

ॐप्रतिपदसि प्रतिपदे त्वाऽनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा।

ततश्चतुर्षु पूर्वायतेषु घटपादेष्वक्षतपुञ्जरूपेषु क्रमशः दक्षिणपादन्न्यसेत्--

ॐ प्रथम घटपादमितिमन्त्रस्य, ब्रह्मर्षि-र्गायत्रीछन्दो ब्रह्मा-देवता, मम समस्त-कायिक-पापक्षयार्थं,'प्रथमेन घटपादेन ब्रह्मा सम्प्रीयतामिति" ॥१॥ॐ द्वितीयघटपाद-मिति मन्त्रस्य, विष्णुर्ऋषिर्जगती छन्दः, वासुदेव देवता, मम समस्त-वाचिकपापक्षयार्थं

'द्वितीयेन घटपादेन विष्णुः सम्प्रीयतामिति"
॥२॥ ॐ तृतीयघटपादमिति मन्त्रस्य, महादेवऋषिरनुष्टुप्छन्दः, ईश्वरो देवता; मम
सकल-मानसिकपापक्षयार्थं, 'तृतीयघटपादेन
रुद्रः प्रीयतामिति' ॥३॥ ॐ चतुर्थघटपादमितिमन्त्रस्य, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः
यमो देवता, ममसर्वपापक्षयार्थं, "चतुर्थघटपादेन यमः सम्प्रीयतामिति" ॥ ४ ॥

ततः खड्गं गृहीत्वा घटे प्रविविश्य

ॐ यद्देवा इति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवतास्तोलने विनियोगः ॥ ॐ यद्देवा देवहेडनं देवासश्च
कृमा व्वयम्।अ ग्निर्म्मा तस्मादेनसो व्वि।
श्वान्मुञ्च त्व ँ हसः॥१॥ ॐ यदि दिवा
यदि नक्तमेना ँ सि चकृमा व्वयम्व्वायुर्म्मा तस्मादेनसो व्विश्वान्मुञ्च त्व
ँ हसः ॥२॥ॐ यदि जाग्रद्यदि स्वप्नऽएना
ँसि चकृमा व्वयम् । सूर्य्योर्मा तस्मादेनसो

विश्श्वान्मुञ्च त्व ॐ हस: ॥३॥ॐमाकान्त इति–प्रजापतिर्ऋषिः पंक्तिश्छन्दो घटो देवता ऽऽत्मतोलने विनियोगः॥ ॐमाकान्ते पक्षस्यान्ते पर्य्याकासिदेशे स्वाप्पसीः कान्तं वृत्तं वक्क्रम्पूर्णञ्चन्द्रम्मत्वा रात्रौ चेत्क्षुत्क्षामः प्प्रातर्नैटःखेटो राहुःप्प्राद्यात्क्रूरस्तस्य प्राग्ध्वान्तेह्मर्य्यस्यान्ते शस्यैकान्ते कर्तव्वया ।

इति स्वदेहं तोलयित्वा-

पाद्यादीनि समर्पयामि ॥ ॐ सन्तोलित-घृतादिद्रव्येभ्यो नमः ॥ ॐब्राह्मणेभ्यो नमः॥

ततः कुशतिलजलान्यादाय संकल्पं कुर्य्यात्-

ॐ अद्येत्यादि० मम क्षेमैश्वर्य्यविजयाऽऽयुरारोग्यावाप्तये इमानि सन्तोलितद्रव्याणि, अमुकगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥

(अन्नदः प्राणदः प्रोक्तः, प्राणदश्चान्नदस्सदा । अन्नदानफलं तस्मात्प्राप्नोतीह नृपोत्तम) ॥ ततः प्रतिष्ठा-

अद्य – कृतैतद् द्रव्यतोलनप्रतिष्ठार्थं यत्किञ्चित् हिरण्यमग्निदैवतममुकगोत्रेभ्यो

ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥इति॥

अथ प्रार्थना-

कायेन मनसा वाचा, कृतं पापमजानता ।
जानता वा हृषीकेश, पुण्डरीकाक्ष माधव।१।
नामत्रयोच्चारणान्मे, पापं नश्यतु सर्वथा ।
यद्बाल्ये यच्च कौमारे, यौवने वार्धकेऽपि वा २
अन्यजन्मकृतं पापमिहजन्मकृतञ्च यत् ।
तत्सर्वं नश्यतु क्षिप्रं, पुण्यं भवतु चाऽक्षयम्। ३
देवता ऋषयो नागा, गन्धर्वाश्चाऽप्सरोगणाः।
हृष्टपुष्टा इहागत्य, शान्ति कुर्वन्तु मे सदा ।४।

(ततो यजमानः सचैलं स्नात्वा शरीरसन्धारित-वस्त्राणि तत्र सन्त्यज्य, नववस्त्राणि च परिधाय, गौदानञ्च कुर्यात् ॥)

❀ अथ गोदानविधिः ❀

ॐअद्येत्यादि ० अमुकगोत्रोत्पन्नोहममुक-नामशर्माऽहं (वर्माहं, गुप्तोऽहं वा) अमुककर्मणि मम समस्तपापक्षयार्थं, सर्वाऽरिष्टनिवारणा-र्थमैश्वर्यादिफलवृद्धिहेतवे, तथान्ते मोक्षफल-प्राप्तये, गोदानमहं करिष्ये ॥ ततो गोदान-सामग्रीं जलेन सम्प्रोक्ष्य सवत्सां गां प्रपूजयेत्।

तत आवाहनम्

(अक्षतैस्तिलैर्वा) ॥ ॐ आवाहयाम्यहं देवीं, गां त्वां त्रैलोक्यमातरम् । यस्याः स्मरणमात्रेण, सर्वपापप्रणाषनम् ॥

अथाऽऽसनम्—

गवामङ्गेषु तिष्ठन्ति, भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च।

अथ पाद्यम्—

सर्वदेवान्विते मातः, सर्वदेवनमस्कृते ।
पाद्यं मे त्वत्सुखस्पर्शं गृहाणेदं नमोऽस्तु ते ॥

अथाअर्घ्यम्—

कर्पूरवासितं वारि, ताम्रपात्रस्थमुत्तमम् ।
अर्घ्यं गृहाण देवेशि !धेनो तुभ्यं नमो नमः॥

अथ आचमनीयम्—

मन्दाकिनीपयोष्णीभ्यां,समानीतं शुभञ्जलम्।
आचम्यतां जगन्मातर्गौस्त्वं सर्वाऽघहारिणि॥

अथ स्नानीयं जलम्—

निर्मलं तीर्थजं सम्यक्,शुद्धञ्चैव सुशीतलम्।
तद्गृहाण सुखस्पर्शं,स्नानार्थं सलिलन्त्विदम्।

अथ वस्त्रम्–

शुद्धमाच्छादितं वस्त्रं, सम्यक् शुभ्रांशु निर्मलं।
सुरभे ! वस्त्रदानेन, प्रीयताञ्च सदा मम।।

अथाऽऽभूषणानि–

स्वर्णभृङ्गद्वयं रौप्यखुराणाञ्च चतुष्टयम् ।
ताम्रपृष्ठं मुक्तपुच्छं, कांस्यपात्रं गृहाण मे ।।
यत्ते मयाऽर्पितं दिव्यं, घण्टाचामरमण्डितम्।
ग्रैवेयकं गृहाण त्वं, धेनो ! तुभ्यं नमो नमः।।

अथ रक्तचन्दनम्–

सर्वदेवान्विते देवि !, रक्तचन्दनमुत्तमम् ।
कस्तूरीकुंकुमाक्तञ्च, गृहाणेदं नमोऽस्तु ते ।।

अथाऽक्षतान्--

अक्षतान्तिलजान् देवि, शुभ्रचन्दनमिश्रितान्।
गृहाण परमप्रीत्या, गौस्त्वं त्रिदिवपूजिते ।।

अथ पुष्पाणि--

पुष्पमालां तथा जातिपाटलाचम्पकानि च ।
पुष्पाणीमानि धेनो! ते, सर्वविघ्नप्रणाशिनि।।

ततोऽङ्गपूजनम् । तिलैः--

ॐयस्याःशृङ्गाग्रयोरिन्द्रो, देवो वसति नित्यशः

ऊरौ स्कन्दः शिरे ब्रह्मा, ललाटे वृषभध्वजः।१
कर्णयोरश्विनौ देवौ, चक्षुषोः शशिभास्करौ।
दन्तेषु मरुतो देवाः, जिह्वायाञ्च सरस्वती२
अपाने सर्वतीर्थानि, लांगूले सर्वमङ्गला।
ऋषयो रोमकूपेषु, पृष्ठे वैवस्वतो यमः॥३॥
वरुणो धनदश्चैव, दक्षिणां कुक्षिमाश्रितः।
वामपार्श्वे स्थितो यज्ञो, महौजास्तु महाबलः४
खुरमध्ये तु गन्धर्वाः, खुराग्रे पन्नगास्तथा॥
खुराणां पश्चिमे पार्श्वे, गणो ह्यप्सरसां स्थितः५
गोमये वसते लक्ष्मीर्गोमूत्रे जाह्नवीजलम्।
हुङ्कारे चतुरो वेदा, रम्भाशब्दे प्रजापतिः।६।
चत्त्वारः सागराः पूर्णाः, धेनूनां स्तनमण्डले।
ह्यमृतं स्रवते नित्यं, पिबन्ति सुरमानवाः।७।
न धेनुतुल्यं धनमस्ति किञ्चिद्धरत्यघं गुह्य-
बहिर्भवञ्च। तृणानि भुङ्क्त्वाप्यमृतं स्रव-
न्ती, विप्राय दत्ता पितृमोक्षदा सा॥ ८॥
एककालं द्विकालं वा, यो ददाति गवाह्निकम्।
पञ्चचामरपूर्णाङ्गं, विमानमधिरोहति॥९॥

उभे सन्ध्ये च यो नित्यं, गोसावित्रीस्तवं पठेत्।
गोसहस्रफलं सोऽपि, लभते वांछितं फलम् १०
गवामङ्गेषु तिष्ठन्ति, भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ।

अथ धूपम्-

वनस्पतिरसोत्पन्नो, गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वतो धेनो! धूपोऽयं प्रतिगृह्यताम् ।

अथ दीपम्-

आनन्ददः सुराणाञ्च, लोकानां सर्वदा प्रियः।
गौस्त्वं पाहि प्रकाशार्थे, दीपोऽयं प्रतिगृह्यताम्।

अथ नैवेद्यम्-

सुरभिर्वैष्णवी माता, नित्यं विष्णुपदे स्थिता।
ग्रासं गृह्णातु सा धेनुर्यास्ति त्रैलोक्यवासिनी।

नैवेद्यान्तमाचमनीयम् ॥ अथ नमस्कारः-

त्वं देवी त्वं जगन्माता, त्वमेवासि वसुन्धरा।
गायत्री त्वञ्च सावित्री, तुभ्यमस्तु नमो नमः।

ततो गोपुच्छतर्पणम्-

*ततः सव्येन दाता वदेत् ॥ या नन्दिन्यः

---

*दाता अपने दक्षिण-हाथ में कुश एवं पवित्री धारणकर पूर्वाऽभिमुख होकर गाय की पूंछ पर साक्षातजलधारा गिरावे ।

सुशीलाद्याः' कामदा याश्च धेनवः । ताः सर्वाः पुच्छतोयेन,तर्पितास्तर्पयन्तु माम्।१।
गणेशः कार्तिको ब्रह्मा, केशवश्च महेश्वरः ।
देवाःसमस्ताःसगणाः,ऋषयो भुवनादिकाः ।
ते सर्वे तृप्तिमायान्तु,गोपुच्छोदकतर्पणैः।२।
छन्दांसि वेदाश्चत्वारः,पुराणानि यमादयः ।
ते सर्वे तृप्तिमायान्तु,गोपुच्छोदकतर्पणैः।३।

ततोऽपसव्येन मोटकतिलाक्षतजलान्यादाय दक्षिणाऽभिमुखो भूत्वा ।

ॐपिताद्याःपितरःसर्वे,माताद्या वेति सर्वतः।
तृप्यन्तु सर्वदा मर्त्याः,गोपुच्छोदकतर्पणैः।४।

ततः सव्यो भूत्वा ब्राह्मणं सम्पूजयेत्-

ॐनमोऽस्त्वनन्ताय सहस्रमूर्त्तये, सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते, सहस्रकोटीयुगधारिणे नमः ॥

* अथ संकल्पः-

अद्येत्यादि० अमुकोऽहमस्मिन्कर्मणि

संकल्पः-* पुनः यजमान दक्षिण-हाथ में जलाक्षत लेकर गौ की पूंछ पकड़कर गौदान-संकल्प करे ।

श्रुतिस्मृतिपुराणोक्तफलावाप्तये, ज्ञाताऽज्ञाताऽनेकजन्मार्जितमनोवाक्कायकर्मजन्यपापनिरसनाय, निखिलदुःख–दौर्भाग्यदुःस्वप्नदुर्निमित्तदुष्टग्रहबाधाशान्तिपूर्वकं, धनधान्याऽऽयुरारोग्य–द्विपदचतुष्पदसन्तति-चतुर्वर्गादिनिखिलवाञ्छितफल-सिद्धये, गौरोमसंख्यकदिव्यवत्सरावच्छिन्नस्वर्गलोकस्थितिकामश्च, पितॄणां निरतिशय–सानन्दब्रह्मलोकावाप्तये, इमां सुपूजितां साऽलङ्कारां वस्त्रद्वयोपेतां (सुवर्णभृंगीं रौप्यखुरान्वितां मुक्तपुच्छां ताम्रपृष्ठीं घण्टाचामरादियुतां कांस्यदोहनीसंयुताञ्च सवत्सां) गां रुद्रदैवत्याममुकगोत्रायामुकब्राह्मणाय तुभ्यमहं सम्प्रददे।

ततः 'स्वस्तीति'-प्रतिवचनम् । इति गोदानं कृत्वा प्रार्थयेत्-

ॐ यज्ञसाधनभूता या, विश्वपापौघनाशिनी ।
विश्वरूपधरो देवः, प्रीयतामनया गवा ॥१॥
नमो गोभ्यः श्रीमतीभ्यः, सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।२

इति सम्प्रार्थ्य । ततो दाता-

अद्य कृतैतद् गोदानकर्म्मणःसाङ्गतासिद्धये इदं हिरण्यद्रव्यमग्निदैवतम मुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

इति गोदानप्रतिष्ठासङ्कल्पः ॥ ततस्त्रिःप्रदक्षिणां कुर्यात्-

**ॐ नमो ब्रह्मण्यदेवाय,गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय,गोविन्दाय नमो नमः।१
यानि कानि च पापानि,जन्मान्तर कृतानि च।
तानि नाशय धेनो ! त्वं,प्रदक्षिणपदे पदे ।२।
पापानि सर्वाणि पदे पदे या,हरत्यहो तत्क्षणमेव नॄणाम्। प्रदक्षिणां तां परभक्तिभावात्, समाचरेद् धेनुवरे प्रसीद ॥ ३ ॥
गावो ममाग्रतः सन्तु,गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु,गवां मध्ये वसाम्यहम्।४
या लक्ष्मीर्लोकपालानां,या च धेनुःसरस्वती।
धेनुरूपेण सा देवी,मम पापं व्यपोहतु ।।५।।
विष्णोर्वक्षसि या लक्ष्मीः, स्वाहा या च विभावसोः । चन्द्रार्कशक्रशक्तिर्या, साऽस्तु**

मे वरदा सदा ॥ ६ ॥

पुनः ब्राह्मणों को भूयसी-दक्षिणा का सङ्कल्प करे—

ततो ब्राह्मणो गोपुच्छान्वितजलेन यजमानशिरसि निषिञ्चनमाशीर्वादात्मकतिलकञ्च कुर्य्यात् । [तदनन्तर यजमान यथा-संख्या ब्राह्मणभोजन करावै तथा यथेष्ट-दक्षिणादान करै ॥ इति गोदानविधिः ॥

❀ अथ हवनविधि ❀

तत्राऽऽदौ प्रधानदेवताया आवाहनं स्थापनञ्च कुर्यात् । ततः षोडशोपचारैः ऋग्वेदादिभिः सम्पूज्य, स्वर्णप्रतिमाया अग्न्युत्तारणं कृत्वा, पञ्चगव्येन शुद्धिः कार्य्या । ततोऽमृतैः स्नापयेत् । आवाहनं प्राणप्रतिष्ठा च कार्य्या । ततो यथोपचारैर्गन्धाक्षत-पुष्प-धूप-दीपं-नैवेद्याचमनीयताम्बूलदक्षिणादिभिः सम्पूजयेत् ।

प्रधानदेवतापूजन— प्रतिष्ठासाङ्गतासिद्ध्यर्थं यद्यदर्पितं, तेन कर्माङ्गदेवता प्रीयताम् ॥

अथ कुशकण्डिकाकरणम् ॥ शुद्धायां भूमौ त्रिभिर्दर्भैः परिसमूहनम् ॥ हस्तमात्रपरिमितां चतुरस्रां भूमिं कुशैः परिसमुह्य, तान्कुशानैशान्यां परित्यज्य, गोमयोदकेनोपलिप्य, स्फ्येन स्रुवमूलेन वा प्राङ्मुखः प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लि-

स्य, उल्लेखनक्रमेणाऽनामिकाङ्गुष्ठाभ्यां किञ्चिन्मृदमुद्धृत्य, ऐशान्यां दिशि क्षिपेत्। तत उदकेनाऽभ्युक्षणम् ॥

इत्येते पञ्चभूसंस्काराः। [यत्र यत्राऽग्निस्थापनं भवति, तत्र तत्र क्रियन्ते] ॥

*अथाऽग्नेः स्थापनम् ॥ वामहस्ताऽनामिकया यज्ञभूमिं स्पृशन्, कांस्यपात्रेणानीतमग्निमात्माभिमुखं निदध्यात्। तद्रक्षार्थं किञ्चिद् काष्ठादिकन्नियुज्य, आनीतकांस्यपात्रेऽक्षतादिप्रक्षेपः। ततोऽग्निं प्रदक्षिणीकृत्य पुष्पचन्दनताम्बूलपूगीफलद्रव्यवस्त्राण्यादाय, अग्नेर्दक्षिणतो वस्त्रासनास्तरणं कल्पयित्वा, ब्रह्मस्वरूपब्राह्मणस्य पादप्रक्षालनं कार्यम्। पुनर्गन्धमाल्यादिभिस्तं सम्पूज्य, हस्ते धौतवस्त्रोत्तरीयवस्त्र-कमण्डलुभूषणादिकञ्च गृहीत्वा ॥ "ॐअद्यकर्तव्याऽमुकहवनकर्मणि कृताकृतावेक्षण-

* अग्निप्रज्वलनम्—न कुर्यादग्निधमनं, कदाचिद् व्यजनादिना। मुखेनैव धमेदग्निं, धमन्या वेणुजातया ॥

रूप- ब्रह्मकर्म्मकर्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिर्दूर्वाऽक्षतपूगीफलवासोभिर्ब्रह्म-त्वेन त्वामहं वृणे ।।" इति ब्रह्माणं वृणुयात्।। ततो "वृतोऽस्मि"—इतिप्रतिवचनम ।। ॐ व्रतेनदीक्षामाप्नोति, दीक्षयाप्नोतिदक्षिणाम्। दक्षिणा श्रद्धामाप्नोति, श्रद्धयासत्यमाप्यते।।

ततः कर्त्ता यजमानः ब्रह्माणं प्रति—

"यथाविहितं कर्म कुरु"—इत्युक्ते, "करवाणि"—इति ब्रह्मा ब्रूयात् । ततो-ऽस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय "भवामि"—इति तेनोक्ते, अग्नेर्दक्षिणतः कल्पितासनोपरि ब्रह्माणमुत्तराऽभिमुखं कृत्वोपवेशयेत् । ततः प्रणीतापात्रं द्वादशां-गुलदीर्घञ्चतुरंगुलमध्यखातं पद्माकृतिमयं वामहस्ते कृत्वा, दक्षिणहस्तोद्धृतपात्रस्थज-लेनाऽऽपूर्य्य कुशैराच्छाद्य प्रथमासने निधाय ब्रह्मणो मुखमवलोक्याऽग्नेरुत्तरतः कुशो-परि तत्रैव च द्वितीयासने निदध्यात् ।। अथ

कुण्डपरितो बर्हिपरिस्तरणम् ॥ * बर्हिषः कोऽर्थः ? (केचिन्मतेन) एकाशीति ८१ दर्भदलानि + ॥ बर्हिषश्चतुर्थभागं कृत्वा, तेषामपि चतुर्थभागमादाय, "आग्नेयादीशानान्तम्" इति-प्रथमभागपरिस्तरणम् ॥१॥ 'ब्रह्मणोऽग्निपर्य्यन्तम्' इति-द्वितीयभागपरिस्तरणम् ॥ २ ॥ "नैर्ऋत्याद्वायव्यान्तम्" इति-तृतीयभागपरिस्तरणम् ॥ ३ ॥ "अग्नितः प्रणीतापर्य्यन्तम्" इति-चतुर्थभागपरिस्तरणं कुर्य्यात् ॥ ४ ॥ ततोऽग्नेरुत्तरतः पश्चिमदिशि वा पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, सम्मार्जनकुशाः पञ्च, उपयमनार्थं वेणीरूपकुशाः सप्त, प्रादेशमात्राः

---

* बर्हिशब्देन कुशा एवोच्यन्ते ।

+ अन्यच्च-अग्निं षोडषभिर्दर्भैः परिस्तीर्य दिशं प्रति । अर्थात्-बर्हिनाम ६४ कुशाएँ, उनका चतुर्थ-भाग = १६ कुशाएँ, और उनमें से भी चार-चार के चार-विभाग कर ।

समिधस्तिस्रः स्रुवः, खादिरः, आज्यम्, षट्पञ्चाशदुत्तरशतद्वयमुष्टयवच्छिन्नं तण्डुलपूर्णपात्रम् । दक्षिणावरो वा पवित्रच्छेदनकुशानां पूर्व-पूर्वदिशि क्रमेणासादनीयम् ॥ अथ त्रिभिः पवित्रच्छेदनकुशैर्द्वे-पवित्रे छित्वा, ततः सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय, दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुत्पवनम् । ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणेनोद्दिङ्गनम् । प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् ॥ ततः प्रोक्षणीजलेन यथाऽऽसादितपात्राणामभिसेचनम् । ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ अथ आज्यस्थाल्यामाज्यनिर्वापः । ततश्चारुपात्रे प्रोक्षण्युदकमासिच्य तत्र त्रिः प्रक्षालिततण्डुलानां प्रक्षेपः । ब्रह्मणा दक्षिणत आज्याऽधिश्रयणम् । आज्यस्योत्तरतश्चरुमधिश्रयेत् स्वयं वा-

ऽऽचार्यः ॥ ततो ज्वलत्तृणमादाय, आज्य-
स्योपरि चरोरुपरि च प्रदक्षिणक्रमेण भ्राम-
यित्वा वह्नौ तत्प्रक्षेपः ॥ हस्तस्य इतरथा-
वृत्तिः कार्या। तत अधोमुखं प्राञ्चं स्रुव-
प्रतपनं कृत्वा,सम्मार्जनकुशैः स्रुवसम्मार्ज-
नम्। कुशानामग्रैर्मूलतोऽग्रपर्यन्तं, मूलैर्बा-
ह्यतः सम्मार्जनम्। प्रणीतोदके नाभ्युक्ष्य।
पुनः पूर्ववत्प्रतप्य, स्रुवं दक्षिणतो निद-
ध्यात्। तत आज्योत्तारणमुत्तरतः, प्रणी-
तापश्चिमतो निदध्यात्। चरुसत्वे चरोरु-
द्वास्य आज्यस्योत्तरतः स्थापयेत्। पवि-
त्राभ्यामाज्योत्पवनम्। अवेक्षणञ्च। सत्य-
पद्रव्ये तन्निरसनम्। प्रोक्षण्युत्पवनम्पवि-
त्राभ्याम्। तत उपयमनकुशानादाय वाम-
हस्ते कृत्वा, उत्तिष्ठन्मनसा प्रजापतिन्ध्या-
त्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः
क्षिपेत्। उपविश्य, सपवित्रप्रोक्षण्युदके-
नाग्निं पर्युक्ष्य,पवित्रे प्रणीतापात्रे निधाय,

पातितदक्षिणजानुः,कुशेन ब्रह्मणान्वारब्धः, समिद्धतमेऽग्नौ स्रुवेणाज्याहुतिञ्जुहोति ॥ तत्राऽऽघारादारभ्य द्वादशाहुतिपर्यन्तं स्रुव- स्थितहोमशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ इति कुशकण्डिकापद्धतिः ॥

अथ समिद्विधिः ॥ १ समिदर्कमयी भानोः,२ पालाशी शशिनस्तथा । ३ खादिरा भूमिपुत्रस्य, ४ ह्यापामार्गी बुधस्य च ॥ ५ गुरोरश्वत्थजा प्रोक्ता, ६ शुक्रस्यौदुम्बरी मता । ७ शमीजातु शनेः प्रोक्ता, ८ राहोर्दूर्वामयी तथा ॥ ९ केतो- र्दर्भमयो प्रोक्ताऽन्येषां पालाशवृक्षजाः । तत्र च- आर्की नाशयते व्याधिं, पालाशी सर्वकामदा । खादिरा ह्यर्थलाभा- यापामार्गीष्टदर्शिनी ॥ प्रजालाभाय चाश्वत्थी, स्वर्गायौदुम्बरी भवेत् । शमी शमयते पापं, दूर्वा दीर्घायुरेव च ॥ कुशाः सर्वार्थकामानां परमं रक्षणं विदुः ॥ इति ॥

यथा बाणप्रहाराणां, कवच वारणं भवेत् । तद्वद् देवोप- घातानां,शान्तिर्भवति वारणम् ॥ यथा समुत्थितं यन्त्रं, यन्त्रेण प्रतिहन्यते । तथा समुत्थितं घोरं, शीघ्रं शान्त्या प्रशाम्यति ॥

अथाऽग्न्यावाहनम् ॥ ततः कुण्डमध्ये ॥ "ॐरम्"-इति वह्निबीजं लिखेत् ॥उत्पत्ति-

१ आक वृक्ष । २ ढाक वृक्ष । ३ खैर वृक्ष । ४ चिचिड़ा (ओंगा) ५ पीपल वृक्ष । ६ गूलर वृक्ष । ७ छौंकर वृक्ष । ८ दूब । ९ कुशा ।

मुद्राञ्च कृत्वा-ॐ चत्त्वारि शृंगेति-वामदेव-ऋषिस्त्रिष्टुप्छन्दो ऽग्निर्देवताऽग्न्यावाहने विनियोगः ॥

हस्ते पुष्पाण्यादाय-

ॐ चत्त्वारि शृङ्गास्त्रयोऽअस्य पादा द्द्वे शीर्षे सप्प्तहस्त्ता सोऽअस्य । त्रिधा बद्धो व्वृषभो रोरवीति महो देवो मर्त्त्यॉं २ऽआविवेश ॥ इति ध्यायेत् ॥

अथावाहयेदग्निपुरुषम्--

ॐरुद्रतेजः समुद्भूतः द्विमूर्द्धानं द्विनासिकम्।
षण्णेत्रञ्च चतुःश्रोत्रं,त्रिपादं सप्तहस्तकम्।१
याम्यभागे चतुर्हस्तं,सव्यभागे त्रिहस्तकम्।
स्त्रुचं स्त्रुवञ्च शक्तिञ्च,अक्षमालाञ्च दक्षिणे।२
तोमरं व्यजनञ्चैव, घृतपात्रन्तु वामके।
बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम्।३
याम्यानने चतुर्जिह्वं,त्रिजिह्वं चोत्तरे मुखे।
द्वादशकोटिमूर्त्त्याख्यं,द्विपञ्चाशत्कलायुतम्।४
स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम्।

आत्माऽभिमुखमासीनं, ध्यायेऽहं तु हुताशनम्।
रक्तमाल्याम्बरं रक्तं, रक्तपद्मासने स्थितम्।
रौद्रं वागीश्वरीरूपं, वह्निमावाहयाम्यहम्। ६
त्वं मुखं सर्वदेवानां, सप्तार्चिरमितद्युते ?।
आगच्छ भगवन्नग्ने?यज्ञेऽस्मिन्सन्निधो भव ७
भो अग्ने ! वैश्वानर ! इहागच्छ, इह तिष्ठ ॥

इत्यावाहनम्। ततः प्रणमेत्-

ॐमुखं यः सर्वदेवानां, हव्यभुक्कव्यभुक् तथा।
पितॄणाञ्च नमस्तस्मै, विष्णवे पावकात्मने॥

इति नमस्कारः ॥ पुनः पञ्चोपचारैरग्निं सम्पूज्य-

अथाऽग्नेः सप्तजिह्वानां पूजनम्॥ (दक्षिण-मुखे)ॐकनकायै नमः ध्यायामि, पूजयामि।१। ॐरक्तायै नमः ध्या० पू०॥२। ॐकृष्णायै-नमः ध्या० पू० ॥ ३ ॥ ॐ उदरिण्यै नमः ध्या०पू० ॥ ४ ॥ (उत्तरमुखे) ॐ सुप्रभायै नमः ध्या० पू० ॥ ५ ॥ ॐ बहुरूपायै नमः ध्या० पू० ॥ ६ ॥ ॐ अतिरिक्तायै नमः ध्या० पू० ॥७॥ ततः ऋग्वेदं स्थापयेत्पूर्वे,

यजुर्वेदन्तु दक्षिणे । पश्चिमे सामवेदन्तु, उत्तरे च ह्यथर्वणम् ॥

[तदनन्तरं स्त्रुवस्त्रु चसमिद्वनस्पतीनाञ्च पूजनम्]

तत्राऽऽदौ संकल्पः-

ॐअद्येत्यादि० अमुकगोत्रोत्पन्नोऽहममुकनामशर्माहं सपरिवारस्यात्मनः सदाऽभीष्टफलप्राप्त्यर्थममुकयज्ञकर्म्मणि श्रीसूर्य्यादिनवग्रहाणां साधिदैवतप्रत्यधिदेवतानां, पञ्चलोकपालदशदिक्पालाऽमुकप्रधानदेवतासहितानाञ्च प्रीतये, यवतिलधान्याज्यशर्करादि-द्रव्यैस्तत्तद्देवतामन्त्रैर्यक्ष्ये ॥

ततो दक्षिणजान्वाच्य, कुशैर्ब्रह्मणाऽन्वारब्धः व्याहृतिभि राहुतीर्दद्यात्-

॥अथ होमः ॥ (मनसा ध्यानम) ॐ प्रजापतये नमःस्वाहा,इदं प्रजापतये न मम॥१॥

ॐइन्द्राय स्वाहा,इदमिन्द्राय न मम ॥२॥

ॐ अग्नये स्वाहा, इदमग्नये न मम ॥३॥

ॐ सोमाय स्वाहा,इदं सोमाय न मम ॥४॥

ॐ भूः स्वाहा, इदमग्नये न मम ॥५॥

ओ३म् भुवः स्वाहा, इदं वायवे न मम ॥६॥
ओ३म् स्वः स्वाहा, इदं सूर्य्याय न मम ॥७॥
एता महाव्याहृतयः ॥ *ओ३म् शान्तिरस्तु, पुष्टिरस्तु, वृद्धिरस्तु, यत्पापं तत्प्रतिहतमस्तु, द्विपदे चतुष्पदे सुशान्तिर्भवतु ॥

अथ प्रायश्चित-होमः-

ओ३म् त्वन्नोऽअग्ग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो ऽअवयासिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्श्वाद्द्वेषा ᳪ सि प्रमुमुग्ध्यस्मत्स्वाहा ॥ [इदमग्निवरुणाभ्यां न मम]॥१॥ ओ३म् सत्त्वन्नो ऽअग्ग्ने वमो भवोतीनेदिष्ठोऽ अस्याऽ उषसो व्युष्टौ । अवयक्ष्वनो व्वरुण ᳪ रराणो व्वीहि मृडीक ᳪ सुहावो न ऽ एधि-स्वाहा ॥ (इदमग्निवरुणाभ्यां न मम) ॥ २॥ ओ३म् अयाश्चाग्ग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽ असि । अयानो यज्ञं व्वहास्ययानो धेहि

* यथा वाणप्रहाराणां, कवचं वारणं भवेत् । तद्वद् देवोपघातानां, शान्तिर्भवति वारणम् ॥

भेषज ँ स्वाहा ॥ (इदमग्नये अयसे न मम) ॥ ३ ॥ ॐ ये ते शतं व्वरुण ये सहस्रं यज्ञियाः पाशा व्वितता महान्तः । तेभिर्नो ऽअद्य सवितोतव्विष्णुर्व्विश्श्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ॥ (इदं वरुणाय, सवित्रे, विष्णवे, विश्वेभ्यो-देवेभ्यो, मरुद्भ्यः, स्वर्केभ्यश्च न मम) ॥ ४ ॥ ॐ उदुत्तमं व्वरुणपाशमस्मदवाधमं व्विमद्ध्यम ँ श्रथाय । अथाव्वयमादित्यव्व्रते तवानाग-सो ऽ अदितये स्याम-स्वाहा ॥ (इदं वरु-णायादित्यायाऽदितये च न मम) ॥ ५ ॥

इति प्रायश्चित्ताङ्गाज्य-पञ्चवारुणीहोमः ॥ (अतोऽग्रे ऽन्वारब्धं विना होमः कार्य्यः) तत्रादौ घृताक्ताः नवग्रह-समिधः समन्त्रैर्जुहुयात् ॥ अर्कःपलाशः खदिरो, ह्यपामार्गोऽथ पिप्पलः । उदुम्बरः शमी दूर्वा, कुशाश्च समिधः क्रमात् ॥

ॐ सूर्याय नमः स्वाहा ॥१॥ ॐ चन्द्राय नमः स्वाहा ॥२॥ ॐ भौमाय नमः स्वाहा ॥ ३ ॥ ॐ बुधाय नमः स्वाहा ॥ ४ ॥ ॐ बृहस्पतये नमः स्वाहा ॥ ५ ॥ ॐ शुक्राय

नमः स्वाहा ॥६॥ ॐ शनैश्चराय नमः स्वाहा ॥७॥ ॐ राहवे नमः स्वाहा ॥८॥ ॐ केतवे नमः स्वाहा ॥९॥

पश्चाद् घृतच्छायाकरणे तैजसे पात्रे घृतं प्रक्षिपेत् ॥

अथ घृतछाया ॥ ॐ ध्रुवोसीति-प्रजापतिॠषिर्गायत्रीछन्दो ध्रुवो देवता घृतच्छायायां-विनियोगः ॥ ॐ ध्रुवोसि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात्। घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया ॥ ॐ जयन्ती मङ्गला काली, भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री,स्वाहा स्वधा नमोऽस्तु ते।

॥ इति सम्प्रार्थ्यं ॥

ॐ अम्बेऽ अम्बिकेम्बालिके न मानयति कश्चचन । ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्-स्वाहा ॥ (इदमम्बिकायै)

अथ चतुर्देवहोमः-

ॐ गणानान्त्वा गणपति ँ हवामहे प्प्रियाणान्त्वा प्प्रियपति ँ हवामहे निधी-

नान्त्वा निधिपति ँ हवामहे व्वसो मम । आहमजानि गर्ब्भ धमात्त्वमजासि गर्ब्भधम्-स्वाहा ॥ [इदं गणपतये] ॥ १ ॥ ॐ ब्रह्म यज्ञानम्प्रथमम्पुरस्त्ताद्द्विसीमतः सुरुचो व्वेनऽ आवः । सबुध्न्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्श्च योनिमसतश्श्च व्विवः-स्वा-हा ॥ (इदम्ब्रह्मणे) ॥२॥ ॐ व्विष्ण्णो रराटमसि व्विष्ण्णोः श्नप्त्रे स्थो व्विष्ण्णोः स्यूरसि व्विष्ण्णोर्द्ध्रुवोऽसि । व्वैष्ण्णवमसि व्विष्ण्णवे त्त्वा-स्वाहा ॥ (इदं विष्णवे) ॥ ३ ॥ ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्क्कराय च नमः शिवाय च शिवतराय च-स्वाहा ॥(इदं शिवाय)।४।

अथ चतुर्वेदहोमः-

ॐ अग्ग्निमीले पुरोहितं यज्ञस्य देवमृत्त्विजम् । होतारं रत्नधातमम्—स्वाहा ॥ (इदमृग्वेदाय) ॥ १ ॥ ॐ इषेत्त्वोर्ज्जे त्त्वा। व्वायवस्त्थ देवो व्वः सविता प्प्रार्प्पयतु

श्रेष्ठतमाय कर्म्मणऽ आप्यायद्ध्वमघ्न्याऽ इन्द्राय भागम्प्रजावतीरनमीवाऽ अयक्ष्मामा- वस्तेनऽइशत माघश ँ सोद्ध्रुवाऽ अस्मिम- न्गोपतौ स्यातबह्वीर्य्यजमानस्य पशून्पाहि- स्वाहा ॥ (इदं यजुर्वेदाय) ॥ २ ॥ ॐ अग्न ऽआयाहिवीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि-स्वाहा ॥ (इदं सामवेदाय)। ३। ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पी- तये । शँय्योरभिस्स्रवन्तु नः-स्वाहा (इद- मथर्ववेदाय) ॥४॥

अथ नवग्रह होमः-

ॐ अग्निन्दूतम्पुरोदधे हव्यवाहमुप- ब्रुवे । देवाँ२ ऽ आसादयादिह-स्वाहा ॥ ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्न- मृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्-स्वाहा ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृ- तात्-स्वाहा ॥ इदं सूर्य्याय ॥

ॐ अप्स्वन्तरमृतमप्सु भेषजमपामुत-प्रशस्तिष्ष्वश्वा भवत व्वाजिनः। देवीरापो यो वऽऊर्म्मिः प्रतूर्तिः ककुन्मान्व्वाजसा-स्तेनायं व्वाज ँ सेत्-स्वाहा॥ ॐ इमन्देवा ऽअसपत्न ँ सुवद्ध्वम्महते क्षत्राय महते ज्ज्यैष्ठ्याय महते जानराज्ज्यायेन्द्रस्येन्द्रि-याय। इम ममुष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएष वोमी राजा सोमोऽस्म्माकम्ब्रा-ह्मणाना ँ राजा-स्वाहा॥ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति व्वेदः। स नः पर्षदति दुर्ग्गाणि व्विश्श्वानावेव सिन्धुन्दुरितात्यग्निः-स्वाहा॥ इदञ्चन्द्राय॥

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथाः—स्वाहा॥ ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्व्याऽ अयम्। अपा ँ रेता ँ सि जिन्वति-स्वाहा॥ ॐ यदक्रन्दः प्रथमञ्जायमानऽ उद्यन्त्स-मुद्राादुत वा पुरीषात्। श्येनस्य पक्षा हरि-

णस्य बाहूऽ उपस्तुत्त्यम्महि जातन्तेऽ अर्व्वन्-
स्वाहा ॥ इदं भौमाय-

ॐइदं विष्ण्णुर्व्विचक्क्रमे त्रेधा निदधे पदम्।
समूढमस्य पाᳪसुरे-स्वाहा ॥ ॐ उद्बुद्ध्य-
स्वाग्ग्ने प्प्रतिजागृहि त्त्वमिष्टापूर्त्ते सᳪ
सृजेथामयञ्च । अस्म्मिन्त्सधस्त्थेऽ अद्ध्यु-
त्तरस्म्मिन् विश्श्वेदेवा यजमानश्च सीदत-
स्वाहा ॥ ॐ व्विष्ण्णो रराटमसि व्विष्ण्णोः
श्नप्त्त्रे स्थो व्विष्ण्णोः स्यूरसि व्विष्ण्णोद्-
ध्रुवोसि । वैष्ण्णवमसि व्विष्ण्णवे त्त्वा-
स्वाहा । इदं बुधाय ॥

ॐ महाँ २ ऽइन्द्रो व्वज्रहस्तः षोडशी
शर्म्मयच्छतु । हन्तुम्पाप्मानँ योस्मान्द्वेष्टि
उपयाम गृहीतोसि महेन्द्राय त्त्वैषते योनिर्म-
हेन्द्राय त्त्वा-स्वाहा ॥ ॐ वृहस्प्पतेऽ अतिय-
दर्य्योऽ अर्हाद्द्युमद्विभाति क्क्रतुमुज्जनेषु ।
यद्दीदयच्छवसऽऋतप्प्रजात तदस्म्मासु द्द्र-
विणन्धेहि चित्त्रम्-स्वाहा ॥ ॐ ब्रह्म जज्ञा-

नम्प्रथमम्पुरस्तादिद्वसीमतः सुरुचो व्वेनऽ आवः।स बुध्न्न्याऽउपमाऽअस्य व्विष्ठाःसतश्च योनिमसतश्च्च व्विवःस्वाहा।इदं बृहस्पतये।

ॐ शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्यज्ज्योतिश्च ज्ज्योतिष्माँश्च्च। शुक्रश्च्चऽ ऋत पाश्चात्य ँ हाः—स्वाहा ॥ ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः। ऋतेन सत्यमिन्द्रियं व्विपान ँ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु—स्वाहा ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम्। ह्वयामि शक्क्रम्पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्त्विन्द्रः-स्वाहा ॥इदं शुक्राय ॥

ॐ प्रजापते न त्त्वदेतान्न्यन्न्यो व्विश्श्वा रूपाणि परिता बभूव। यत्कामास्ते जुहुमस्तन्नोऽ अस्तु व्वय ँ स्याम पतयो रयीणाम् स्वाहा ॥ ॐ शन्नो देवीरभिष्टृयऽ आपो भवन्तु पीतये। शँय्योरभिस्स्रवन्तु नः-स्वाहा।

ॐ यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे। देवस्त्वा सविता मध्वा नक्तु पृथिव्याः सᳬस्पृशस्पाहि। अर्चिरसि शोचिरसि तपोसि स्वाहा॥ इदं शनैश्चराय।

ॐ नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु। येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः-स्वाहा॥ ॐ कया नश्चित्रऽआ भुवदूती सदावृधः सखा। कया शचिष्ठया व्वृता-स्वाहा॥ ॐ कार्षिरसि समुद्द्रस्य त्वा क्षित्त्याऽ उन्नयामि। समापोऽ अद्भिरग्मत समोषधीभिरोषधीः—स्वाहा॥ (इदं राहवे)॥ ॐ आ ब्ब्रह्मन्ब्राह्मणो ब्ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्न्यः शूरऽ इषव्व्योऽतिव्व्याधी महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्प्तिः पुरन्धिर्य्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे

आहुतयः—"प्रस्थधान्यं चतुषष्ठिराहुतेः परिकीर्तितम्। तिलानान्तु तदर्धं स्यात्तदर्धं स्याद् घृतस्य च।"

नः पर्ज्जन्न्यो व्वर्षतु फलवत्त्यो अ ऽओष-
धयः पच्च्यन्ताँय्योगक्षेमो नः कल्प्पताम्-
स्वाहा । ॐ केतुङ्कृण्ण्वन्न केतवे पेशो म-
र्य्याऽअपेशसे ॥ समुषद्भिरजायथाः-स्वाहा ॥
ॐ इन्धानास्त्वा शत ँ हिमाद्युमन्त ँ
समिधीमहि । अग्गनै समत्नदम्भनमदब्धासो
ऽअदाब्भ्यञ्चित्रा व्वसो स्वस्ति ते पारमशी-
यस्वाहा ॥ (इदं केतवे) ॥

अथ पञ्चलोकपालानां होमः—

ॐगणानान्त्वा गणपति ँ हवामहे प्प्रियाणा-
न्त्वा प्प्रियपति ँ हवामहे निधीनान्त्वा नि-
धिपति ँ हवामहे व्वसो मम । आहमजानि
गर्ब्भधमा त्त्वमजासि गर्ब्भधम्-स्वाहा (इदं
गणपतये(।ॐअम्बेऽ अम्बिकेम्बालिके न मान-
यति कश्च्चन । ससस्त्यश्श्वकः सुभद्द्रिका-
ङ्काम्पीलवासिनीम्-स्वाहा ॥(इदं दुर्गायै) ॥

ब्राह्मणभोजनम्—'सहस्त्र भोजयेत्सोमे, ब्राह्मणानां शतं पशौ । चातुर्मास्येषु चत्वारि-शतानि च सुरामखे । अयुतं वाजपेये च, अश्वमेधे चतुर्गुणमिति" ।

ॐ व्वातो वामनो वा गन्धर्व्वाः सप्तवि ँ शतिः । ते ऽअग्ग्रेश्श्वमयुञ्जँस्ते ऽ अस्मिन्नञ्जवमादधुः-स्वाहा ॥ (इदं वायवे) ॥ ॐ ऊर्ध्वाऽअस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीँष्यग्ग्नेः । द्युमत्तमासु प्रतीकस्य सूनोः-स्वाहा ॥ (इदमाकाशाय) ॥ ॐ अश्श्विनोर्ब्भैषज्ज्येन तेजसे ब्ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै: भैषज्ज्येन व्वीर्य्यान्नाद्द्ययाभिषिञ्च्चामीन्द्रस्येन्द्रियेण बलाय श्श्रियै यशसेऽभिषिञ्चामि-स्वाहा ॥[इदमश्विभ्याम्] इति पञ्चलोकपालानां होमः ॥

अथ दशदिक्पालानां होमः-

ॐ त्रातारमिन्द्रमवितारमिन्द्रँहवे हवे सुहवँशूरमिन्द्रम् । ह्वयामि शक्क्रम्पुरुहूतमिन्द्र ँ स्वस्त्ति नो मघवा धात्त्विन्द्रः-स्वाहा ॥(इदमिन्द्राय न मम) ॥ ॐ अग्निन्न्दूतम्पुरोदधे हव्व्यवाहमुपब्ब्रुवे । देवाँ देवाँ ऽआसादयादिह-स्वाहा ॥ (इदमग्नये) ॥ ॐ

असियमोऽ अस्यादित्त्योऽअर्व्वन्नसित्रितो गुह्नेन व्रतेन। असिसोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि-स्वाहा॥ (इदं यमाय)॥ ॐ एष ते निर्ऋते भागस्तं जुषस्व स्वाहाऽग्निनेत्रेभ्यो देवेभ्यः पुरः सद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः-स्वाहा विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणा नेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्यऽ उत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यऽउ परिसद्भ्योदुवस्वन्तस्तेभ्यः-स्वाहा॥ (इदं निर्ऋतये)॥ ॐइमम्मे व्वरुणश्श्रुधी हवमद्या च मृडय त्वामवस्युराचके-स्वाहा॥(इदं वरुणाय)॥ॐव्वायुरग्ग्रेगायज्ञप्राः साकङ्गन्मनसायज्ञम्। शिवोनियुद्भिः शिवाभिः स्वाहा॥(इदं वायवे)॥ॐ कुविदङ्ग यवमन्ता यवं चिद्यथा दान्त्यनुपूर्व्वं विवयूय। इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमः उक्तिं

त्यजन्ति-स्वाहा ॥ (इदं कुबेराय) ॥ ओ३म् ईशावास्यमिद ँ सर्वं यत्किञ्चिज्जगत्त्या-ञ्जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्-स्वाहा ॥ (इदमीशानाय) (अत्रोदकस्पर्शः) ॥ ओ३म् नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्य सर्प्पेभ्यो नमः-स्वाहा ॥ (इदमन-न्तात) ॥ ओ३म् ब्ब्रह्म यज्ञानम्प्रथमम्पुरस्ता-द्विसीमतः सुरुचो व्वेनऽआवः । सबुद्ध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसत श्च व्विवः-स्वाहा ॥ (इदम्ब्रह्मणे) ॥ इति ॥

अथ दिशाहोमः--

ओ३म् प्राच्च्यै दिशे स्वाहाव्वार्च्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाव्वार्च्यै दिशे स्वाहाप्प्रतीच्यै दिशे स्वाहाव्वार्च्यै दिशे स्वा-होदीच्यै दिशे स्वाहाव्वार्च्यै दिशे स्वाहो-र्द्ध्वायै दिशे स्वाहाव्वार्च्यै दिशे स्वाहाव्वा-र्च्यै दिशे स्वाहाव्वार्च्यै दिशे स्वाहा ॥

अथ गायत्री होमः-

ॐ तत्स वितुर्व्वरेण्ण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्-स्वाहा।(इति १०८ वारञ्च जुहुयात्)। ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति व्वेदः। स नः पर्षदति दुर्ग्गाणि विश्श्वानावेव सिन्धु दुरितात्यग्निः-स्वाहा॥ (इति तुष्टचं)॥

ॐ व्विश्श्वतश्चक्षुरुत व्विश्श्वतोमुखो व्विश्श्वतो बाहुरुत व्विश्श्वतस्पात्। सम्बाहुभ्यान्धमति सम्पत त्त्रैर्द्यावाभूमी जनयन्देव ऽ एकः-स्वाहा॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिःपृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्वꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि॥

ततः सपत्नीको यजमानः, आचार्य्यस्य दक्षिणःसन् ताम्बूलपूगीफलाऽक्षतघृतादिभिः पूर्णाहुति ञ्जुहुयात्॥

ॐ पूर्ण्णा दर्व्वीति-हिरण्यगर्भ-ऋशिस्त्रिष्टुप्छन्दो वैश्वानरो देवता, मृडनामाग्नौ

पूर्णाहुतिर्होमे-विनियोगः ॥ ॐ पूर्ण्णा दर्व्वि परापत सुपूर्ण्णा पुनरापत । व्वस्नेव व्वि-क्क्रीणावहा ऽइषमूर्ज्जं ँ शतक्क्रतो-स्वाहा ॥

अथ वर्हिर्होमः-

ॐ देवागातु व्विदोगातुम्व्वित्त्वागातुमित । मनसस्पत ऽइमन्देव यज्ञं ँ स्वाहा व्वातेधाः-स्वाहा ॥

तत अग्निविसर्जनम्-

गच्छ गच्छ सुरश्रेष्ठ, स्वस्थाने परमेश्वर ॥
यत्र ब्रह्मादयो देवास्तत्रगच्छ हुताशन ! ॥

अथ भस्मिना त्र्यायुषकरणम्-

ॐत्र्यायुषमिति-नारायणऋषिरुष्णिक् छन्दः, शिवोदेवता, त्र्यायुषकरणे—विनियोगः ॥
ॐ त्र्यायुषञ्जमदग्नेरिति—ललाटे,
ॐ कश्यपस्य त्र्यायुषमिति—ग्रीवायाम्,
ॐयद्देवेषु त्र्यायुषमिति-दक्षिणवामबाहुमूले
ॐ तन्नोऽअस्तु त्र्यायुषमिति-हृदि ॥ इति॥

तत, संस्रव प्राशनम् ॥ मार्जनम् ॥ वह्नौ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ ब्राह्मणदक्षिणादानम् ॥ प्रणीताविमोकः ॥ अभिषेकः ॥

❀ अथ शिवपूजनम् ❀

उत्तराऽभिमुखो भूत्वा भस्मत्रिपुण्डविभूषितः कृत सन्ध्यादिनित्यक्रियः आचम्यप्राणानायम्य शान्तिपाठं पठित्वा देशकालौ सङ्कीर्त्य सङ्कल्पं कुर्यात् ॥ आदौ विधिना गणपतिञ्च सम्पूज्य ॥ अथ ध्यानम्--

ध्यायेन्नित्यं सुरेड्यं यतिगतिमतिदं यौगिकाधारमेकमाद्यन्तादिप्रभावं निगमजनिजुषां ध्यानधाराऽवगम्यम् । सोमं सोद्धारमीशं धरणिसुरवरैर्याञ्चया शङ्करं तं, भक्त्युद्रेकाय वर्ग कलयति विदुषां यत्कृपा तं हि शम्भुम् ॥ रुद्रीसंख्याफलं देवि, शृणुष्व वदतो मम । डाकिन्यादिभये प्राप्ते, ह्येकावृत्तिञ्जपेन्नरः ॥ १ ॥
भूतप्रेतपिशाचानां, भये च गुणवृत्तितः ।
ग्रहदोषदशायाञ्च, पञ्चावृत्तिन्न संशयः ॥२॥
ज्वराऽतिसारदोषादौ, वातपित्तकफादिषु ।
सर्वरोगोपशान्त्यर्थं, सप्तावृत्तिं न संशयः॥३॥
सर्वाऽर्थसाधनार्थं वै, नवावृत्तिं पठेन्नरः ।
असाध्यरोगनाशाय, मनोऽभीप्सितकर्म्मणे।४

अपमृत्युविनाशाय तथाऽऽरोग्याय वै पुनः ।
सर्वशान्तिर्भवेत्तत्र,रुद्रावृत्या न संशयः ।।५।।

तत्र देव समीपेऽर्घ्यादिस्थापनं कृत्वा ।। अथ ध्यानम्–

बन्धूकसन्निभंदेवं, त्रिनेत्रं चन्द्रशेखरम् ।
त्रिशूलधारिणंदेवं,चारुहासं सुनिर्मलम् ।।१।।
कपालधारिणं देवं, वरदाभयहस्तकम् ।
उमयासहितं शम्भुन्ध्यायेत्सोमेश्वरं सदा।२।

अथाऽऽवाहनम्–

आयाहि भगवन् शम्भो!शर्व्वंत्वं गिरिजापते।
प्रसन्नो भव देवेश, नमस्तुभ्यं हि शङ्कर ।।

अथाऽऽसनम्–

विश्वेश्वर महादेव, राजराजेश्वर प्रिय ।
आसनं दिव्यमीशान,दास्येऽहं तुभ्यमीश्वर।।

अथ पाद्यम्--

महादेव महेशान, महादेवपरात्पर ।
पाद्यं गृहाण मद्दत्तं, पार्वतीसहितेश्वर ।।

अथाऽर्घ्यम्–

त्र्यम्बकेश सदाचार जगदादि-विधायक ।
अर्घ्यं गृहाह देवेश, साम्ब सर्वार्थदायक ।।

अथाचमनीयम्-

त्रिपुरान्तक दीनार्तिहर श्रीकण्ठशाश्वत।
गृहाणाचमनीयञ्च, पवित्रोदककल्पितम्॥

अथ गोदुग्धस्नानम्-

मधुरं गोपयः पुण्यं, पटपूतं पुरस्कृतम्।
स्नानार्थं देवदेवेश! गृहाण परमेश्वर॥

अथ दधिस्नानम्-

दुर्लभन्दिवि सुस्वादु, दधि सर्वप्रियम्परम्।
तुष्टिदं पार्वतीनाथ!, स्नानाय प्रतिगृह्यताम्॥

अथ घृतस्नानम्-

घृतं गव्यं शुचिःस्निग्धं, सुसेव्यं पुष्टिदायकम्।
गृहाण गिरिजानाथ, स्नानाय चन्द्रशेखर॥

अथ मधुस्नानम्-

मधुरं मृदु मोहघ्नं, स्वरभङ्गविनाशनम्।
महादेवेदमुत्सृष्टं, तव स्नानाय शङ्कर॥

अथ शर्करास्नानम्-

तापशान्तिकरी कान्ता, मधुरा स्वादसंयुता।
स्नानार्थं देवदेवेश! शर्करेयं प्रदीयते॥

अथ शुद्धोदकस्नानम्-

गङ्गा गोदावरी रेवा, पयोष्णी यमुना तथा।

सरस्वत्यादितीर्थानि, स्नानार्थं प्रतिगृह्यताम्।

अथ वस्त्रम्–

वस्त्राणि पट्टकूलानि, विचित्राणि नवानि च।
मयाऽऽनीतानि देवेश ! प्रसन्नो भव शङ्कर॥

इति वस्त्रंसमर्प०। अथोपवीतम्–

सौवर्णं राजतं ताम्रं, कार्पासस्य तथैव च।
उपवीतम्मया दत्तं, प्रीत्यर्थं प्रतिगृह्यताम्॥

इत्युपवीतंसमर्प०। अथ गन्धम्–

सर्वेश्वर जगद्वन्द्य, दिव्यासनसमास्थित।
गन्धं गृहाण देवेश, चन्दनं प्रतिगृह्यताम्॥

इति गन्धंसमर्प०। अथाऽक्षताः [गन्धोपरि शुक्लाक्षतान्]–

अक्षताश्च सुरश्रेष्ठ!, शुभ्रा धौताश्च निर्मलाः।
मया निवेदिता भक्त्या, गृहाण परमेश्वर!॥

इत्यक्षतान्समर्प०। अथ पुष्पाणि–

माल्यादीनि सुगन्धीनि, मालत्यादीनि वै प्रभो।
मयाऽऽहृतानि पूजार्थं, पुष्पाणि प्रतिगृह्यताम्॥

इति पुष्पाणि समर्प०। अथ विल्वपत्राणि–

सुवर्णं विल्वपत्रञ्च, त्रिशूलाकारमेव च।

मयार्पितं महादेव, विल्वपत्रं गृहाण मे ॥

इति विल्वपत्राणि समर्प०। अथ धूपम्--

वनस्पतिरसोत्पन्नो, गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां, धूपोऽयं प्रतिगृह्यताम् ॥

इति धूपम्। अथ दीपमाघ्रापयामि--

आज्याक्तवर्तिसंयुक्तं, वह्निना दीपितन्तुयत्।
दीपं गृहाण देवेश, त्रैलोक्यतिमिरापहम् ॥

इति दीपंदर्शयामि। अथ नैवेद्यम्

अपूयानि च पक्वानि, मण्डकावटकानि च।
पायसं सूपमन्नञ्च, नैवेद्यम्प्रतिगृह्यताम् ॥

इति नैवेद्यंनिवेदयामि। अथाऽऽचमनीयञ्जलम्-

पानीयं शीतलं शुद्धं, गाङ्गेयं महदुत्तमम्।
गृहाण पार्वतीनाथ! तव प्रीत्या प्रकल्पितम् ॥

इत्याचमनीयं समर्प०। अथ करोद्वर्त्तनम्

कर्पूरादीनि द्रव्याणि, सुगन्धीनि महेश्वर।
गृहाण जगदाधार, करोद्वर्तनहेतवे ॥

इति करोद्वर्तनं समर्प०। अथ फलानि--

कूष्माण्डं मातुलिङ्गञ्च, नारिकेलं फलानि च।

गृहाण पार्वतीकान्त, सोमशेखर शङ्कर ॥

इति फलानि समर्पं०। अथ पूगीफलताम्बूलादीनि--

पूगीफलम्महद्दिव्य, नागवल्लीदलैर्युतम् ॥
गृहाण देवदेवेश, द्राक्षादीनि सुरेश्वर ॥

इति पूगीफलादीनि समर्पं०। अथ द्रव्यम्:-

हिरण्यगर्भगर्भस्थं, हेमबीजसमन्वितम् ।
पञ्चरत्नं मया दत्तं, गृह्यतां वृषभध्वज ॥

इति द्रव्यं समर्पं०   अथ नीराजनम्-

अग्निर्ज्योति रविर्ज्योतिर्ज्योतिर्नारायणो वि-
भुः। नीराजयामि देवेश, पञ्चदीपैः सुरेश्वर॥

इति नीराजनं समर्पं०।   अथ पुष्पाञ्जलिः--

हर विश्वाऽखिलाधार, निराधार निराश्रय ।
पुष्पाञ्जलिं गृहाणेश, सोमेश्वर नमोऽस्तु ते॥

इति पुष्पाञ्जलिं समर्पं०।   अथ प्रणाममन्त्रः--

ॐ हेतवे जगतामेव, संसारार्णवसेतवे ॥
प्रभवे सर्वविद्यानां, शम्भवे गुरवे नमः ॥

इति प्रणाममन्त्रः।   अथ सङ्कल्पः--

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो

महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्याद्य श्रीब्रह्मणोऽह्नि द्वितीये प्रहरार्द्धे श्रीश्वेतवाराहकल्पे, वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बुद्वीपे भरतखण्डे भारते वर्षे—

(श्रीसुमेरुदक्षिणपार्श्वेऽलकनन्दामन्दाकिन्योश्चसमीपे वा)

श्री बौद्धावतारे ऽस्मिन्वर्तमाने ऽमुकनामसम्वत्सरे ऽमुकायने ऽमुकर्तौ, तत्राऽप्यमुकमासे ऽमुकपक्षे ऽमुकतिथावमुकनक्षत्रे ऽमुकवासरे ऽमुकामुकराशिस्थितेषु सूर्यचन्द्रभौमबुधगुरुशुक्रशनिराहुकेतु-ग्रहेषु, यथा यथास्थानस्थितेषु सत्सु, एवं गुणविशेषणविशिष्टायां, शुभपुण्यतिथौ, ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं, ममैश्वर्य्याभिवृद्ध्यर्थम्, अप्राप्तलक्ष्म्याः प्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थञ्च, सकलमनोऽभिलाषासिद्ध्यर्थम्, सभायां राजद्वारे वा सर्वत्र यशो विजयलाभादि—प्रा-

त्यर्थमिहजन्मनि जन्मान्तरे च, सकलदु-
रितोपशमनार्थम्, तथा मम–सभार्यस्य
सपुत्रस्य सबान्धवस्याऽखिलकुटुम्बसहित-
स्य सपशोः समस्तभयव्याधिजरापीडा-
मृत्युपरिहारद्वारा – आयुरारोग्यैश्वर्याभि-
वृद्ध्यर्थम्, तथा मम जन्मराशेरखिल-
कुटुम्बस्य वा जन्मराशेः सकाशाद्ये के-
चिद्विरुद्धाश्चतुर्थाऽष्टमद्वादशस्थानसंस्थिताः
क्रूरग्रहास्तैः सूचितं सूचयिष्यमाणञ्च
यत्सर्वाऽरिष्टं तद्विनाशद्वारा लाभस्थान-
स्थितवच्छुभफलप्राप्त्यर्थम्, पुत्रपौत्रादि-
सन्ततेरविच्छिन्नवृद्ध्यर्थम्, सूर्य्यादिग्रहा-
ऽनुकूलतासिद्ध्यर्थम्, तथेन्द्रादि-दशदि-
क्पालदेवताप्रसन्नार्थम्, धर्म्मार्थकाम-
मोक्षफलप्राप्त्यर्थञ्च, श्रीभवानीशङ्कर-
महारुद्रदेवताप्रीत्यर्थम्, 'पुरुषसूक्तेन' अङ्ग-
न्यासादिपूर्वकं, षोडशोपचारैरन्योपचा-
रैश्च सकृद्रुद्राऽऽ वर्त्तनेन (श्रीरुद्रमहारुद्राऽ-

तिरुद्रयागे वाऽभिषेकपूर्वकम्) श्रीशिव-पूजनमहं करिष्ये ॥ ततः षडङ्गन्यासाः—

ॐ मनो जूतीति—मन्त्रस्य बृहस्पति-ॠषिः, बृहस्पतिर्देवता, बृहतीछन्दः, हृदयन्यासे जपे—विनियोगः ॥ ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमि-मन्तनोत्त्वरिष्टं यज्ञᳬसमिमन्दधातु । विव-श्श्वे देवासऽ इह मादयन्तामोँ ३ प्प्रतिष्ठ॥ [ॐहृदयाय नमः]॥१॥ॐ अबोद्ध्यग्निरि-तिमन्त्रस्य बुधगविष्ठिराऋषी, अग्निर्देवता त्रिष्टुप्छन्दः शिरो न्यासे जपे विनियोगः॥ॐ अबोद्ध्यग्निःसमिधा जनानाम्प्रतिधेनुमि-वायतीमुषासम् ।यह्वाऽइव प्प्रवयामुज्जिज-हानाः प्प्रभानवः सिस्त्रतेनाकमच्छ ॥ [ॐ शिरसे स्वाहा]॥२॥ मूर्द्धानमिति—मन्त्र-स्य भरद्वाजऋषिः, अग्निर्देवता, त्रिष्टु-प्छन्दः शिखान्यासे जपे विनियोगः ॥ॐ मूर्द्धानन्दिवोऽ अरतिम्पृथिव्व्या व्वैश्श्वा-

नरमृतऽ आजातमग्निनम् । कवि ँ सम्म्रा-
जमतिथिञ्जनानामासन्नापात्रञ्जनयन्त दे-
वाः॥(ॐ शिखायै वषट्)॥३॥ॐमर्माणि त-
इति मन्त्रस्य अप्रतिरथऋषिर्मर्माणि देवता
विराट्छन्दः,कवचन्यासे जपे विनियोगः ॥
ॐ मर्म्माणि ते व्वर्म्मणा च्छादयामि सो-
मस्त्वा राजामृतेना नुवस्ताम् । उरोर्व्व-
रीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा
मदन्तु ॥ (ॐकवचाय हुम्) ॥४॥ ॐ व्वि-
श्वतश्चक्षुरिति—मन्त्रस्य विश्वकर्मा—भौ-
वनऋषी, विश्वकर्मा-देवता, त्रिष्टुप्छन्दः
नेत्रन्यासे जपे—विनियोगः ॥ ॐ व्विश्व-
तश्चक्षुरुत व्विश्वतोमुखो व्विश्वतो बा-
हुरुत व्विश्वतस्पात् । सम्बाहुभ्यान्धमति
सम्पतत्रैर्द्यावाभूमी जनयन्देवऽ एकः ॥
(ॐ नेत्रत्रयाय—वौषट्)॥ ५ ॥ ॐ मान-
स्तोक इति-मन्त्रस्य परमेष्ठीऋषिः, एक-
रुद्रो देवता जगतीछन्दः 'अस्त्रायफट्'-न्यासे

जपे-विनियोगः ॥ ॐ मा नस्तोके तनये मा नऽआयुषि मानो गोषु मानोऽ अश्श्वेषु रीरिषः । मानो व्वीरान्नुद्द्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ६ ॥ (ॐ अस्त्राय फट्) ॥ इति षडङ्गन्यासाः ॥

❀ अथ विष्णवर्चने पुरुषसूक्तेनांगन्यासाः ❀

ॐसहस्रशीर्षेतिषोडशर्चस्य पुरुषसूक्तस्य नारायणऋषिः, जगद्बीजं पुरुषो-देवता, आद्यानां पञ्चदशानामृचामनुष्टुप्छन्दः, अन्त्यायास्त्रिष्टुप्छन्दः, सर्वासामङ्गन्यासे विनियोगः ॥ हरिः ॐ–सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमि ठँः सर्व्वत-स्स्पृत्वात्त्यतिष्ठद् दशाङ्गुलम् ॥ १ ॥ (इति वामकरे)॥ ॐ पुरुषऽएवेद ठँः सर्व्वं य्यद्भूतँ यच्च भाव्यम् । उतामृतत्वस्येशानो य-दन्नेनातिरोहति ॥२॥ (इति दक्षिणकरे)॥

ॐ एतावानस्य महिमातो ज्ज्यायाँश्च्च पूरुषः । पादोस्य व्विश्श्वा भूतानि त्रिपाद-

स्यामृतन्दिवि ॥ ३ ॥ (इति वामपादे) ॥
ॐत्रिपादूर्द्ध्वऽ उदैत्पुरुषः पादोस्येहाभव-
त्पुनः । ततो व्विष्वङ् व्यक्क्रामत्त्सा शनान-
शनेऽअभि ॥ ४ ॥ (इति दक्षिणपादे) ॥
ॐ ततो व्विराडजायत व्विराजोऽअधि-
पूरुषः। सजातोऽत्त्यरिच्यत पश्चाद्भू-
मिमथो पुरः॥ ५ ॥ (इति वामजानौ)॥
ॐ तस्म्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदा-
ज्ज्यम्। पशूँस्ताँश्चक्क्रे व्वायव्व्या नारण्ण्या
ग्राम्याश्च ये ॥६॥ (इति दक्षिणजानौ) ॥
ॐ तस्म्माद्यज्ञात्सर्व्वहुतऽऋचः सामानि
जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्म्माद्यजुस्त-
स्मादजायत ॥७॥ (इति वामकटयाम्) ॥
ॐतस्म्मादश्श्वाऽ अजायन्त ये के चोभ-
यादतः । गावो ह जज्ञिरे तस्म्मात्तस्म्माज्जा-
ताऽअजावयः ॥८॥(इति दक्षिणकटयाम्)।
ॐतँ य्यज्ञम्बर्हिषि प्प्रौक्षन्न्पुरुषञ्जातम-
ग्ग्रतः । तेन देवाऽ अयजन्त साद्ध्याऽऋषय-

श्चच ये ॥ ९ ॥ (इति नाभौ) ॥

ॐ यत्पुरुषं व्व्यदधुः कतिधा व्व्यकल्पयन्। मुखङ्किमस्स्यासीत् किम्बाहू किमूरू पादा॒ऽ उच्च्येते ॥१०॥ (इति हृदये) ॥

ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्न्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्या ठं॰ शूद्द्रोऽअजायत ॥११॥ [इति कण्ठे] ॥

ॐ चन्द्रमा मनसो जातश्च्चक्षोः सूर्य्योऽअजायत। श्श्रोत्राद्द्वायुश्च्च प्प्राणश्च्च मुखादग्ग्निरजायत ॥१२॥[इति वामबाहौ]

ॐ नाभ्याऽआसीदन्तरिक्षठं॰ शीर्ष्णोद्यौः समवर्त्तत। पद्भ्याम्भूमिर्द्दिशः श्रोत्त्रात्तथा लोकाँ२ऽअकल्प्पयन्।१३।[इति दक्षिणबाहौ]

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्न्वत। व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥१४॥ [इति मुखे] ॥

ॐ सप्प्तास्स्यासन् परिधयस्त्त्रिः सप्तसमिधः कृताः। देवा यद्द्यज्ञन्तन्न्वानाऽअब-

ध्नन्न्पुरुषं पशुम्। १५ ॥ [इत्यक्ष्णोः] ॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्न्यासन्। ते ह्नाकम्महिमानःसचन्त यत्र पूर्व्वे साद्धयाः सन्ति देवाः ॥ १६ ॥ [इति शिरसि] ॥ इत्यङ्गन्यासाः ॥

ॐ शिवार्चनम् ॥ ॐ पञ्चवक्त्राय शिवाय नमः । अथध्यानम्॥ ॐध्यायेन्नित्यं महेशं रजतगिरिनिभञ्चारुचन्द्राऽवतन्सं, रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात्स्तुतमम-रगणैर्व्याघ्रकृत्तिं वसानं,विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ १ ॥

इति शिवं ध्यात्वा षोडशोपचारैः शिवं प्रपूजयेत् ।

तत्राऽऽदौ-शिवाऽऽवाहनम्-

ॐधामच्छदग्ग्निरिन्द्राब्ब्रह्मा देवो बृहस्प्पतिः, सचेतसो व्विश्श्वे देवा यज्ञम्प्रावन्तुनःशुभे॥ ॐ नमःशिवाय,आवाहयामि,स्थापयामि ॥

अथाऽऽसनम्--

ॐ त्वं य्यविष्ठ दाशुषो न्नॄँः पाहि शृणुधी

गिरः । रक्षा तोकमुतत्त्कमना ।। ॐ नमः शिवाय, आसनं समर्पयामि ।।

अथ पाद्यम्--

ॐएतावानस्य महिमातो ज्ज्यायाँश्श्च्च पूरुषः पादोस्य विश्श्वा भूतानि त्रिपादस्यामृतन्दिवि। ॐ नमः शिवाय,पादयोः पाद्यं समर्पयामि।।

अथाऽर्घ्यम्--

ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहा भवत्पुनः। ततो विष्ष्वङ् व्व्यक्क्रामत्सा शनानशनेऽअभि।ॐनमःशिवाय,हस्तयोरर्घ्यं समर्पयामि।

अथाचमनीयम्–

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शँय्योरभिस्स्रवन्तु नः ।। ॐ नमःशिवाय, आचमनीयं समर्पयामि ।।

अथ स्नानम्–

ॐ आपो हिष्ठा मयो भुवस्तानऽ ऊर्ज्जे दधातन। महेरणाय चक्षसे ।। ॐ नमःशिवाय, स्नानीयञ्जलं समर्पयामि ।।

(अथ पञ्चामृत-स्नानमन्त्राः) । अथ पयस्नानम्-

ॐपयः पृथिव्व्याम्पयऽ ओषधीषु पयो दिव्व्य-न्तरिक्षे पयोधाः । पयस्वतीः प्प्रदिशः सन्तु मह्यम्।ॐनमःशिवाय, पयःस्नानं समर्पयामि।

अथ दधि स्नानम्-

ॐ दधि क्क्राब्णोऽ अकारिषञ्जिष्ष्णोरश्श्व-स्य व्वाजिनः । सुरभि नो मुखाकरत्प्रण ऽ आयू ँ षितारिषत् ।। ॐ नमःशिवाय, दधिस्नानं समर्पयामि ।।

अथ घृतस्नानम्-

ॐघृतम्मिमिक्षे घृतमस्य योनिर्ग्घृ ते श्श्रितो घृतम्वस्य धाम । अनुष्ष्वधमावह मादयस्व स्वाहा कृतम्व्वृषभव्वक्षिहव्व्यम् ।। ॐ नमः शिवाय, घृतस्नानं समर्पयामि ।।

अथ मधुस्नानम्-

ॐमधु व्वाताऽ ऋतायते मधु क्षरन्ति सिन्धवः। माद्ध्वीर्न्नः सन्त्वोषधीः । ॐनमः शिवाय, मधुस्नानं समर्पयामि ।।

अथ शर्करास्नानम्-

ॐ अपा ँ रसमुद्द्वयस ँ सूर्य्ये सन्त ँ

समाहितम् । अपाꣳ रसस्य यो रसस्तं व्वो गृह्णाम्म्युत्तममुपयाम गृहीतोसीन्द्द्राय त्त्वा जुष्ट्टङ् गृह्णाम्म्येषते योनिरिन्द्राय त्त्वा जुष्ट्टतमम् ॥ ॐ नमःशिवाय, शर्करास्नानं समर्पयामि ॥

अथ शुद्धोदकस्नानम्-

ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्त ऽ आश्विनाः । श्येतः श्येताक्षोरुणस्स्ते रुद्द्राय पशुपतये कर्ण्णा यामाऽअवलिप्प्ता रौद्द्रा नभोरूपाः पार्ज्जन्न्याः ॥ ॐ नमःशिवाय, शुद्धोदकस्नानीयं समर्पयामि ॥

अथ भस्मधारणम्-

ॐतत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्द्रः प्प्रचोदयात् ॥ ॐ नमःशिवाय भस्मं समर्पयामि ॥

अथ वस्त्रोपवस्त्रम्-

ॐतस्म्माद्यज्ञात्सर्व्वहुतऽऋचःसामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्म्माद्यजुस्तस्म्मादजायत॥ ॐनमःशिवाय,वस्त्रोपवस्त्रे समर्पयामि।

अथ यज्ञोपवीतम्-

ॐयज्ञोपवीतं परमं पवित्रं प्प्रजापतेर्यत्सहजम्पुरस्तात् । आयुष्यमग्ग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्त्वा यज्ञोपवीतेनोपनह्यामि ॥ यज्ञोपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनीयं समर्पयामि ॥ ॐ नमःशिवाय ॥

अथ गन्धम् [चन्दनम्]

ॐ त्वाङ्गन्धर्व्वा ऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः । त्वामोषधे सोमो राजा व्विद्वान्न्यक्ष्मादमुच्च्यत ॥ ॐ नमःशिवाय, गन्धं (चन्दनं) समर्पयामि ॥

अथाऽक्षतान्-

ॐ अक्षन्नमीमदन्त ह्यव प्प्रियाऽअधूषत । अस्तोषतस्व भानवो व्विप्प्रा न विष्ठयामती यो जान्न्विन्द्र ते हरी ॥ ॐ नमःशिवाय, अक्षतान् समर्पयामि ॥

अथ पुष्पाणि-

ॐ यत्पुरुषम्व्व्यदधुःकतिधा व्व्यकल्प्पयन् ।

मुखङ्किमस्यासीत्किम्बाहू किमूरूपादा ऽउ-
च्च्येते। ॐनमःशिवाय, पुष्पाणि समर्पयामि ।

अथ बिल्वपत्राणि-

ॐ शिवो भव प्प्रजाब्भ्यो मानुषीब्भ्यस्त्व-
मङ्गिरः। मा द्यावापृथिवी अभिशोचीर्मान्त-
रिक्षं मा व्वनस्पतीन् ॥ ॐ नमः शिवाय,
[१०८ बिल्वपत्राणि] समर्पयामि ॥

अथ नानासुगन्धिद्रव्याणि

ॐ अहिरिवभोगैः पर्य्येति बाहुञ्जाया हेति-
म्परिबाधमानः। हस्तग्घ्नो विश्श्वा व्वयुना-
नि व्विद्वान्पुमान्पुमा ँ सम्परिपातु विश्-
श्वतः। ॐ नमः शिवाय, नानासुगन्धि-
द्रव्याणि समर्पयामि ॥

❀ अथ शिवाऽऽवरणदेवता-पूजनम् ❀

❀बहिःवृत्तमध्ये पूर्वे-ॐ सद्योजाताय नमः ॥
गन्धाक्षतपुष्पाणि समर्पयामि ॥ १ ॥ दक्षिणे- ॐ
वामदेवाय नमः ॥ गं० समर्पयामि ॥ २ ॥ पश्चिमे-

❀ शिव-प्रधानवेदी पर प्रत्येक नाममन्त्रों के साथ २ शिवजी का ध्यान करता हुआ गन्धाक्षतपुष्प-आदि चढ़ाता जाय।

ॐ अघोराय नमः ॥ गं० समर्पयामि ॥ ३ ॥
उत्तरे-ॐ तत्पुरूषाय नमः ॥ गं० समर्पयामि ॥ ४ ॥
मध्यदले-ॐ ईशानाय नमः ॥ गन्धा० समर्पयामि ।५

* अथाऽष्टदलेषु वृत्तबहिर्भागे पूर्वादिक्रमेण *

पूर्वे-ॐ नन्दिने नमः ॥ गन्धाक्षत पुष्पाणि समर्पयामि ॥ १ ॥ आग्नेय्याम्—ॐ महाकालाय नमः ॥ गं० समर्प० ॥ २॥ दक्षिणे-ॐ गणेशाय नमः ॥ गं० समर्प० ॥ ३ ॥ नैर्ऋत्याम्-ॐ वृषभाय नमः ॥ गं० समर्प० ॥ ४ ॥ पश्चिमे—ॐ भृंगिरिटये नमः ॥ गं० समर्प० ॥ ५ ॥ वायव्याम्-ॐ स्कन्दाय नमः । गं० समर्प० ॥ ६ ॥ उत्तरे-ॐ उमादेव्यै नमः ॥ गं० समर्प० ॥ ७ ॥ ईशान्याम्-ॐ चण्डेश्वराय नमः ॥ गं० समर्प० ॥ ८ ॥ इति प्रथमाऽऽवरणपूजनम् ॥

० अथ षोडशदलेषु वृत्तबहिर्भागे पूर्वादिक्रमेण ०

ॐ अनन्ताय नमः। गन्धाक्षतपुष्पाणि समर्पयामि ।१।
ॐ सूक्ष्माय नमः ॥ गन्धा० समर्प० ॥ २ ॥
ॐ शंकराय नमः ॥ गन्धा० समर्प० ॥ ३ ॥
ॐ एकपदे नमः ॥ गन्धा० समर्प० ॥ ४ ॥
ॐ एकरुद्राय नमः ॥ गन्धा० समर्प० ॥ ५ ॥

ॐ त्रिमूर्त्तये नमः ॥ गन्धा० समर्प० ॥ ६ ॥
ॐ श्रीकण्ठाय नमः ॥ गन्धा० समर्प० ॥ ७ ॥
ॐ वामदेवाय नमः ॥ गन्धा० समर्प० ॥ ८ ॥
ॐ ज्येष्ठाय नमः ॥ गन्धा० समर्प० ॥ ९ ॥
ॐ श्रेष्ठाय नमः ॥ गन्धा० समर्प० ॥ १० ॥
ॐ रुद्राय नमः ॥ गन्धा० समर्प० ॥ ११ ॥
ॐ कालाय नमः ॥ गन्धा० समर्प० ॥ १२ ॥
ॐ कलविकरणाय नमः ॥ गन्धा० समर्प० ॥ १३ ॥
ॐ बलविकरणाय नमः ॥ गन्धा० समर्प० ॥ १४ ॥
ॐ बलाय नमः ॥ गन्धा० समर्प० ॥ १५ ॥
ॐ बलप्रमथनाय नमः ॥ गन्धा० समर्प० ॥ १६ ॥

इति द्वितीयाऽऽवरणपूजनम् ॥

* अथ बहिश्चतुर्बिशति २४ दलेषु पूर्वादिक्रमेण *

ॐ अणिमायै नमः* ॥ १ ॥ ॐ महिमायै नमः । २ ।
ॐ लघिमायै नमः ॥ ३ ॥ ॐ गरिमायै नमः । ४ ।
ॐ प्राप्त्यै नमः ॥ ५ ॥ ॐ प्राकाम्यै नमः । ६ ।
ॐ ईशित्वायै नमः ॥ ७ ॥ ॐ वशित्वायै नमः । ८ ।
ॐ ब्राह्म्यै नमः ॥ ९ ॥ ॐ माहेश्वर्यै नमः ।१०।
ॐ कौमार्यै नमः ॥११॥ ॐ वैष्णव्यै नमः ।१२।

---

* "गन्धाऽक्षतपुष्पाणि समर्पयामि"—इति सर्वत्रपाठः ।

ॐ वाराह्यै नमः ॥१३॥ ॐ महेन्द्राण्यै नमः ॥१४॥ ॐ चामुण्डायै नमः।१५। ॐ चण्डिकायै नमः।१६। ॐ असितांग-भैरवाय नमः ॥१७॥ ॐ रुरुभैरवाय नमः ॥ १८ ॥ ॐ चण्डभैरवाय नमः ॥ १९ ॥ ॐ क्रोधभैरवाय नमः ॥ २० ॥ ॐ उन्मत्तभैरवाय नमः ॥२१॥ ॐ कालभैरवाय नमः ॥ २२ ॥ ॐ भीषण-भैरवाय नमः ॥२३॥ ॐ संहारभैरवाय नमः ॥२४॥ (ॐ नमःशिवाय) गन्धाक्षतपुष्पाणि समर्पयामि ॥ इति तृतीयाऽऽवरण-पूजनम् ॥

* अथ बहिर्द्वात्रिंश ३२ द्दलेषु पूर्वादिक्रमेण *

ॐ भवाय नमः* । १ । ॐ शर्वाय नमः । २ ।
ॐ ईशानाय नमः । ३ । ॐ पशुपतये नमः । ४ ।
ॐ रुद्राय नमः । ५ । ॐ उग्राय नमः । ६ ।
ॐ भीमाय नमः । ७ । ॐ महते नमः । ८ ।
ॐ अनन्ताय नमः । ९ । ॐ वासुकये नमः ।१०।
ॐ तक्षकाय नमः । ११ । ॐ कुलीरकाय नमः ।१२।
ॐ कर्कोटकाय नमः ।१३ । ॐ शंखपालाय नमः ।१४।
ॐ कम्बलाय नमः ।१५ । ॐ अश्वतराय नमः ।१६।
ॐ वैन्याय नमः ।१७ । ॐ पृथवे नमः ।१८।
ॐ हैहयाय नमः ।१९ । ॐ अर्जुनाय नमः ।२०।

* 'गन्धाऽक्षत पुष्पाणि समर्पयामि'—इति सर्वत्रपाठः ।

ॐ शाकुन्तलेयायनमः ।२१। ॐ भरताय नमः ।२२।
ॐ नलाय नमः ।२३। ॐ रामाय नमः ।२४।
ॐ हिमवते नमः ।२५। ॐ निषधाय नमः ।२६।
ॐ विन्ध्याय नमः ।२७। ॐ माल्यवते नमः ।२८।
ॐपारिजाताय नमः ।२९। ॐमलयाय नमः ।३०।
ॐहेमकूटाय नमः ।३१। ॐगन्धमादनाय नमः ।३२।
(ॐनमः शिवाय) गन्धाक्षतपुष्पाणि समर्पयामि ।।
इति चतुर्थाऽऽवरण-पूजनम् ।।

* अथ बहिश्चत्वारिंश ४० द्दलेषु-पूर्वादिक्रमेण *

ॐ इन्द्राय नमः । १ । ॐ अग्नये नमः । २ ।
ॐ यमाय नमः । ३ । ॐ निर्ऋतये नमः । ४ ।
ॐ वरुणाय नमः । ५ । ॐ वायवे नमः । ६ ।
ॐ कुबेराय नमः । ७ । ॐ ईशानाय नमः । ८ ।
ॐ शच्च्यै नमः । ९ । ॐ स्वाहायै नमः ।१० ।
ॐ वाराह्यै नमः । ११ । ॐ खड्गिन्यै नमः ।१२ ।
ॐ वारुण्यै नमः । १३ । ॐ वायव्यै नमः ।१४ ।
ॐ कौबेर्य्यै नमः । १५ । ॐ ईशान्यै नमः ।१६ ।
ॐ वज्रायै नमः । १७ । ॐ शक्तये नमः ।१८ ।
ॐ दण्डाय नमः । १९ । ॐ खंगाय नमः ।२० ।
ॐ पाशाय नमः । २१ । ॐ अङ्कुशाय नमः ।२२ ।
ॐ गदायै नमः । २३ । ॐ त्रिशूलाय नमः ।२४ ।

१०

ॐ ऐरावताय नमः ।२५। ॐ मेषाय नमः ।२६।
ॐ महिषाय नमः ।२७। ॐ प्रेताय नमः ।२८।
ॐ मकराय नमः ।२९। ॐ मृगाय नमः ।३०।
ॐ नराय नमः ।३१। ॐ वृषाय नमः ।३२।
ॐ ऐरावताय नमः ।३३। ॐ पुण्डरीकाय नमः ।३४।
ॐ वामनाय नमः ।३५। ॐ कुमुदाय नमः ।३६।
ॐ अञ्जनाय नमः ।३७। ॐ पुष्पदन्ताय नमः ।३८।
ॐ सार्वभौमाय नमः ।३९। ॐ सुप्रतीकाय नमः ।४०।
(ॐ नमः शिवाय) गन्धाऽक्षतपुष्पाणि-समर्पयामि ॥
इति पञ्चमाऽऽवरण-पूजनम् ॥

※ अथ सम्पूर्णाऽऽवरण-पूजनम् ※

[पद्माद्बहिश्चतुष्कोणेषुभूगृहे१२द्वादशदेवतानाञ्च पूजनम्]

ॐ इन्द्राय नमः । १ । ॐ अग्नये नमः । २ ।
ॐ यमाय नमः । ३ । ॐ निर्ऋतये नमः । ४ ।
ॐ वरुणाय नमः । ५ । ॐ वायवे नमः । ६ ।
ॐ कुबेराय नमः । ७ । ॐ ईशानाय नमः । ८ ।
ॐ विरूपाक्षाय नमः ।९। ॐ विश्वरूपाय नमः ।१०।
ॐ पशुपतये नमः ।११। ॐ ऊर्द्ध्वलिंगाय नमः ।१२।
(ॐ नमः शिवाय) गन्धाऽक्षतपुष्पाणि-समर्पयामि ॥
इति भूगृहाऽन्तराले ॥

* अथ भूगृहाद्बहिर्भागेऽष्ट-देवताऽऽवाहनपूजनञ्च *

ॐ शेषाय नमः । १ । ॐ तक्षकाय नमः । २ ।
ॐ अनन्ताय नमः । ३ । ॐ वासुकये नमः । ४ ।
ॐ शंखपालाय नमः।५ । ॐ महापद्माय नमः । ६ ।
ॐ कम्बलाय नमः । ७ । ॐ कर्कोटकाय नमः । ८ ।
(ॐ नमः शिवाय) गन्धाऽक्षतपुष्पाणि समर्पयामि ॥
इति ॥ यन्मया शिवाऽऽवरण-पूजनं कृतन्तेन श्री-सदा-शिवः प्रीयताम् ॥

अथ धूपम्-

ॐ धूरसि धूर्व्व धूर्व्वन्तं धूर्व्व तँ य्यो-स्म्मान्धूर्व्वतितन्धूर्व्वयं व्वयन्धूर्व्वामः । देवा-नामसि व्वह्नितम ७ सस्नितमम्पप्रितम-ञ्जुष्टतमन्देवहूतमम् ॥ ॐ नमः शिवाय, धूपमाघ्रापयामि ॥

अथ दीपम्-

ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा, सूर्य्यो ज्ज्योतिर्ज्ज्योतिः सूर्य्यः स्वाहा । अ-ग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा, सूर्य्यो व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा ॥ ॐ नमः

शिवाय, प्रत्यक्षाज्यदीपं प्रदर्शयामि ॥

अथ नैवेद्यम्-

ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्रप्रदातारन्तारिष ऊर्जन्नो धेहि द्विपदे चतुष्पदे ॥ ॐ नमःशिवाय, नैवेद्यं निवेदयामि ॥ नैवेद्यं पुरतः कृत्वा, धेनुमुद्रां ग्रासमुद्राञ्च प्रदर्श्य ॐ प्राणाय स्वाहा ॥१॥ ॐ अपानाय स्वाहा॥२॥ ॐ व्यानाय स्वाहा ॥३॥ ॐ समानाय स्वाहा ॥४॥ ॐ उदानाय स्वाहा ॥५॥ नैवेद्यान्ते हस्तप्रक्षालनं मुखप्रक्षालनञ्च समर्पयामि। करोद्वर्त्तनार्थे पुनश्चन्दनं समर्पयामि ॥

अथ ताम्बूलम्--

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्ज्यङ् ग्रीष्म ऽइध्मःशरद्धविः ॥ ॐ नमः शिवाय, मुखशुद्ध्यर्थे लवङ्गपूगीफलयुतं ताम्बूलं समर्पयामि ॥

अथ फलानि-

ॐ याः फलिनी र्याऽ अफलाऽ अपुष्पा

याश्श्च पुष्पिणीः ।। बृहस्पति प्प्रसूतास्ता-
नो मुञ्चन्त्व ँ हसः ।। ॐ नमः शिवाय,
ऋतुफलानि समर्पयामि ।।

अथ दक्षिणामन्त्रः-

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य
जातः पतिरेक ऽ आसीत् । स दाधार पृथि-
वीन्द्यामुतेमाङ्कस्म्मै देवाय हविषा व्विधेम।।
ॐ नमः शिवाय, द्रव्यं दक्षिणाञ्च समर्प-
यामि।।अथ आरार्तिक्यमन्त्रः ।।ॐआ रात्त्रि
पार्थिव ँ रजः पितुरप्प्रायिधामभिः । दिवः
सदा ँ सि बृहती व्वितिष्ठ स ऽ आत्त्वेषं
व्वर्त्तते तमः ।।१।। ॐ इद ँ हविः प्प्रजनन-
म्मे ऽ अस्तु दशवीर ँ सर्व्वगण ँ स्वस्तये ।
आत्क्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभय
सनि ।। अग्ग्निः प्प्रजाम्बहुलाम्मे करोत्वन्न-
म्पयो रेतो ऽ अस्म्मासु धत्त ।। २ । ॐनमः
शिवाय, आरार्त्तिकं समपयामि ।।

अथ प्रदक्षिणा-

ॐ सप्प्तास्यासन्न्परिधयस्त्रिः सप्प्त समिधः

कृताः । देवा यद्यज्ञन्तन्न्वानाऽ अबध्नन्न्पुरुषम्पशुम् ॥ ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्त्ता निषङ्गिणः । तेषा ७ सहस्त्रयोजनेव धन्न्वानि तन्न्मसि ॥ ॐ नमः शिवाय, प्रदक्षिणाञ्च समर्पयामि ।

❀ अथ मन्त्र-पुष्पाञ्जलिः ❀

ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्न्यासन् । ते ह नाकम्महिमानः सचन्त यत्त्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ ॐ राजाधिराजाय प्रसह्य साहिने । नमो व्वयं वैश्रवणाय कुर्महे ॥ स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु ॥ कुबेराय वैश्रवणाय महाराजाय नमः ॥ ॐ स्वस्तिः । साम्राज्ज्यं भौज्ज्यं स्वाराज्ज्यं वैराज्ज्यं पारमेष्ठ्यं राज्ज्यं महाराज्ज्यमाधिपत्यमयं समन्तपर्यायि स्यात्सार्व्वभौमः सार्वाऽयुष आन्तादापरार्धात् पृथिव्व्यै समुद्द्र-पर्य्यन्ताया ऽ एकराडिति,

तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टा-
रो मरुत्तस्यावसन्गृहे । आविक्षितस्य काम-
प्रेर्विश्वेदेवाः सभासद-इति ।। ॐ विश्‍व-
तश्चचक्षुरुत विश्वतोमुखो व्विश्वतो बाहु-
रुत व्विश्वतस्पात् । सम्बाहुभ्यान्धमति
सम्पत त्रैर्द्यावा भूमी जनयन्देव ऽ एकः ।।
ॐ तत्पुरुषाय विद्महे, महादेवाय धीमहि,
तन्नो रुद्रः प्रचोदयात् ।। ॐ नमः शिवाय
साङ्गाय सपरिवाराय 'मन्त्र—पुष्पाञ्जलिं'
समर्पयामि ।। ध्यायामीति ।।

❀ अथ स्वामिकार्त्तिक-पूजनम् ❀

ॐ षण्मुखाय स्वामिकार्तिकाय नमः ।
ॐ यदक्क्रन्दः प्रथमञ्जायमान ऽउद्यन्त्स-
मुद्द्रा दुतवापुरीषात् । श्येनस्य पक्षा हरि-
णस्य बाहू ऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन्।।
ॐ षण्मुखाय नमः ।।

ततः पाद्यादिभिः सम्पूज्य ध्यायेत्–

ॐ अर्चिष्मन्ति विदार्य वक्त्र—कुहरा-

व्यासृक्किता वासुकेरङ्गुल्या विषकर्बुरान्ग-
णयतः संस्पृश्य दन्ताङ्कुरान्। एकं त्रीणि च
सप्त पञ्च षडितिप्रध्वस्तसंख्याक्रमा वाचः
क्रौञ्चरिपोः शिशुत्वविकला,श्रेयांसि पुष्ण-
न्तु वः॥अनया पूजया षण्मुखः प्रीयतामिति।

अथ नन्दीश्वरपूजनम्

ॐ शिववाहनाय वृषभाय श्रीनन्दीश्वराय
नमः॥ॐ प्र तु व्वाजी कनिक्रदन्नानदद्रा-
सभः पत्वा। भरन्नग्निम्पुरीष्यम्मापाद्या-
युषः पुरा॥वृषाग्निम्वृषणम्भरन्नपाङ्गर्भ ॅ
समुद्रियम्। अग्नऽआयाहि व्वीतये॥
ॐ नन्दिने नमः॥

ततः पाद्यादिभिः सम्पूज्य "ध्यायेत्"-

ॐ कण्ठालङ्कारघण्टाघणघणरचिताध्मात-
रोदःकटाहः,कण्ठे कालाऽधिरोहोचितघनसु-
भगं भावुकस्निग्धपृष्ठः। साक्षाद्धर्मो वपुष्मान्
धवलककुदनिर्धूतकैलासकूटः,कूटस्थो वःककु-
द्मान्निविडतरतमः स्तोमतृण्यां वितृण्यात्॥

अनेन पूजनेन श्रीनन्दीश्वरः प्रीयताम् ॥

❀ अथ नवरात्रपूजा-विधिः ❀

प्रतिपदि प्रारम्भदिने प्रातः कृताभ्यङ्गस्नानः कुङ्कुमचन्दनादिना कृतत्रिपुण्ड्रो धृतपवित्रः सपत्नीकः सूर्योदयाद्दशघटिकामध्येऽभिजिन्मुहूर्ते वा कलशस्थापनार्थं शुद्धमृदा वेदिकामेकां विरच्य, तत्र पञ्चपल्लवदूर्वाफलताम्बूलकुङ्कुमपुष्पधूपादीन् सम्भारान् पूजास्थले संस्थापयेत् । पुनर्हस्ते जलाक्षतपुष्पाण्यादाय, देशकालौ संकीर्त्य, प्रधानसङ्कल्पं कुर्यात्-

ॐ अद्येत्यादि० अमुक-गोत्रोऽमुकशर्माऽहं ममेहजन्मनि सर्वापच्छान्तिपूर्वकं, दीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभ - शत्रुपराजयादिसदभीष्टसिद्धये, धर्मार्थकाममोक्षेति चतुर्विधपुरुषार्थसिद्ध्यर्थम्, श्रीजगदम्बादुर्गाप्रीतयेऽद्य शारदीयनवरात्रे प्रतिपदि विहितं कलशस्थापनं, श्रीदुर्गा—पूजनपूर्वकं श्रीचण्ड्याः सप्तशती—पाठं, कुमारीपूजाद्युत्सवाख्यं कर्म करिष्ये । तत्रादौ निर्विघ्नकार्यसिद्ध्यर्थं श्रीगणपतिपूजनं, पुण्याहवाचनं,

करिष्यमाणचण्डीसप्तशतीजपाद्यार्थं ब्राह्मण-वरणञ्च करिष्ये ॥ इति सङ्कल्पः ॥

तत्राऽऽदौ स्वस्तिवाचनं कृत्वा-"ॐ सुमुखश्चेत्यादि,० स्मरणपूर्वकं गणपतिपूजनं विधाय, पुण्याहवाचनं कुर्य्यात् । ततो गन्धपुष्पवस्त्राङ्गुलीयकमादाय, देशकालौ सङ्कीर्त्य-

ॐ अद्य शरत्कालिकदुर्गापूजनपूर्वकं श्रीमार्कण्डेयपुराणोक्तचण्डी-सप्तशतीपाठकरणार्थममुकगोत्रममुकशर्माणं ब्राह्मणं त्वामहं वृणे। "ॐ वृतोऽस्मीति"-प्रतिवचनम् ॥

इति ब्राह्मणवरणं कृत्वा गन्धादिभिः सम्पूजयेत् ।

❀ अथ सर्वतोभद्र-मण्डलदेवतापूजनम् ❀

अथ प्रधानवेद्यां नाममन्त्रैर्ब्रह्मादि-षट्पञ्चाशत् ५६ सर्वतोभद्रमण्डल-देवतानामावाहनं स्थापनञ्च । तद्यथा-

—मध्ये कर्णिकायाम्-ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावा० स्थापयामि ॥ १ ॥ उत्तरे वाप्याम्-ॐ भू० सोमाय नमः सोममावा० स्थाप० ॥ २ ॥ ऐशान्यां खण्डेन्दौ-ॐ भू० ईशानाय नमः । ईशानमावा० स्थाप० ॥ ३ ॥ पूर्वे वाप्याम्-ॐ भू० इन्द्राय नमः । इन्द्रमावा स्थाप० ॥ ४ ॥ आग्नेय्यां खण्डेन्दौ ॐ भू० अग्नये नमः । अग्निमावा० स्थाप० ॥५॥

दक्षिणे वाप्याम्-ॐ भू० यमाय नमः । यममावा० स्थाप० ॥६॥ नैर्ऋत्यां खण्डेन्दौ-ॐ भू० निर्ऋतये नमः । निर्ऋतिमावा० स्थाप० । ७ । पश्चिमे वाप्याम्-ॐ भू० वरुणाय नमः । वरुणमावा० स्थाप० ॥ ८ ॥ वायव्यां खण्डेन्दौ-ॐ भू० वायवे नमः । वायुमावा० स्थाप० ॥ ९ ॥ वायुसोमयोर्मध्ये भद्रे-ॐ भू० अष्टवसुभ्यो नमः । अष्टवसूनावा० स्थाप० ॥१०॥ सोमेशानयोर्मध्ये भद्रे ॐ भू० एकादश रुद्रेभ्यो नमः । एकादशरुद्रनावा० स्थाप० ।११। ईशानेन्द्रमध्ये भद्रे-ॐ भू० द्वादशाऽऽदित्येभ्यो नमः । द्वादशाऽऽदित्यानावा० स्थाप० ॥१२॥ इन्द्राऽग्निमध्ये भद्रे ॐ भू० अश्विभ्यां नमः । अश्विनावावा० स्थाप० ॥ १३ ॥ अग्नियम-मध्ये भद्रे-ॐ भू० सपैत्रिकविश्वेभ्यो देवेभ्यो नमः । सपैत्रिकविश्वान्देवानावा० स्थाप० ॥ १४ ॥ यमनिर्ऋतिमध्ये भद्रे-ॐ भू० सप्त-यक्षेभ्यो नमः । सप्तयक्षानावा० स्थाप० ॥१५॥ निर्ऋतिवरुणयोर्मध्ये भद्रे-ॐ भू० अष्टकुलनागेभ्यो नमः । अष्टकुलनागानावा० स्था० ॥ १६ ॥ वरुणवायोर्मध्ये भद्रे-ॐ भू० गन्धर्वाऽप्सरोभ्यो नमः । गन्धर्वाऽप्सरसः, आवा० स्थाप० ॥ १७ ॥ ब्रह्मसो-

मयोर्मध्ये वाप्याम्-ॐ भू० स्कन्दाय नमः। स्कन्द-मावा० स्थाप० ॥१८॥ स्कन्दादुत्तरे-ॐ भू०नन्दिने-नमः । नन्दिनमावा० स्थाप० ॥ १९ ॥ नन्दिके-श्वरादुत्तरतः-ॐ भू० शूलमहाकालाभ्यां नमः। शूलमहाकालावावाह० स्थाप० ॥ २० ॥ ब्रह्मेशान-योर्मध्ये वल्ल्याम् ॐ भू०दक्षादि-सप्तगणेभ्यो नमः। दक्षादि सप्तगणानावा० स्थाप० ॥ २१ ॥ ब्रह्मेन्द्र-मध्ये वाप्याम्-ॐ भू० दुर्गायै नमः । दुर्गामावा० स्थाप० ॥२२॥ दुर्गायाः पूर्वे ॐ भू० विष्णवे नमः। विष्णुमावा० स्थाप० ॥ २३ ॥ ब्रह्माऽग्निमध्ये वल्ल्याम्-ॐ भू० स्वाधायै नमः। स्वधामावा० स्थाप० ॥ २४ ॥ ब्रह्मयममध्ये वाप्याम्-ॐ भू० मृत्युरोगाभ्यां नमः । मृत्युरोगावावा० स्थाप० ॥ २५ ॥ ब्रह्मनिर्ऋतिमध्ये वल्ल्याम्-ॐ भू० गणे-शाय नमः ॥ गणेशमावा० स्थाप० ॥ २६ ॥ ब्रह्मवरुणमध्ये वाप्याम्-ॐ भू० अद्भ्यो नमः ॥ अप आवा० स्थाप० ॥२७॥ ब्रह्मवायुमध्ये वल्ल्याम्-ॐ भू० मरुद्भ्यो नमः। मरुतः आवा० स्थाप० ॥२८॥ ब्रह्मणः पादमूले कर्णिकाधः-ॐ भू० भूम्यै नमः। भूमिमावा० स्थाप० ॥२९॥ ब्रह्मणः पाद

मूले कर्णिकाधः-ॐ भू० गंगादिनदीभ्यो नमः। गंगादिनदीः आवा० स्थाप० ॥ ३० ॥ ब्रह्मणः पाद-स्थले गंगाद्युत्तरे-ॐ भू० सप्तसागरेभ्यो नमः ॥ सप्तसागरानावाह० स्थाप० ॥ ३१ ॥ पद्मे कर्णि-कोपरि-ॐ भू० मेरवे नमः मेरुमावा० स्थाप० ॥३२॥

अथ मण्डलबाह्ये श्वेतपर धावुत्तरादिक्रमेणायुध-
देवताऽऽवाहनं स्थापनञ्च-

(१) ॐ गदायै नमः ॥३३॥ (२) ॐ त्रिशू-लाय नमः ॥३४॥ (३) ॐ वज्राय नमः ॥३५॥ (४) ॐ शक्तये नमः ॥३६॥ (५) ॐ दण्डाय नमः ॥३७॥ (६) ॐ खंगाय नमः ॥३८॥ [७] ॐ पा-शाय नमः ।३९॥ [८] ॐ अंकुशाय नमः ॥४०॥

अथ मण्डलबाह्ये रक्तपरधौ, उत्तरादिक्रमेणा-
ऽष्टदेवताऽऽवाहनं स्थापनञ्च-

[१] ॐ गौतमाय नमः ॥४१॥ [२] ॐ भरद्वा-जाय नमः ॥ ४२ ॥ [३] ॐ विश्वामित्राय नमः ॥ ४३ ॥ [४] ॐ कश्यपाय नमः ॥ ४४ ॥ [५] ॐ जमदग्नये नमः ॥४५॥ [६] ॐ वसिष्ठाय नमः ॥४६॥ [७] ॐ अत्रये नमः ॥ ४७ ॥ [८] ॐ अरुन्धत्यै नमः ॥४८॥

अथ मण्डलबाह्ये श्यामपरधौ पूर्वादिक्रमेणाऽष्ट-
देवताऽऽवाहनं स्थापनञ्च

[१] ॐ ऐन्द्र्यै नमः ॥४९॥ [२] ॐ कौमार्य्यै नमः ॥५०॥ [३] ॐ ब्राह्म्यै नमः ॥५१॥ [४] ॐ वाराह्यै नमः ॥ ५२ ॥ [५] ॐ चामुण्डायै नमः ॥ ५३ ॥ [६] ॐ वैष्णव्यै नमः ॥ ५४ ॥ [७] ॐ माहेश्वर्यै नमः ॥५५॥ [८] ॐ वैनायक्यै नमः ॥५६॥ इति-देवानावाह्य संस्थाप्य च–"ॐ मनोजूति०" "ॐ एष वै प्रतिष्ठा०"- इति द्वाभ्यां मन्त्राभ्यां प्रतिष्ठापनं कृत्वा पाद्यादिभिः षोडशोपचारैश्च पूजनं कुर्यात् ॥ इति-सर्वतोभद्रमण्डलस्थदेवतापूजनम् ॥

❀ अथ देव्याः प्रधानकलश-पूजनम् ❀

ततो विप्रः । ॐ 'भूरसि भूमिरसीतिमन्त्रेण'-यज्ञभूमिं स्पृशेत्-

ॐ भूरसि भूमिरस्यदितिरसि व्विश्वधाया व्विश्वस्य भुवनस्य धर्त्री । पृथिवीँ य्यच्छ पृथिवीन्दृ ᳪ ह पृथिवीम्माहि ᳪ सीः॥

तत्र कलशे यवप्रक्षेपः-

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्ब्राह्मणस्त ᳪ राजन्पारयामसि।

पुनःकलश-स्थापनम्-ॐ आ जिघ्र कलशम्०।

तत्र जलपूरणम्-ॐ वरुणस्योत्तम्भनमसि०। तत्र गन्धप्रक्षेपः-ॐ त्वाङ्गन्धर्वा ऽअखनँस्त्वा० धान्यप्रक्षेपः-ॐ धान्न्यमसि धिनुहि देवान्०। सर्वौषधी प्रक्षेपः-ॐ या ऽओषधीः पूर्व्वाजाता० दूर्वा-प्रक्षेपः-ॐ काण्डात्काण्डात्प्ररोहन्ती०॥ पञ्चपल्लव-स्थापनम्-ॐ अश्वत्थेवोनिषद०। सप्तमृत्तिका-प्रक्षेपः-ॐ स्योना पृथिवी नो-भवानृक्षरा० ॥ फल-प्रक्षेपः-ॐ-याः फलि-नीर्य्या ऽअफला ऽ० ॥ पञ्चरत्न-प्रक्षेपः-ॐ परिवाजपतिः कविरग्गिन० ॥ हिरण्यप्रक्षेपः-ॐ हिरण्यगर्भःसमवर्त्तताग्ग्रे भूतस्य जातः०।

वस्त्रेण यज्ञसूत्रेण वाऽऽवेष्टनम्-

ॐ युवासुवासाः परिवीतऽआगात्सऽ० ॥ पूर्णपात्रम्-ॐ पूर्णादर्व्विपरापत सुपूर्ण्णा०॥ तत्र च वरुणमावाहयेत्-ॐ तत्त्वायामि ब्रह्मणा व्वन्दमा० ॥ ॐ भूर्भुवः स्वः । अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि, स्थापयामि ॥ प्रतिष्ठा-

पनम्-ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य० । ॐ वरुण ! सुप्रतिष्ठितो वरदो भव । ॐ भूर्भुवः स्वः वरुणाय नमः ॥

पाद्यादिभिः सम्पूज्य प्रार्थयेत्-

ॐ नमो नमस्ते स्फटिकप्रभाय, सुश्वेतहाराय सुमङ्गलाय । सुपाशहस्ताय झषासनाय, जलाधिनाथाय नमो नमस्ते ॥१॥

ततः कलशोपरि स्वर्णमयीं दुर्गाप्रतिमामग्न्युत्तारण-प्राणप्रतिष्ठापूर्वकञ्च पञ्चामृतेन च स्नापयित्वा षोडशोपचारैः सम्पूज्य संस्थापयेत् ।

❀ अथ प्राणप्रतिष्ठा-प्रयोगः ❀

अथाऽग्न्युत्तारण-प्राणप्रतिष्ठासंकल्पः-

ॐ अद्येत्यादि० देशकालौ सङ्कीर्त्य—अस्याः स्वर्णमूर्त्तेरग्नितपनताडनावघातादिदोषनिवारणार्थं, देवता-सान्निध्यत्वसिद्धये, अग्न्युत्तारणं प्राणप्रतिष्ठाञ्च करिष्ये ॥

इतिसंकल्प्य मूर्ति घृतेनाभ्यज्य पात्रे संस्थाप्य, तदुपरि पयमिश्रितजलधारां पातयेत् ॥ तत्र मन्त्रो यथा-

ॐसमुद्रस्य त्वावकयाऽग्ने परिव्ययामसि।

पावको ऽअस्तभ्भ्य ँ शिवो भव ॥ १ ॥ ॐ हिमस्य त्वा जरायुणाग्ग्ने परिव्ययामसि । पावको ऽअस्मभ्भ्य ँ शिवो भव ॥ २ ॥ ॐ उप ज्मन्नुप वेतसेवतर नदीष्ष्वा । अग्ग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो यज्ञम्पावकवर्ण ँ शिवङ्कृधि ॥ ३ ॥

इत्यग्न्युत्तारणम् । अथ प्राणप्रतिष्ठा-

ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्म-विष्णुरुद्रा ऋषयः,ऋग्यजुःसमानि छन्दांसि क्रियामयं वपुः, पराप्राणशक्तिर्देवता, ॐ 'आम्'-बीजम्,ॐ'ह्रीम्, शक्तिः,ॐ''क्रोम्'' -कीलकम्, अस्यां स्वर्णप्रतिमायां प्राणप्रति-ष्ठापने विनियोगः ॥

अङ्गुष्ठमध्यमाऽनामिकाभिः मूर्ति स्पृष्ट्वा जपेत्-

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों,ॐ क्षं सं हं सः ह्रीं,ॐ आं ह्रीं क्रों,अस्याः देव्याः स्वर्णप्रतिमायां प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों, ॐ क्षं सं हं

सः ह्रीं, ॐ आं ह्रीं क्रों, अस्याः देव्याः स्वर्णप्रतिमायां जीवा इह स्थिताः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों, ॐ क्षं सं हं सः ह्रीं,ॐ आं ह्रीं क्रों,अस्याः देव्याः स्वर्ण प्रतिमायां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि, इहैवागत्य, सुखं चिरँस्तिष्ठन्तु स्वाहा ॥ ओङ्कारमन्त्रस्य १५ पञ्चददशावृत्तीः कुर्यादिति ॥

अथ प्रतिष्ठापनम्-

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनो त्वरिष्टट्टं यज्ञ ँ समिमन्दधातु । विश्श्वे देवासऽ इह मादयन्ता मों ३म्प्रतिष्ठ ॥ १ ॥ ॐएस वै प्रतिष्ठा नाम यज्ञो यत्त्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रतिष्ठितम्भवति ॥ सुप्रतिष्ठिता वरदा भव ॥

अथ नेत्रोन्मीलनम्-

ॐ व्वृत्रस्यासि कनीनकश्चक्षुर्दाऽ असिचक्षुर्म्मे देहि ॥

पुनः संस्कारसिद्धये षोडश-प्रणवावृत्तीः कुर्यात् ॥ मूर्ति पञ्चामृतैः स्नात्वा यथा विधिः सम्पूजयेत्। इति प्राण प्रतिष्ठा-विधिः।

❀ अथ श्रीदुर्गापूजा-विधिः ❀

ॐ अद्येत्यादि० देशकालौ सङ्कीर्त्या ऽमुकगोत्रोऽमुकनामशर्माहं, मम (यजमानस्य वा) विपुलविभूतिकामः षोडशोपचारैः श्रीदुर्गापूजां करिष्ये ॥ इति सङ्कल्पः ॥

अथ ध्यानम्-

ॐ जयन्ती मङ्गला काली, भद्रकालीकपालिनी।
दुर्गा क्षमा शिवा धात्री, स्वाहा स्वधा नमोऽस्तु ते ।१। आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि।
पूजां गृहाण सुमुखि, नमस्ते शङ्करप्रिये! ॥२॥

इत्यावाह्य "श्रीसूक्तेन" षोडशोपचारैः सम्पूजयेत् ❋

❋ अथ देव्याः षोडशोपचार पूजनम् ❋

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १ ॥

इत्याऽऽवाहनम् ॥ १ ॥

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

इत्याऽऽसनम् ॥ २ ॥

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम् ॥ ३ ।
इतिपाद्यम् ॥ ३ ॥
ॐ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं
तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां, तामि-
होपह्वये श्रियम् ॥ ४ ॥
इत्यर्घ्यम् ॥ ४ ॥
ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके
देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं
प्रपद्ये अलक्ष्मीर्म्मेंनश्यतां त्वां वृणोमि ॥ ५ ॥
इत्याचमनं, पञ्चामृतम् ॥ ५ ॥
ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव
वृक्षो ऽथ विल्वः । तस्य फलानि तपसा नुदन्तु
मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥
इतिशुद्धजलेन-गङ्गोदकेनवा स्नानम् ॥ ६ ॥ [इसके पश्चात्
पञ्चोपचार-पूजन करके देवीजीका अभिषेक करे ।]
ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मिराष्ट्रे ऽस्मिन्कीर्ति मृद्धि ददातु मे ।७।
इति वस्त्रयुगलम् ० आच० ॥ ७ ॥
ॐ क्षुत्पिपासामलांज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिञ्च सर्वां निर्णुद मे गृहात् ॥८॥
इति-यज्ञोपवीतम् , आच० सम० ॥ ८ ॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
इति चन्दनम् ॥ ९ ॥
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ।
इति पुष्पाणि समर्पं०
ॐ कर्द्दमेन प्रजा भूता मयि सम्भव कर्द्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥
इति धूपम् । ११ ।
ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥
इति दीपम्० ॥१२।
ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥
इति नैवेद्य समर्पं० ॥ १३ ॥
ॐ आर्द्रां यस्करिणीं यष्टिं, सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥
इति फलम् ताम्बूलञ्च ॥ १४ ॥
ॐ तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥
इति दक्षिणानीराजनमन्त्रपुष्पाञ्जलिञ्च समर्पयामि ॥१५॥
ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।

सूक्तं पञ्चदशर्चञ्च श्रीकामः सततं जपेत् । १६ ।।

इति नमस्कारं समर्पयामि ।१६ । ततः प्रार्थयेत् ।।

अथ प्रार्थना-

ॐ देवि प्रपन्नार्तिहरे प्रसीद, प्रसीद मातर्जगतोऽखिलस्य । प्रसीद विश्वेश्वरि पाहि विश्वं, त्वमीश्वरी देवि चराचरस्य ।। ॐ मन्त्रहीनं क्रिया-हीनं भक्तिहीनं सुरेश्वरि । यत्पूजिता मया देवि ! प्रसन्ना भव सर्वदा ।। महिषघ्नि महामाये, चामुण्डे! मुण्डमालिनि । यशो देहि धनं देहि, सर्वान्कामाँश्च देहि मे ।।

इति प्रार्थ्य चण्डीपाठंकुर्य्यात ।। तत्रादौ संकल्पः-

ॐ अद्येत्यादि देशकालौसङ्कीर्त्याऽमुकगोत्रोत्पन्नो ऽमुकनाम शर्म्माऽहं, मम(यजमानस्य वा) अतुलविभूतिकामः श्रीदुर्गाप्रीत्यर्थं कवचाऽर्गलाकीलकसहितं श्रीमार्कण्डेयपुराणीयम्–"ॐ सावर्णिः सूर्य्य तनय० इत्यारभ्य, सावर्णिर्भविता मनुरित्यन्तं" देवीसूक्त-नवार्णमन्त्रजपरहस्यत्रयपठनान्तञ्च देवीमाहात्म्यपाठमहं करिष्ये ।।

ततः शुद्धासनादिकं विधाय, आधारे ऽन्यहस्तलिखित पुस्तकं स्थापयित्वा ।

'ॐ नारायणं नमस्कृत्य०

प्रणवमुच्चार्य्य, *ग्रन्थार्थंबुध्यमानः स्पष्टाक्षरं नातिशीघ्रं नातिमन्दं रसभावस्वरयुत वाचयेत् । अध्यायं समाप्य विरमेन्नतु मध्ये । ततः कुमारी पूजनं, पारणादिने कूष्माण्डादि बलिदानञ्च कुर्य्यात् ॥ इति नवरात्रिपूजनम् ॥

❀ दुर्गा पूजनम् ❀

पीठन्यासान् विधाय केशरेषु मध्ये च पीठशक्तीर्विन्यसेत । तद्यथा [शाक्तप्रमोदे]-

ॐ आं'-प्रभायै नमः ॥ 'ॐ ईं'-मायायै नमः ॥ 'ॐ ऊं' जयायै नमः ॥ 'ॐ एं' सूक्ष्मायै नमः ॥ 'ॐ ऐं-विशुद्धायै नमः॥ 'ॐ ओं' नन्दिन्यै नमः ॥ 'ॐ औं' सुप्रभायै नमः ॥ 'ॐ अं' विजयायै नमः ॥ 'ॐ अः' सर्वसिद्धिदायै नमः ॥ तदुपरि-'ॐ वज्रनखदंष्ट्राऽऽयुधाय महासिंहासनाय हूँ फट् नमः' इति सम्पूजयेत् । तत ऋष्यादि न्यासः ॥

---

* गीती शीघ्री शिरः कम्पी, तथा लिखितवाचकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः ॥ मन्त्रपुटं बीजपुटं, दुर्गास्तोत्रं पठेत्सदा । मन्त्रबीजपुटादुर्गा कामनासिद्धिदा भवेत् ॥

शिरसि—'ॐ नारदऋषये नमः'। मुखे—'ॐ गायत्रीछन्दसे नमः'। हृदि—'ॐ दुर्गादेवतायै नमः'॥ ततः कराङ्गन्यासः-

ह्रां ॐ ह्रीं दुं दुर्गायै अंगुष्ठाभ्यां नमः ॥१॥
ह्रीं ॐ ह्रीं दुं दुर्गायै तर्ज्जनीभ्यां स्वाहा।२॥
ह्रूं ॐ ह्रीं दुं दुर्गायै मध्यमाभ्यां वषट्॥३॥
ह्रैं ॐ ह्रीं दुं दुर्गायै अनामिकाभ्यां हुम्॥४॥
ह्रौं ॐ ह्रीं दुं दुर्गायै कनिष्ठिकाभ्यांवौषट्।५।
ह्रः ॐ ह्रीं दुं दुर्गायै करतलकरपृष्ठाभ्यांफट्।६

एवं हृदयादिन्यासः-

ह्रां ॐ ह्रीं दुं दुर्गायै हृदयाय नमः ॥ १ ॥
ह्रीं ॐ ह्रीं दुं दुर्गायै शिरसे स्वाहा ॥ २ ॥
ह्रूं ॐ ह्रीं दुं दुर्गायै शिखायै वषट् ॥ ३ ॥
ह्रैं ॐ ह्रीं दुं दुर्गायै कवचाय-हुम् ॥ ४ ॥
ह्रौं ॐ ह्रीं दुं दुर्गायैनेत्रत्रयाय वौषट् ॥ ५ ॥
ह्रः ॐ ह्रीं दुं दुर्गायै अस्त्राय—फट् ॥ ६ ॥

इति षडंगादिन्यासः ॥

नमस्कारवियुक्तेन मूलमन्त्रेण देशिकः।

ह्रीमाद्यैः सह कुर्वीत,षडङ्गानि यथाविधिः ।।

अथ ध्यानम्-

ॐ सिंहस्थां शशिशेखरां मरकतप्रख्यै-श्चतुर्भिर्भुजैः । शंखञ्चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।।अमुक्ताङ्गदहारकङ्कणरणत्काञ्चीक्वणन्नू पुरा दुर्गा दुर्गतिहारिणी भवतु नो, रत्नोल्लसत्कुण्डला ।।१।। इति ।।

एवन्ध्यात्वा मानसोपचारैः सम्पूज्य, शङ्खस्थापनं कुर्य्यात् । ततः पीठपूजां कुर्य्यात् । केशरेषु मध्ये च-

ॐ आं प्रभायै नमः।। ॐ ईं मायायै नमः ।।
ॐ ऊँ जयायै नमः ।। ॐ एं सूक्ष्मायै नमः।।
ॐ ऐं विशुद्धायै नमः।। ॐ ओं नन्दिन्यै नमः ।।
ॐ औं सुप्रभायै नमः।ॐ अं विजयायै नमः।
ॐ अः सर्वसिद्धिदायै नमः ।। तदुपरि–
"ॐ बज्रनखदंष्ट्राऽऽयुधाय महासिंहासनाय हुम्फट् नमः"। दद्यादासनमेतेन,मूर्ति मूलेन कल्पयेत्।। [शाक्तप्रमोदे] ।।

(ततः पुनर्ध्यात्वाऽ वाहनादि-पञ्चपुष्पाञ्जलिदान-

पर्यन्तस्विधायाऽऽवरणपूजामारभेत्) अग्निनैर्ऋतिवाय्वीशान-कोणमध्ये दिक्षु च ॥

" ह्रां ॐ ह्रीं दुं दुर्गायै हृदयाय नमः ॥"

इत्यादिना सम्पूजयेत् ॥ ततः पत्रेषु पूर्वादिक्रमेण-

ॐजं जयायै नमः।१।ॐविं विजयायै नमः।२

ॐकिं कीर्त्यै नमः।३।ॐ पं प्रीत्यै नमः।४।

ॐपं प्रभायै नमः।५।ॐ शुं शुद्धायै नमः।६।

ॐमं मेधायै नमः।७।ॐ शं श्रुत्यै नमः।८।

पुनः पत्राग्रेषु-

ॐलं खड्गाय नमः।१।ॐवं खेटकाय नमः।२

ॐशं वाणाय नमः।३।ॐषं धनुषे नमः।४।

ॐ सं शूलाय नमः।५।ॐहुं तर्ज्जन्यै नमः।६।

ततस्तद्बहिरिन्द्रादिवज्रादींश्च पूजयेत् । ततो धूपादिविसर्ज्जनान्तं कर्म समापयेत् । अथ बलिदानमन्त्रः-

एह्येहि पदद्वन्दं मदीयञ्च बलिं देवि ललाय-कपदद्वयं साधय द्वितीयं ब्रूयात् खादय द्वितीयं पुनः सर्वसिद्धिपदं देवी ततःस्वाहा पदम्भवेत्। बलिदानस्यमन्त्रोऽयं,मन्त्रिण्या परिकीर्त्तितः।

अस्य च पुरश्चरणमष्टलक्षजपः । अष्टसहस्रतिलैर्होमः ।

तथा च 'वसुलक्षं जपेन्मन्त्रं, तत्सहस्रतिलैः सह'-इत्यादि।

(प्रार्थना) ध्यानम्-

सिंहस्कन्धसमारूढां, नानालङ्कारभूषिताम्।
चतुर्भुजां महादेवीन्नागयज्ञोपवीतिनीम्।१।
रक्तवस्त्रपरीधानाम्बालार्कसदृशीतनुम्।ना-
नारदाद्यैर्मुनिगणैः सेविताम्भवगेहिनीम्।२।
(अथमन्त्रः)।ॐ ह्रीं दुं दुर्गायै नमः ।। इति ।।

❀ अथ श्रीकाली-संक्षिप्तपूजाविधिः ❀

तत्राऽर्घपात्राद्यासादनम्। कर्त्ता स्ववामभागे भूपुरात्मकं त्रिकोणवृत्तं मण्डलं चतुरस्रं वा लिखित्वा, तत्र-

'ॐ ह्रः-इत्यर्घ्यं स्थापयामि'

इति भूमौ पुष्पाक्षतान्प्रक्षिप्य, तत्र-

ॐ आधारशक्तिभ्यो नमः'

इतिसम्पूज्य तत्रार्घपात्रं त्रिपादिकोपरि संस्थाप्य-

ॐ श्रीमहाकाल्यै नमः'

इत्यर्घं जलेनापूर्य, तस्मिज्जले सूर्य्यमण्डलादङ्कुशमुद्रया तीर्थान्यावाहयेत् ।। तत्र मन्त्रः-

ॐ गङ्गे च यमुने चैव, गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि, जलेऽस्मिन्सन्निधिं कुरु।१

ॐ ब्रह्माण्डोदरतीर्थानि, करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव, तीर्थं देहि दिवाकर ॥२॥

इति तीर्थान्यावाह्य ।

ॐ गङ्गादि सकल तीर्थेभ्यो नमः ॥

इति पुष्पाक्षतादिभिः सम्पूज्य–

ॐ अँ द्वादशकलात्मकेऽर्कमण्डलाय नमः ॥
ॐ मं दशकलात्मने ऽग्निमण्डलाय नमः ॥
ॐ उँ षोडशकलात्मने सोममण्डलाय नमः ॥

इत्यर्काग्नीन्दुमण्डलत्रयं सम्पूज्य ॥

ॐ षडङ्गेभ्यो नमः ॥

इति षडङ्गानि सम्पूज्य, अस्त्रेण-

'ॐ हूँ फट्'-इति संरक्ष्य,

'हमिति'—कवचेनाऽवगुण्ठ्य,

'वमिति'—धेनुमुद्रयाऽमृतीकृत्य, मत्स्यमुद्रयाच्छाद्य, प्रणवस्यदशावृतिंकृत्वा जपेत् । शङ्खमुद्रां सन्दर्श्य, धेनुयोनिमुद्रे दर्शयेत् ॥ इति घंस्थापन सामान्यविधिः ।

❀ अथ कालीपूजनम् ❀

यन्त्रं लिखित्वा कुङ्कुमकेशर चन्दनादिभिः षट्कोणगर्भं, त्रिकोणत्रयाष्टभूपुरात्मकं लिखेत् ॥ तत्रादौ ऋष्यादि न्यासं कुर्य्यात् । तद्यथा [शाक्त प्रमोदे]-

ॐ भैरवाय ऋषये नमः-शिरसि । ॐ उष्णिक्छन्दसे नमः-मुखे । ॐ दक्षिणकालिकायै नमो-हृदये । ॐ क्रीं बीजाय नमः-गुह्ये । ॐ हूं शक्तये नमः-पादयोः । ॐ क्रीं कीलकाय नमः-सर्व्वाङ्गे ॥ अथ षडङ्गन्यासः-

ॐ क्रां' हृदयाय नमः-इतिमन्त्रेण तर्जनीमध्यमाऽनामिकाभिः प्रसारिताभिर्हृदयं स्पृशेत् ॥ १ ॥ 'ॐ क्रीं' शिरसे स्वाहा—इतितर्जनीमध्यमाभ्यां शिरः स्पृशेत् ॥ २॥ 'ॐ क्रूं' शिखायै वषट्-इति बद्धमुष्टिनाऽङ्गुष्ठेन शिखां स्पृशेत् ॥३॥ 'ॐ क्रैं' कवचाय हुमितिमन्त्रेण व्यस्तहस्ताभ्यां सर्वाङ्गं स्पृशेत् ॥४॥ ॐ क्रौं' नेत्रत्रयाय वौषट्-इति तर्जन्यनामिकाभ्यां नेत्रे, मध्यमाङ्गुल्या भ्रूमध्यमेवं नेत्रत्रयं स्पृशेत् ॥५॥ 'ॐ क्रः' अस्त्राय-फट्—इति छोटिकया (चुटकी बजाकर) दिग्बन्धनं कुर्य्यात् ॥६॥ अथ करन्यासः-

"ॐ क्रां" अङ्गुष्ठाभ्यां नमः । 'ॐ क्रीं'

तर्ज्जनीभ्यां स्वाहा। "ॐ क्रूं" मध्यमाभ्यां वषट्। "ॐ क्रैं" नामिकाभ्यां हुम्। "ॐ क्रौं" कनिष्ठिकाभ्यां वौषट्। "ॐ क्रः" करतलकरपृष्ठाभ्यां फट्॥

एवमङ्गन्यासं विधाय, दशधा सप्तधा पञ्चधा वा मस्तकात्पादपर्यन्तं षद्भ्यां मस्तकपर्यन्त मूलमन्त्रेण व्यापकन्यासं कुर्य्यात्। ततश्चतुषोडशाष्टवारं मूलमन्त्रञ्जपन पूरककुम्भरचकाख्यं प्राणायामत्रय कुर्य्यात।

ततो दक्षिणकालीं ध्यायेत:-

"ॐ सिद्धाढ्यां शिवगेहिनीं करलसत्पाशाङ्कुशां भैरवीं, भक्ताऽभीष्टवरप्रदां सुकुशलां संसारबन्धच्छिदाम्॥ पीयूषाम्बुधिमन्थनोद्भवरसां सम्विद्विलासां परां, वीराराधितपादुकां सुविजयां ध्यायेज्जगन्मोहिनीम्" ॥१॥—इति ध्यात्वा।

"ॐ एह्येहि कालिकादेवि, शरणागतवत्सले"

इत्यमञ्जलिस्थपुष्पोपरि चावाह्य-

ॐ देवेशि भक्तिसुलभे परिवारसमन्विते।
यावत्त्वां पूजयिष्यामि, तावत्त्वं सुस्थिरा भव।

ततो मूलमुच्चार्य्य-

'साङ्गे साऽऽयुधे सवाहने सावरणे सपरिवारे दक्षिणकालिके ! इहागच्छ' ।

इत्यावाहनमुद्रयावाहयेत ॥

'इह तिष्ठ'-इतिस्थापनमुद्रया स्थापयेत ॥

'इह सन्निधेहि' इति-सन्निधीकरणमुद्रया सन्निधीकरणम् ।

'इह सन्निरुध्यस्व' ।

इति-×सन्निरोधनमुद्रया सन्निरोधनम् ॥

'इह सम्मुखी भव' ।

इति *समुखीकरण मुद्रया सम्मुखीकरणम् । अस्त्रेण संरक्ष्य-

'ॐ हुम' +ईत्यवगुण्ठय,

'वमिति'-धेनुमुद्रयाऽमृतीकृत्य, देवताङ्गे षडंगान् विन्यस्य, मूल-मन्त्रेण च सकलीकृत्य-

'ॐ आं ह्रीं आं क्रों स्वाहेति'-

द्वादशवारञ्जपन् लेलिहानमुद्रया देवतायाः प्राणप्रतिष्ठां कुर्य्यात् ॥ तद्यथा-

ॐ आं ह्रीं क्रों अस्याः श्रीदक्षिणकालिकाया सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुश्रो-

---

×सन्निरोधन मुद्रा-अंगुष्ठगर्भिणी सैव, सन्निरोधे समीरिता ।

*सम्मुखीमुद्रा—हृदिअञ्जलीवन्धनं प्रार्थनी मुद्रा ।

+अवगुण्ठन मुद्रा—सव्यहस्तकृता मुष्टिः, दीर्घाऽधोमुखतर्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिताभवेत् ॥

त्वजिह्वा - घ्राणपाणिपाद- पायूप- स्थानि!
प्राणाश्चेहागत्य सुखं चिरन्तिष्ठन्तु स्वाहा।

इति यंत्र सुवर्ण प्रतिमायां वा हस्तं धृत्वा पटेत्॥ तत्र धेनुमुद्राञ्च प्रदर्शयेत्। ततो मूलमन्त्रं पठन्पुष्पाञ्जलिं दद्यात्-

ॐ साङ्गायै सायुधायै सवाहनायै सपरिवारायै दक्षिणकालिकायै देवतायैइमं मन्त्रपुष्पाञ्जलिं समर्पयामि नमः॥ इदम्पाद्यम्, इदमाचमनीयम्, एषोऽर्घः, एषो मधुपर्कः, इदं पुनराचमनीयम् इदं स्नानार्थं पञ्चामृतम्, इदं स्नानाय शुद्धोदकम्, इमे वस्त्रोपवस्त्रे, इदं रक्तचन्दनम्, एतेऽक्षताः, इमानि पुष्पाणि-श्री महाकालिकायै वौषट्। एष धूपः, एष दीपः एतानि नैवेद्यानि श्रीकालिकादेव्यै नमः॥

इति संक्षेपतः षोडशोपचारैश्च पूजाम्विधाय॥ ततो मन्त्रजपार्थं रुद्राक्षमाला मानीय ताम्रपात्रे वामहस्ते वा संस्थाप्य मूलमन्त्रेणाऽर्घोदकेनाभ्युक्ष्य-

ॐमाले माले महामाये, सर्वशक्तिस्वरूपिणि।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्त्वं सिद्धिदा भव॥

"ॐ ह्रीं सिद्ध्यै, नमः" ॥

अनेन मन्त्रेण मालां दक्षिणहस्ते निधाय, हृत्प्रदेशे च समानीय, मध्यमामध्य भागेनाऽङ्गुष्ठेन गुटिकाम्प्रत्येकां स्पृशन्, मेरुमलंघयन् कामकलां विभाव्य, शिरसि गुरुं ध्यात्वा, हृदि देवींभावयन् जिह्वायां मन्त्रंदीपरूपिणं विभाव्य, मूलमन्त्रमष्टोत्तरशतं वा अद्रुतमविलम्बितं प्रजप्य, मालाञ्च शिरसि निधाय—

ॐ त्वं माले सर्वभूतानां, सर्वलोकप्रिया मता।
शिवं कुरुष्व मे भद्रे ! यशो वीर्यञ्च सर्वदा ॥

इति पठन्निधाय ॥

"ॐ ह्रीं सिद्धयै नमः"

इति सम्पूज्य । पुनः पूर्ववत्प्राणायाम—न्यासादिकञ्च विधाय, देवताम्पुष्पाक्षतादिभिः सम्पूज्य, पुष्प चन्दनाक्षतयुतशंखोदकेन ॥

"ॐ गुह्याति०" इति मन्त्रेण देव्या वामकरे तेजोमयं जलं समर्पयेत ॥ अथ ध्यानम्-

शवारूढां महाभीमां, घोरदंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्गमुण्डवराऽभयकरां शिवाम्॥
मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बराम्

इति ध्यानम् । [एवं सञ्चिन्तयेत्कालीं श्मशानालयवासिनीम्] इति शाक्तप्रमोदोक्ता श्रीदक्षिणकालीपूजापद्धतिः ॥

❀ अथ कुमारी-पूजनम् ❀

अथ तान्त्रिक-मन्त्रः (शाक्तप्रमोदे)-

ॐ ऐं ह्रीं श्रीं हूँ ह्सौः सन्ध्यायै कुमार्य्यै नमः।

इतिमन्त्रेण पीठोपरि देवी - प्रतिमां सम्पूज्य क्रमेण *कुमारिकाः सम्पूजयेत् ॥ तद्यथा-

ॐ जगत्पूज्ये जगद्वन्द्ये, सर्वशक्तिस्वरूपिणि। पूजां गृहाण कौमारि! जगन्मातर्नमोऽस्तु ते।१ त्रिपुरां त्रिपुराधारां, त्रिवर्षां ज्ञानरूपिणीम्। त्रैलोक्यवन्दितान्देवीं, त्रिमूर्ति पूजयाम्यहम् २ कामात्मिकां कलाऽतीतां, कारुण्यहृदयां शिवाम्। कल्याणजननीं देवीं, कल्याणीं पूजयाम्यहम्॥ ३॥ अणिमादिगुणाधारामका-राद्यक्षरात्मिकाम्। अनन्तशक्तिकांलक्ष्मीं, रोहिणीं पूजयाम्यहम्॥४॥ कामचारीं शुभां

❀ रुद्रयामलोत्तरखण्डे षष्ठपटले—एकवर्षा भवेत्सन्ध्या, द्विवर्षा च सरस्वती। त्रिवर्षा च त्रिधामूर्त्तिश्चतुर्वर्षा च कालिका। सुभगा पञ्चवर्षा तु षड्वर्षा च भवेदुमा। सप्तभिर्भिल्लिनी साक्षादष्टवर्षा तु कुब्जिका। नवभिः कालसन्दर्भा, दशभिश्चापराजिता। एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी। त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका। क्षेत्रज्ञा पञ्चदशभिः, षोडशे चाम्बिका मता॥ एवं क्रमेण संप्राप्य, यावत्पुष्पं न जायते। प्रतिपदादिपूर्णान्तं, वृद्धिभेदेन पूजयेदिति॥

कान्तां,कालचक्रस्वरूपिणीम् । कामदां करुणोदाराङ्कालिकाम्पूजयाम्यहम् ।५। चण्डवीरांश्चण्डमायां चण्डमुण्डप्रभञ्जनीम् । पूजयामि सदा देवीं,चण्डिकां चण्डविक्रमाम्।६। सदाऽऽनन्दकरीं शान्तां,सर्वदेवनमस्कृताम् । सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहं। दुर्गमे दुस्तरे कार्ये,भवदुःखनिवारिणीम् । पूजयामि सदा भक्त्या,दुर्गां दुर्गतिनाशिनीम्।८ सुन्दरीं सर्ववर्णाभां, सुखसौभाग्यदायिनीम्। सुभद्राजननीं देवीं,सुभद्रां पूजयाम्यहम् ।९।।

इति कुमारीस्तोत्रम् ॥ एवं ध्यात्वा

ॐ कुमार्य्यै नमः ।१। ॐ त्रिमूर्त्यै नमः ।२।
ॐ कल्याण्यै नमः ।३। ॐ रोहिण्यै नमः ।४।
ॐ कालिकायै नमः।५। ॐ चण्डिकायै नमः।६।
ॐ शाम्भव्यै नमः।७। ॐ दुर्गायै नमः ।८।
ॐ सुभद्रायै नमः ॥ ९ ॥

इति नाममन्त्रैः पाद्यादिभिः सम्पूजयेत् ॥

इतिनवरात्र्यां दुर्गाष्टम्यां नवकुमारीपूजनं समाप्तम् ।

❀ अथ तान्त्रिकबलिदान-विधिः ❀

[शाक्तप्रमोदे] तत्र पूर्वं संकल्पं कृत्वा, स्वयमुत्तराऽभिमुखः पूर्वाभिमुखं बलिं [सुलक्षणयुतं सुन्दरं पशुं] देव्यग्रे संस्थाप्य, वक्ष्यमाणविधिना सम्पूज्योत्सृजेत् । तदुक्तं यामले-

देव्यग्रे स्थापयित्वा तु, पशुं लक्षणसंयुतम् ।
श्वेतसर्षपविक्षेपाद्, भूतानुत्सारयेत्ततः ॥१॥

अर्घ्योदकेन सम्प्रोक्ष्य, अस्त्रेण संरक्ष्य, कवचेनावगुण्ठ्य, धेनुमुद्रयाऽमृतीकृत्य, गन्धपुष्पाक्षतैः पञ्चोपचारैर्वा पशुं सम्पूज्य, मूलेन सप्तधातत्वमुद्रया प्रोक्षणं कृत्वा, पशुकर्णे इमं मन्त्रं पठेत्-

ॐ पशुपाशाय विद्महे, विश्वकर्म्मणे च धीमहि । तन्नो जीवः प्रचोदयात् ॥ततः॥ ॐ ह्रीं कालि २ वज्रेश्वरी लौहदण्डायै नमः॥

इतिमन्त्रेण खड्गं प्रपूजयेत् ॥ ततः खड्गस्याग्रमध्यमूलक्रमेण पूजयेत् ॥ यथा-

ॐ ह्रूँ वागीश्वरीब्रह्मभ्यां नमः ॥ १ ॥
ॐ ह्रूँ लक्ष्मीनारायणाभ्यां नमः ॥ २ ॥
ॐ ह्रूँ उमामहेश्वराभ्यां नमः ॥ ३ ॥
ॐ ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः।४

इति-सर्वत्र पूजयित्वा प्रणमेत्-

ॐ खड्गाय खरशाणाय, शक्तिकार्य्यार्थतत्परः।
पशुश्छेद्यस्त्वया शीघ्रं, खड्गनाथ! नमोऽस्तु ते।

ततो महावाक्यं पठेत् ॥ तत्र सङ्कल्पः-

ॐ तत्सदद्यामुकदेवताप्रीतिकामोऽमुकदेव्यै इमं पशुं तुभ्यमहं सम्प्रददे ॥

ततो निवेदयेत्-

'यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्'।

ततो बलिं छिन्द्यात् ॥ ततो रुधिरं समांसं देव्यै दद्यात्। ततोऽवशिष्टेन बटुकादिभ्यो बलिं दद्यात्। यथा-

'हूं वां वटुकाय नमः'

इति गन्धादिभिः सम्पूज्य, पूर्ववन्मन्त्रेण (वायव्ये) बलिं दद्यात्।१

'हूं यां योगिनीभ्यो नमः'

इति-सम्पूज्य पूर्ववन्मन्त्रेण [ईशाने] बलिन्दद्यात् ॥ २ ॥

'हूं क्षं क्षेत्रपालाय नमः'

इति सम्पूज्य पूर्ववन्मन्त्रेण [नैर्ऋत्यां] बलिन्दद्यात् ॥ ३ ॥

'हूं गं गणपतये नमः'

इति सम्पूज्य, पूर्ववन्मन्त्रेणाऽऽग्नेय्याङ्गणेशाय बलिन्दद्यात् ।४।
इति तान्त्रिक बलिदानम् ॥

❀ घृतच्छायादर्शनम् ❀

अथ च द्रवीभूतमाज्यमेकस्मिन्ताम्रपात्रे कांस्यपात्रे वा

पूरयित्वा, तन्मध्ये किञ्चित्सुवर्णं रजतादिद्रव्यञ्च प्रक्षिप्य, घृतपात्रं चन्दनाक्षतैः सम्पूज्य, वक्ष्यमाणमन्त्रैः कुशैर्दूर्वाभिरा-लोड्याभिमन्त्रयेत् ।। तत्र मन्त्राश्च-

ॐ आज्यं परमयज्ञीयमाज्यं तेजमयोनिधिः। आज्यं हि देवदेवानां प्रियमाज्ये स्थितञ्जगत् ॥१॥ तदाऽऽज्यवीक्षणं भक्त्या कृते मङ्गल-माप्नुयात्। दुःस्वप्नो दुर्निमित्तञ्च,विघ्नौघो नश्यति ध्रुवम् ॥२॥ तेजः प्रज्ञा च शौर्यञ्च, बलञ्चापि प्रवर्द्धते। पुण्यं सप्ताङ्गराज्यञ्च, भवेदन्यदभीप्सितम् ॥ ३ ॥ ज्ञात्वा वाऽज्ञा-नतो वापि, मनोवाक्कायकर्मभिः । कृतं यत्पातकं तन्मे, नश्यतु घृतदर्शनात् ॥४॥ आज्ये चैव मुखं दृष्ट्वा,सर्वपापैः प्रमुच्यते।५।

इत्यभिमन्त्र्य संकल्पः-

ॐ अद्येहेत्यादि० अमुकगोत्रोऽमुकरा-शिरमुकोऽहं सर्वाऽरिष्टनिवृत्तये आज्याऽवे-क्षणञ्च करिष्ये ॥ ॐ तेजोऽसीति-मन्त्रस्य परमेष्ठीऋषिस्त्रिष्टुप्छन्दः, आज्यं-देवता, आज्यावेक्षणे विनियोगः ॥ ॐ तेजोऽसि

शुक्रमस्यमृतमसि धामनामासि ।। प्प्रियन्दे-
वानामनाधृष्टन्देवयजनमसि ।।१।। ॐ रूपेण
वो रूपमभ्यागान्तु यो वो व्विश्ववेदा व्वि-
भजतु । ऋतस्य पथा प्रत चन्द्र दक्षिणा व्वि-
श्वः पश्य व्यन्तरिक्षं यतोव सदस्यैः ।। २ ।।
ॐआज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम्।
आज्येन देवास्तृप्यन्ति, आज्ये लोकाः प्रति-
ष्ठिताः । १ । भौमान्तरिक्षं दिव्यं वा, यन्मे
कल्मषामगतम् । तत्सर्वमाज्यसंस्पर्शात्प्रणा-
शमुपगच्छतु । २ । ॐ ध्रुवासि ध्रुवोऽयँ य्य-
जमानोऽस्मिन्नायतने प्रजयापशुभिर्भूयात्,
घृतेन द्यावापृथिवी पूर्य्येथा मिन्द्रस्य च्छदि-
रसि व्विश्श्वजनस्य च्छाया ।। ३ ।।

इति, घृते शरीरच्छायादर्शनं कृत्वा, आज्यं हस्तेन स्पृ-
ष्ट्वा ब्राह्मणं सम्पूज्य ।। ततः-

ॐ अद्येहाऽमुकराशिरमुकनामशर्माहं इद-
मवलोकितमाज्यं ताम्रपात्रस्थितं सद्रव्यं
मृत्युञ्जयदेवताप्रीतये सर्वाऽरिष्टपरिहारा-

र्थञ्चाऽमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम ॥

आज्यपात्रं दत्वा दानवाक्यं पठेत्-

काम धेनोः समुद्भूतं, देवानामुत्तमं हविः । आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥

ततोऽञ्जलिं बद्ध्वा मृत्युञ्जय प्रार्थयेत्-

ॐत्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥ ब्राह्मणो ब्रूयात्—श्रीमहामृत्युञ्जय-प्रसादाद्दीर्घायुरस्तु श्रीरस्तु ॥

❀ तिलपात्रदानम् ❀

ॐ त्र्यम्बकमिति - मन्त्रस्य श्रीवशिष्ठ-ऋषिस्त्र्यम्बकरुद्रो देवता,सरजततिलताम्र-पात्रदाने चावाहने विनियोगः ॥

अथ ध्यानम्-

ॐत्र्यम्बकं वृषभारूढं,प्रभजेऽहं त्रिलोचनम्। कपालशूलखट्वाङ्गं चन्द्रमौलिं सदा शिवम्।

अथावाहनम्-

ॐत्र्यम्बकँ य्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्।

उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीयमामृतात्।।१।। ॐ त्र्यम्बकँ य्यजामहे सुगन्धिम्पतिवेदनम् । उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥२ । त्र्यम्बकमावाहयामि स्थापयामि ॥ ॐ मनो जूतिर्ज्जुषता० ॥

ॐ भूर्भुवः स्वः, त्र्यम्बक ! इहागच्छेह तिष्ठ, सुप्रतिष्ठितो वरदो भव ॥

ततः षोडशोपचारैः पञ्चोपचारैर्वा संपूज्य-

'ॐ सताम्रतिलान्नेभ्यो नमः ।' ततो-

'ॐ ब्राह्मणाय नमः'

सम्पूज्य सङ्कल्पं कुर्यात्--

ॐ अद्येहेत्यादि० अमुकगोत्रोऽमुकनामशर्माहं, मम समस्तदुष्टाऽरिष्टनिवृत्तिपूर्वकं सुखसौभाग्यवृद्धयेऽमुककर्मणि न्यूनातिरिक्तजन्मदोषाऽनुपत्तये, अपूर्णपूर्णार्थमिदं हिरण्यमूल्योपकल्पितं रजतसहितं सताम्रतिलान्नं चन्द्रार्कप्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

तथा च-

अद्य कृतैतत् सताम्रतिलान्नदानप्रतिष्ठार्थं किञ्चिद्धिरण्यमूल्योपकल्पितं रजतं चन्द्रदैवतममुकगोत्रायाऽमुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

ततः प्रार्थयेत्-

ॐ तिलाः स्वर्णसमायुक्ताः, सर्वपापाहराः स्मृताः। तस्मादेषां प्रदानेन, नश्यन्त्वेनांसि सर्वतः॥१॥तिलाः पुण्याः पवित्राश्च, सर्वकामप्रदाः शुभाः। शुक्ला वा यदि वा कृष्णा, विष्णुगात्रसमुद्भवाः ॥ २ ॥ यानि कानि च पापानि, जन्मान्तरकृतानि च। तिलपात्रप्रदानेन,सर्वे नश्यन्तु मे सदा॥३॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी, भानुः शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः, सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

इति तिलपात्रदानम् ॥

❀ अथ जन्मदिनोत्सव (वर्षगाँठ) पूजनम् ❀

ततः कर्त्ता प्रतिसांवत्सरिकजन्मतिथौ सौरांशकजन्म-

दिवसे वा + प्रातस्तिलतैलमिश्रित-हरिद्रादिमङ्गलद्रव्यैः स्नात्वा, नूतनवस्त्राणि परिधाय, पूजासामग्रीं संगृह्य, पूजास्थलमागत्य, स्वासने पूर्वाऽभिमुखो भूत्वा चोपविश्याचम्य,

तत्र घृत-दीपं प्रज्वाल्य–

'ॐ दीपाधिष्ठातृदेवताभ्यो नमः'

इति दीपं सम्पूज्य-

ॐ अपवित्रः पवित्रो वा, सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं, स बाह्याऽभ्यन्तरः शुचिः। पुण्डरीकाक्षः पुनातु ३॥

इतिमन्त्रेणाऽत्मानं गङ्गोदकेनाभिषिञ्च्य-

"ॐ आपो हिष्ठामयोभुव०"

इति-मार्जनं कृत्वा वामहस्ते गौरसर्षपान्गृहीत्त्वा दिग्रक्षणं कुर्य्यात्–

ॐअपसर्पन्तु ते भूताये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।१

+ सर्वैः स्वजन्मदिवसे, स्नातैः मंगलवारिभिः। गुरुदेवाग्निविप्राश्च, पूजनीयाः प्रयत्नतः॥ १॥ घस्त्रद्वये जन्मतिथिर्यदि स्यात्कुर्यात्तदा जन्मभसंयुता च असंगता तेन दिनद्वयेऽपि, पूज्या पराया भवतीह यत्नात्॥ २॥

* खण्डनं नखकेशानां, मैथुनाऽध्वगमौ तथा। आमिषं कलहं हिंसां, वर्षवृद्धौ विवर्जयेत्॥ तत्र च जन्मतिथिरौदयिकी ग्राह्या॥

अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।
सर्वेषामवरोधेन देवपूजां समारभे ॥ २ ॥

ततः शान्तिपाठं स्वस्तिवाचनञ्च कृत्वा, कलशे श्वेत-वस्त्रे वा गणेशादिपञ्चदेवपूजनं विधाय, ततः वक्ष्यमाण-प्रकारेण देवतास्थापनं पूजनञ्च कुर्य्यात् ॥

तत्राऽऽदौ निम्बगुग्गुलुहरिद्रादूर्वागौरसर्षपपूगीफलान्वितां पोटलिकां पीतकौशेयवस्त्रेण कृत्वा रक्षोघ्नमन्त्रैरभिमन्त्र्य-

ॐ एतन्ते देव सवितर्य्यज्ञम्प्राहुर्ब्बृहस्प-तये ब्ब्रह्मणे। तेन यज्ञमव तेन यज्ञपतिन्तेन मामव॥ इति-मन्त्रेण प्रतिष्ठाप्य-

ॐयदाबध्नन्दाक्षायणा हिरण्य ँ शता-नीकाय सुमनस्यमानाः। तन्मऽआबध्नामि शतशारदायायुष्मान्जरदष्टिर्य्यथासम् ॥

इति दक्षिणहस्ते पोटलिकां बद्ध्वा तत्राऽर्घपात्रं संस्थाप्य, प्रधानसङ्कल्पं कुर्य्यात्-

ॐ अद्येत्यादि० देशकालौ सङ्कीर्त्याऽ-मुकराशिरमुकगोत्रप्रवरोऽमुकोऽहमद्य मदी-यजन्मदिने(मम पुत्रस्य जन्मदिने वा)आयु-रारोग्याभिवृद्धये वर्षवृद्धिकर्म करिष्ये, तद-

ङ्गत्वेन दध्यक्षतपुञ्जेषु कुलदेवतादीनां गुर्वादीनां मार्कण्डेयादीनाञ्च नाममन्त्रैरावाहनपूर्वकं [१]पञ्चोपचारविधिना [२]षोडशोपचारैर्वा पूजनमहं करिष्ये ।

तद्यथा-

ॐ भूर्भुवः स्वः ॐ षष्ठीदेव्यै नमः, षष्ठीदेवीमावाहयामि, स्थापयामि, भो षष्ठीदेवि ! इहागच्छ, इह तिष्ठ ॥ १ ॥ ॐ भूर्भुवः स्वः ॐ कुलदेवतायै नमः, कुलदेवतामावा० स्थाप०, भो कुलदेवते ! इहागच्छ, इह तिष्ठ ॥ २ ॥ ॐ भू० जन्म नक्षत्रेशाय (अमुकाय) नमः जन्मनक्षत्रेशमावा० स्थाप०, भो जन्मनक्षत्रेश ! इहागच्छ, इह तिष्ठ ॥ ३ ॥ ॐ भू० प्रकृतिपुरुषात्मक-मातापितृभ्यां नमः मातापितरावावाहयामि स्थाप०, भोः प्रकृतिपुरुषात्मकौ मातापितरौ ! इहागच्छतम्, इह तिष्ठतम् ।४। ॐ भू० प्रजापतये नमः, प्रजा-

---

१-पञ्चोपचाराः-ध्यानमावाहनञ्चैव, भक्त्या यच्च निवेदनम् । नीराजनं प्रणामश्च, पञ्चपूजोपचारकाः ॥ इति—जाबालि. ॥

२-षोडशोपचारः-आवाहनासने पाद्यमर्घं आचमनीयकम् । स्नानं वस्त्रोपवीतञ्च, गन्धमाल्यान्यनुक्रमात् ॥ धूपं दीपञ्च नैवेद्यं, ताम्बूलं च प्रदक्षिणा । पुष्पाञ्जलिरिति प्रोक्ता, उपचारास्तु षोडश ॥ इति ॥

पतिमावा० स्थाप०, भो प्रजापते! इहागच्छ, इह तिष्ठ ॥ ५ ॥ ॐ भू० भानवे नमः, भानुमावा० स्थाप०, भो भानो! इहागच्छ, इहतिष्ठ ॥ ६ ॥ ॐ भू० विघ्नेशाय नमः, विघ्नेशमावा० स्थाप०, भो विघ्नेश! इहागच्छ, इहतिष्ठ ॥ ७ ॥ ॐ भू० अश्वत्थाम्ने नमः, अश्वत्थामानमावा० स्थाप०, भो अश्वत्थामन्! इहागच्छ, इहतिष्ठ ॥ ८ ॥ ॐ भू० बलये नमः, बलिमावा० स्थाप०, भो बले! इहागच्छ, इह तिष्ठ ॥ ६ ॥ ॐ-भू० व्यासाय नमः, व्यासमावा० स्थाप,० भो व्यास! इहागच्छ, इह तिष्ठ ॥ १० ॥ ॐ भू० हनुमते नमः, हनुमन्तमावा० स्थाप०, भो हनुमन्! इहागच्छ, इह तिष्ठ ॥ ११ ॥ ॐ भू० श्रीरामभक्ताय विभीषणाय नमः, विभीषणमावा० स्थाप०, भो विभीषण! इहागच्छ इह तिष्ठ ॥ १२ ॥ ॐ भू० कृपाचार्य्याय नमः, कृपाचार्य्यमावाह० स्थाप०, भोः कृपाचार्य! इहागच्छेह तिष्ठ ॥ १३ ॥ ॐ भू० जामदग्न्य-श्रीपरशुरामाय नमः श्रीपरशुराममावा० स्थाप०, भो परशुराम! इहागच्छ, इहतिष्ठ ॥ १४ ॥ ॐ भू० प्रह्लादाय नमः, प्रह्लादमावा० स्थाप०,

भोः प्रह्लाद ! इहागच्छेह तिष्ठ ॥ १५ ॥ ॐ भू० ध्रुवाय नमः, ध्रुवमावा० स्थाप०, भो ध्रुव ! इहागच्छेह तिष्ठ ॥ १६ ॥ ॐ भू० गुरुभ्यो नमः, गुरूनावाह० स्थाप०, भो गुरवः ! यूयमिहागच्छत, तिष्ठत ॥ १७ ॥ भू० देवताभ्यो नमः, देवता आवाह०, स्थाप०, भो देवताः ! यूयमिहागच्छत, इह तिष्ठत ॥ १८ ॥ ॐ भू० ऋषिभ्यो नमः, ऋषीनावा० स्थाप०, भो ऋषयः ! यूयमिहागच्छत, इह तिष्ठत ॥ १६ ॥ ॐ भू० पितृभ्यो नमः, पितृनावाह० स्थाप०, भोः पितरः ! यूयमिहागच्छत, इह तिष्ठतः ॥ २० ॥ ॐ भू० कालाय नमः, कालमावा० स्थाप०, भोः काल ! इहागच्छ, इह तिष्ठ ॥ २१ ॥ ॐ भू० कलियुगाय नमः, कलियुगमावा० स्थाप०, भोः कलियुग ! इहागच्छ, इह तिष्ठ ॥ २२ ॥ ॐ भू० सम्वत्सराय नमः। सम्वत्सरमावा०स्थाप०भोः सम्वत्सर! इहागच्छ, इह तिष्ठ ।२३।

ततश्च-

भो मास ! पक्ष ! जन्मतिथे ! (अमुक) जन्मर्क्ष ! (अमुक) जन्मराशे ! शिवे ! सम्भूते ! प्रीते ! सन्नते ! अनसूये ! क्षमे ! विघ्नवति ! भद्रे ! इन्द्र ! अग्ने !

यम ! निर्ऋते ! वरुण ! वायो ! धनद ! ईशान ! ब्रह्मन् ! अनन्त ! कार्तिकेय ! जन्मदेवते ! स्थान-देवते ! प्रत्यक्षदेवते ! वास्तुदेवते ! क्षेत्रपाल ! पृथिवि!आपः ! तेजः ! वायो ! आकाश ! नवग्रहाः !

यूयमिहागच्छत, पूजार्थं युष्मानावाहयामि, स्थापयामि, इह तिष्ठत ।

तथा च-ॐ भूर्भुवः स्वः ॐ गुर्वादिदेवताभ्यो नमः गुर्वादिदेवताश्चेहागच्छन्तु, इह तिष्ठन्तु ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥

ॐ मनो जूतिर्ज्जुषता०"—आवाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु ॥

ततः श्रीमार्कण्डेयाऽऽवाहनम् । तत्रादौ ध्यायेत्—

ॐ आयुष्प्रद महाभाग ! सोमवंशसमुद्भव ।
महातपो मुनिश्रेष्ठ,मार्कण्डेय!नमोऽस्तु ते।१।
द्विभुजं जटिलं सौम्यं, सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं तपोमूर्तिं,भक्तितः पूजयाम्यहम् २

ततो हस्तेऽक्षतान् गृहीत्वा—

'ॐ मनो जूतिर्ज्जुषता० ॥ १ ॥ ॐ एष वै प्रतिष्ठा० ॥ २ ॥ ॐ भूर्भुवः स्वः "ॐ

महर्षिमार्कण्डेयाय नमः' ओ मार्कण्डेय ! इहागच्छ, इह तिष्ठ, पूजार्थं त्वामावाहयामि, स्थापयामि ॥

इति प्रतिष्ठाप्यावाहित-सर्वदेवानामेकतन्त्रेण गन्धाऽक्षत पुष्पादिभिः पूजनं कुर्यात्-

पादयोः पाद्यं समर्पयामि, हस्तयोरर्घ्यं समर्प०, सर्वांगे स्थानीयं समर्प०, मुखे ह्याचमनीयं समर्प०, पुनराचमनं समर्प०, वस्त्रोपवस्त्रार्थे वस्त्रे समर्प०, यज्ञोपवीतं समर्प०, पुनराचमनीयं समर्प०, गन्धं समर्प०, गन्धान्ते ऽक्षतान्समर्प०, अबीरं गुलालं हरिद्राचूर्णञ्च समर्प०, सौभाग्यद्रव्याणि समर्प०, नाना सुगन्धि द्रव्याणि समर्प०, पुष्पाणि समर्प०, पुष्पान्ते धूपमाघ्रापयामि, प्रत्यक्षदीपं दर्शयामि, हस्तप्रक्षालनम्, नैवेद्यं निवेदयामि, नैवेद्यं पुरतः कृत्वा, गन्धपुष्पे प्रक्षिप्य, ग्रासमुद्रां धेनुमुद्राञ्च प्रदर्श्य, (ॐ प्राणाय स्वाहा-१, ॐ अपानाय स्वाहा-२, ॐ समानाय स्वाहा-३, ॐ उदानाय स्वाहा-४, ॐ व्यानाय स्वाहा-५) मध्ये-मध्ये आचमनीयम्। उत्तरापोशनम्। मुखं प्रक्षालनम्। हस्तौ प्रक्षालनम्। करोद्वर्तनार्थे पुनर्गन्धं समर्पयामि। मुखवासनार्थे

ताम्बूलं पूगीफलं लवंगादिकञ्च समर्प० । कृतायाः पूजायाः साद्गुण्यार्थं यथाशक्तिद्रव्यं दक्षिणां च समर्पयामि । आरार्तिकमर्घ्यञ्च समर्पयामि ।

पुनर्मन्त्रपुष्पाञ्जलिभिरभ्यर्च्य, करौ बद्ध्वा वरम्प्रार्थयेत्-

ॐ मार्कण्डेय तपोमूर्त्ते ! नमस्ते महदायुषे ।
चिरजीवी यथा त्वं वै, भविष्यामि तथामुने! १
मार्कण्डेय ! महाभाग, सप्तकल्पान्तजीवन ।
आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव। २।
चिरजीवी यथा त्वं भो!, भविष्यामि तथा मुने!
रूपवान्वित्तवाँश्चैव, श्रियायुक्तश्चसर्वदा। ३।
मार्कण्डेय नमस्तेऽस्तु, सप्तकल्पान्तजीवन ।
आयुरारोग्यसिद्ध्यर्थं, प्रसीद भगवन्मुने! ।४।
चिरजीवी यथा त्वन्तु, मुनीनां प्रवर द्विज ।
कुरुष्व मुनिशार्दूल!, तथा मां चिरजीविनम् ५

ततो षष्ठीदेवीं प्रार्थयेत्-

ॐजय देवि जगन्मातर्जगदाऽऽनन्दकारिणि।
प्रसीद मम कल्याणि, महाषष्ठि!नमोऽस्तुते।१
रूपं देहि यशो देहि, भगं देहि निरन्तरम् ।
पुत्रान् देहि, धनं देहि, सर्वान्कामाँश्च देहि मे। २

त्रैलोक्ये यानि भूतानि,स्थावराणि चराणि च
ब्रह्मविष्णुशिवैः सार्द्धं,रक्षां कुर्वन्तु तानि मे।३
मन्त्रहीनं क्रियाहीनं, भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि!परिपूर्णं तदस्तु मे ॥४॥
ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी, भानुः
शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनि-
राहुकेतवः,सर्वे ग्रहाः शांतिकरा भवन्तु ॥५॥

इति वरं सम्प्रार्थ्य, जन्मसूत्रं पूजयित्वा सूत्रे वर्षग्रन्थिं बध्नीयात् ॥ तत्रमन्त्रः-

ॐ द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः
स नरस्यप्रियं सत्। द्रविणोदा वीरवती मि-
षन्नो द्रविणोदारासते दीर्घमायुः ॥

ततोऽग्रिममन्त्रेण सतिलं गुड़मिश्रितं पयः पिवेत्-

सतिलं गुडसम्मिश्रमञ्जल्यर्द्धमितं पयः।
मार्कण्डेयाद्वरं लब्ध्वा पिवाम्यायुर्विवृद्धये ॥
बालकमुखे पञ्चवारं दुग्धं दत्त्वा तन्मुखं
प्रक्षालयेत् ॥

ततः प्रार्थयेत्-

प्रीयन्तां देवताःसर्वाः, पूजां गृह्णन्तु मामकीम्।

प्रयच्छन्त्वायुरारोग्यं, यशःसौख्यञ्च सम्पदः ॥१
मन्त्रहीनं भक्तिहीनं, क्रियाहीनं महामुने !।
यदर्चितं मयादेव, परिपूर्णं तदस्तु मे ॥२॥

इति पठित्वा ततस्तत्र दैवज्ञो वर्षफलं वाचयित्वा, दुष्टस्थानस्थग्रहाणां दानसामग्रीं सम्मुखीकृत्य सम्पूजयेत् ॥ पुनर्ब्राह्मणाँश्च पाद्य-गन्धादिभिः पूजयित्वा *क्रूरग्रहाणां द्रव्यदान-सङ्कल्पं कुर्य्यात्-[द्रव्यदानके लिए पृष्ठ १९६ देखें]

ॐ अद्येत्यादि० देशकालौ सङ्कीर्त्याऽमुकगोत्रप्रवरो ऽमुकनक्षत्रोपलक्षितो ऽमुकराशिरमुकोऽहं जन्मकालतोऽद्य यथासंख्यकाब्दप्रवेशसमयेऽमुकलग्नावस्थिताऽऽदित्यादिनवग्रहाणां यथास्थानराशिस्थितानां पापग्रहाणां दुष्टारिष्टोपशमनार्थं शुभानां शुभफलाधिक्यप्राप्तये, विंशोत्तरीमहादशायामन्तर्दशायां गोचरेऽष्टकवर्गे सर्वतोभद्रे नैर्याणे च शुभफलावाप्तये, एतद्द्रव्यं हिरण्यादियुतं ग्रहाणां प्रीत्यर्थंकर्मोपदेशकाय श्रीगुरवे ऽन्येभ्यो ब्राह्मणेभ्यश्च कुल-

नवग्रहों की शान्ति के लिए दान-सामग्री

सूर्य	चन्द्र	मंगल	बुध	गुरु	शुक्र	शनि	राहु	केतु	वर्षमुन्था
माणिक	मोती	मूँगा	पन्ना, पचरत्न	पुखराज	हीरा	नीलम	गोमेद	वैदूर्यमणि	सोना
सोना ताँबा	चाँदी शख	सोना ताँबा	काँशा सुवर्ण	सोना	चाँदी	लोहा	लोहा स्वर्ण	सीसा लोहा	काँस्यपात्र
लाल वस्त्र	सफेद वस्त्र	गेरूआ वस्त्र	हरा कपड़ा	पीला वस्त्र	सफेद वस्त्र	काला वस्त्र	नीला कपड़ा कम्बल	काला कपड़ा	सफेद वस्त्र
गेहूँ, मसूर	चावल सफेद	मसूर की दाल	मूँग की दाल	चना की दाल	चावल	उर्द की दाल	तिल–उर्द सप्त धान्य	तिल–उर्द सप्त धान्य	चावल
गुड़	चीनी, मिश्री	गुड़, गेहूँ	षट्रस–भोजन	हल्दी नमक सैंधा	मिश्री, चीनी	काली मिर्च	अभ्रक	मालाशस्त्र	स्वामिवत्‌जप सं० ११०००
सवत्सा लाल गौ	सफेद बैल	लाल बैल रक्त चंदन	बैल	घोड़ा भूमि, छत्र	सफेद घोड़ा	भैंस या काली गाय	स्वर्ण–सर्प	बकरा मेढा	
केशर लाल चंदन	कपूर सफेद चंदन	केशर कस्तूरी	घी, कपूर	धार्मिक पुस्तक	इत्र	कस्तूरी तथा सोना	खड्ग	कस्तूरी कैथ फल	
लाल कमल सूर्यमुखी कमल	चम्पा चमेली सफेद–कमल	कन्नेर का फूल	सर्वपुष्प शंख	पीला फूल खांड़	पान सफेद फूल	जूते चमड़ा	काले फूल	काले फूल	
लाल मिर्च	दही दूध, घी	ईख का रस	गज दन्त अनेक फल	केला का फल, मधु	दही, घी	तिली का तैल तिल	सूप	तिली का तेल	
ॐ घृणिः सूर्याय नमः	ॐ सों सोमाय नमः	ॐ अं अंगारकाय नमः	ॐ बुं बुधाय नमः	ॐ बृं वृहस्पतये नमः	ॐ शुं शुक्राय नमः	ॐ शं शनैश्चराय नमः	ॐ रां राहवे नमः	ॐ कें केतवे नमः	
जप ७०००	जप ११०००	जप १००००	जप ९०००	जप १९०००	जप १६०००	जप २३०००	जप १८०००	जप १७०००	

पुरोहिताय वा विभज्य दास्ये, *ॐ तत्सन्न मम ॥

ततस्तिलपात्रं पुरतः कृत्वा, सम्पूज्य विप्रञ्च पूजयित्वा, हस्ते कुशत्रयतिलाक्षतजलान्यादाय, देशकालौ संकीर्त्याऽमुकोऽहं मदीयजन्मदिने दीर्घायुष्यकाम एतांस्तिलान् यथागोत्रनाम्ने द्विजाय दातुमहमुत्सृजे ॥ इतिदद्यात् ॥

'ॐ सर्वभूतेभ्यो नमः'—

इति बलिं दत्त्वा, ततस्तण्डुलदानं कृत्वा, घृतच्छायादानञ्च कृत्वाऽऽचम्य—

ॐ मार्कण्डेयाय नमः ॥ ॐगोभ्यो नमः॥
ॐ ब्राह्मणेभ्यो नमः ॥

इतिप्रणम्य—

ॐअश्वत्थामा बलिर्व्यासो,हनुमाँश्च विभीषणः
कृपः परशुरामश्च, सप्तैते चिरजीविनः ॥

इति स्मृत्वा ब्राह्मणेभ्य आशिषं गृह्णीयात् । विप्रेभ्यो दक्षिणां दत्वा भोजयित्वा च यथासुखं विहरेत् ॥

इति जन्मोत्सव-पूजनम् ॥

❀ अथ गृहारम्भे वास्तुपूजनम् ❀

तत्र सपत्नीको यजमानः कृतनियमः शुचिः, पश्चिमा-

---

* ज्योतिः प्रकाशे—यथोक्तमौषधीस्नानं, ग्रहविप्रार्चनं तथा । ग्रहानुद्दिश्य होमो वा, त्रिधा शान्तिर्बुधैः स्मृता ॥ इति ॥

ऽभिमुख उपविश्याचम्य स्वस्तिवाचनञ्च पठित्वा, सर्षपाक्षतैर्भूतोत्सादनं कृत्वा, यथाविहितं गणपत्यादिदेवपूजनञ्च विधाय, कुशतिलयवजलान्यादाय सङ्कल्पंकुर्य्यात्-

ॐ अद्येत्यादि० अमुकनाम शर्मा, वर्मा, गुप्तोऽहं, सर्वोपद्रवशान्तिपूर्वकायुरारोग्य-पुत्रपौत्र-द्विपदचतुष्पद-धनधान्यादिसमृद्धये श्रीपरमेश्वरप्रीतिकामोऽहं गृहारम्भे शिलान्यासवास्तुपूजनकर्म्म करिष्ये ॥ इति सङ्कल्पः ॥

पुनर्यजमानः- 'आचार्यब्रह्मर्त्विक्सदस्यशान्तिकाध्याय-सप्तशत्यादिपाठकानां गणेशादिमन्त्रजापकानां ब्राह्मणानाञ्च यथाक्रमं वरणं कुर्यात् । पुनश्चाऽऽचार्य्यादिभ्योऽर्घ्यं *दत्वा गन्धाक्षतपुष्पैः सम्पूज्य-

'आचार्यत्वेन'-त्वामहं वृणे, 'वृतोऽस्मीति'-प्रत्युक्तिः ॥ आचार्य्यस्तु यथा स्वर्गे, शक्रादीनां बृहस्पतिः । यथा त्वं मम यज्ञेऽस्मिन्, आचार्यो भव सुव्रत ॥

इति सम्प्रार्थ्य, ऋत्विजश्च वृणुयादिति ॥ ततः संकल्प्य सर्वदिक्षु सर्षपाक्षतैर्भूतोत्सादनं कुर्य्यात् ॥

---

* आपः क्षीरं कुशाग्राणि, दध्यक्षततिलास्तथा । य वाः सिद्धार्थकाश्चैव, ह्यर्घोऽष्टांगः प्रकीर्त्तितः ॥

तत्र मन्त्रः-

ॐ अपक्रामन्तु भूतानि, पिशाचाः सर्वतोदिशं।
सर्वेषामवरोधेन, वास्तुशान्तिं समारभे ॥ १ ॥
भूतानि राक्षसा वापि, येऽत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु, वास्तुशान्तिं करोम्य-
हम् ॥ २ ॥ भूतप्रेतपिशाचाद्या, अपक्रामन्तु
राक्षसाः। स्थानादस्माद्व्रजन्त्वन्यत्स्वीक-
रोमि भुवन्त्विमाम् ॥ ३ ॥

इति भूतोत्सादनं कृत्वा, पञ्चगव्येन कुशैः सर्वगृहं सम्प्रोक्ष्य, तत्र यजमानहस्तेन हस्तमितां वास्तुवेदीं निर्माय तत्र "आग्नेय्यादिकोणचतुष्के"-

'ॐ विशन्तु भूतले नागा, लोकपालश्च सर्वतः।
अस्मिन् गृहेऽर्कतिष्ठन्तु, ह्यायुर्बलकराः सदा ॥

इति मन्त्रेण कोणचतुष्के कीलकारोपणं विधाय, एव-माग्नेय्यादि-कीलकारोपणक्रमेण तत्पार्श्वे सदीप माषबलिं दद्यात् ॥ तद्यथा [आग्नेय्याम्]-

ॐ अग्निभ्योऽप्यथ सर्पेभ्यो, ये चाऽन्ये
तान्समाश्रिताः। तेभ्यो बलिं प्रयच्छामि,
पुण्यमोदनमुत्तमम् ॥ १ ॥

नैर्ऋत्याम्–

ॐ नैर्ऋत्याऽधिपतिश्चैव, नैर्ऋत्यां ये च राक्षसाः। तेभ्यो बलिं प्रयच्छामि, पुण्यमोदनमुत्तमम् ॥ २ ॥

(वायव्याम्)–

ॐ नमो वै वायुरक्षोभ्यो, ये चान्ये तान्समाश्रिताः। बलिं तेभ्यः युयच्छामि, पुण्यमोदनमुत्तमम् ॥ ३ ॥

[ऐशानकोणे]-

ॐ रुद्रेभ्यश्चैव सर्पेभ्यो, ऐशान्यां ये समाश्चिताः। बलिं तेभ्यः प्रयच्छामि, गृह्णन्तु सततोत्सुकाः ॥ ४ ॥

इति बलिदानम् ॥ ततस्तत्र काशीतिपदपक्षे तु वेद्युपरि कुङ्कुमादिना वास्तुं सुवर्णरजतशलाकया लिखेत्। तत्र पश्चिमादारभ्य प्रागन्तोदक्संस्थाः समाङ्गुलद्वयान्तरा दशरेखाः कार्याः-

ॐ शान्तायै नमः ॥ १ ॥ ॐ यशोवत्यै नमः ॥ २ ॥ ॐकान्तायै नमः ॥ ३ ॥ ॐ विशालायै नमः ॥ ४ ॥ ॐ प्राणवाहिन्यै

नमः ॥ ५ ॥ ॐ सत्यै नमः ॥ ६॥ ॐ सुमनायै नमः ॥७॥ ॐ नन्दायै नमः ।८। ॐ सुभद्रायै नमः ॥९॥ ॐसुरथायै नमः ।१०।

ततश्च-दशनामभिर्दक्षिणारम्भा उदङ्गताः प्राक्संस्थाः-दशरेखाः कुर्य्यात् ।

ॐ हिरण्यायै नमः ॥ १ ॥ ॐ सुव्रतायै नमः ॥ २ ॥ ॐ लक्ष्म्यै नमः ॥ ३ ॥ ॐ विभूत्यै नमः ॥४॥ ॐ विमलायै नमः॥५॥ ॐ प्रियायै नमः ॥ ६ ॥ ॐ जयायै नमः ॥ ७ ॥ ॐ ज्वालायै नमः ॥ ८ ॥ ॐ विशोकायै नमः ॥९॥ ॐ इडायै नमः ॥१०॥

तत्रैकाशीति ८१ पदं चतुष्कोणयुतं वास्तुमण्डलं विरच्य-(वास्तुमण्डलपश्चिमदिशि स्थण्डिले कुण्डे वा पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य) ततो मण्डले गत्वा यथोक्तवर्णैः स्वं स्वं पदं वर्णयित्वा, शिख्यादि६४देवानावाहयेत् ॥ तन्नामोच्चारणैश्च पूजयेत् । यथा–

ॐ शिखिने नमः * । १ । ॐ पर्जन्याय नमः । २ । ॐ जयन्ताय नमः । ३ । ॐ कु-

---

* शिखिनं "आवाहयामि स्थापयामि ॥" एवं सर्वत्र योजनीयम् ॥

लिशाऽऽयुधाय नमः (इन्द्राय नमः)। ४। ॐ सूर्याय नमः। ५। ॐ सत्याय नमः।६। ॐ भृशाय नमः। ७। ॐ आकाशाय नमः (अन्तरिक्षाय नमः)। ८। ॐ [1]वायवे नमः।९। ॐ पूषणे नमः।१०। ॐ वितथाय नमः।११। ॐ गृहक्षताय नमः।१२। ॐ यमाय नमः। १३। ॐ गन्धर्वाय नमः। १४। ॐ भृङ्गराजाय नमः।१५। ॐ मृगाय नमः।१६। ॐ पितृगणेभ्यो नमः। १७। ॐ दौवारिकाय नमः। १८। ॐ सुग्रीवाय नमः।१९। ॐ पुष्पदन्ताय नमः (कुसुमदन्ताय नमः) २० ॐ वरुणाय नमः। २१। ॐ असुराय नमः।२२। ॐ शोषाय नमः। २३। ॐ [2]पापाय नमः। २४। ॐ रोगाय नमः। २५। ॐ अहये नमः (नागाय नमः)।२६। ॐ मुख्याय नमः।२७। ॐ भल्लाटाय नमः। २८। ॐ

---

१ अनिलाय नमः। अनलाय नमः।

२ पापयक्ष्मणे नमः।—इत्यपि पाठः।

सोमाय नमः ।२९। ॐ सर्पाय नमः (भुजगाय नमः ।३०। ॐ अदित्यै नमः । ३१ । ॐ दित्यै नमः ।३२। ॐ अद्भ्यो नमः ।३३। ॐ सावित्राय नमः ।३४। ॐ जयाय नमः ।३५। ॐ रुद्राय नमः । ३६ । ॐ अर्यम्णे नमः ।३७। ॐ सवित्रे नमः ।३८। ॐ विवस्वते नमः ।३९। ॐ विबुधाऽधिपाय नमः (इन्द्राय नमः । ४० । ॐ मित्राय नमः ।४१। ॐ राजयक्ष्मणे नमः ।४२। ॐ पृथ्वीधराय नमः ।४३। ॐ आपवत्साय नमः । ४४ ।

(मध्ये नवपदे पीतवर्णे)

ॐ ब्रह्मणे नमः ॥ ४५ ॥

[अथ मण्डलाद् बहिः श्वेतपरधौ, ईशानादिविदिक्षु चतुष्कोणेषु]

ॐ चरक्यै नमः । ४६ । ॐ विदार्य्यै नमः । ४७ । ॐ पूतनायै नमः । ४८ । ॐ पापराक्षस्यै नमः । ४९ ।

[अथ मण्डलाद्बहिः श्वेतपरधौ, पूर्वादि-चतुर्दिक्षु]

ॐ स्कन्दाय नमः । ५० । ॐ अर्यम्णे

नमः । ५१ । ॐ जृम्भकाय नमः ।५२। ॐ पिलिपिच्छाय नमः । ५३ ।

[अथ मण्डलाद्बहिः द्वितीयरक्तपरधौ पूर्वादिक्रमेण]

ॐ इन्द्राय नमः ।५४। ॐ अग्नये नमः ।५५। ॐ यमाय नमः ।५६। ॐ निर्ऋतये नमः । ५७ । ॐ वरुणाय नमः । ५८ । ॐ वायवे नमः ।५९। ॐ कुबेराय नमः ।६०। ॐ ईश्वराय नमः ।६१।

[पूर्वेशानयोर्मध्ये]

ॐ ब्रह्मणे नमः ॥६२॥

[निर्ऋतिपश्चिमयोर्मध्ये]

ॐ अनन्ताय नमः ।६३। (मध्ये-ईशान-भागे-ॐ वास्तुपुरुषाय नमः ।६४।तद्बाह्ये-त्रिविक्रममतेन सायुधलोकेशाऽऽवाहनम् ।)

इतिनाममन्त्रैर्देवानावाह्य सम्पूजयेत् ॥ ततः ॥ "ॐ महीद्यौ"रित्यादिभिर्मन्त्रैस्तत्र मध्ये धातुमयं कलशं संस्थाप्य, वरुणञ्च सम्पूज्य, कलशोपरि वास्तु प्रतिमामग्न्युत्तारण-प्राणप्रतिष्ठा पूर्वकमावाह्य पूजयेत्–

ॐ वास्तोष्पत–इति मैत्रावरुणिवशिष्ठ-

ऋषी, त्रिष्टुप्छन्दः, वास्तोष्पतिदेवता, वास्तोष्पतयावाहने विनियोगः ।।अथ ध्यानम्।।
वास्तुर्भुम्यर्पितशिरः, पुरप्रासादनायकः ।।
ब्रह्मपुत्रः शुभ्रवर्णो, धनुर्बाणधराभयी ।।
आवाहनम् ।। ॐ आवाहयाम्यहं वास्तुं, चतुर्बाहुं महाबलम् । विश्वम्भरं नागरूपं,भूभारार्पितमस्तकम् ।। ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदेशञ्चतुष्पदे । ॐ भूर्भुवःस्वः,भो वास्तो!इहागच्छेह-तिष्ठ,'ॐ वास्तवे नमः' ।

षोडशोपचारैः सम्पूजयेत् ।

कृतानेन पूजनेन शिख्यादिमण्डलदेवता-सहित-वास्तुपुरुषः प्रीयताम् न मम ।।

ततः प्रार्थयेत्-

ॐ पूजितोऽसि मया वास्तो ! होमाद्यैरर्चनैः शुभैः । प्रसीद पाहि विश्वेश !, देहि मे गृहजं सुखम् । १ । वास्तुदेव ! नमस्तुभ्यं,

भूशय्याऽभिरत प्रभो!। मद्गृहं धनधान्याद्यैः, समृद्धं कुरु सर्वदा ।। २ ।।

ततः ।। मण्डलस्यैशान्यांशिख्यादि चतुष्षष्टिवास्तुमण्डल देवताभ्यः पायसबलिं दद्यात् ।। ततो होमवेदीसमीपमागत्य पञ्चभूसंस्कारपूर्वकमग्निसंस्थाप्य* ग्रहान्संपूज्य कुशकण्डिकाञ्च बिधाय होमं कुर्य्यात् ।।

ॐ प्रजापतये स्वाहा-इदं प्रजापतये न मम ।।

इतिमनसा ।। १ ।।

ॐ इन्द्राय स्वाहा—इदमिन्द्राय न मम ।।

इत्याघारौ ।। २ ।।

ॐ अग्नये स्वाहा-इदमग्नये न मम ।। ३ ।।

ॐ सोमाय स्वाहा इदं ७ सोमाय न मम ।।

इत्याज्यभागौ ।। ४ ।।

ॐ भूः स्वाहा-इदमग्नये न मम ।। ५ ।। ॐ भुवः स्वाहा-इदं वायवे न मम ।। ६ ।। ॐ

---

* अथाऽग्निजिह्वानामानि—काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा। स्फुलिंगिनी विश्वरुचिस्तथा च चलायमाना इतिसप्तजिह्वाः ।।

जिह्वास्थानानि वसिष्ठकल्पे-कुण्डस्य पूर्वादिग्भागे कालीजिह्वा प्रकीर्तिता । आग्नेये तु कराल्याख्या, दक्षिणे तु मनोजवा ।। सुलोहिता नैॠते च, धूम्रवर्णा तु वारुणे । स्फुलिंगिनी तु वायव्ये सौम्ये विश्वरुचिस्तथा ।।

स्वः स्वाहा-इदं सूर्य्याय न मम ॥ ७ ॥

[एता महाव्याहृतयः] अथ वास्तुदेवताहोमः ॥ [पूर्वोक्त ६४ नाममन्त्रैर्जुहुयात्] यथा-

ॐ शिखिने स्वाहा । इदं शिखिने न मम ॥

इत्याद्यैस्तिलाज्यहोमं प्रत्येकमष्टसंख्यया कुर्य्यात् ॥ उत्तर पूजनं विधाय । ब्रह्मणान्वा रब्धः स्विष्टकृद्होमः ततः सर्वप्रायश्चित्तहोमः । हस्ते जलाक्षतपुष्पाण्यादाय-

अस्मिन्वास्तुपूजनकर्म्मणि ज्ञाताज्ञातादिसर्वदोषपरिहारार्थं कर्मसाद्गुण्यसिद्धये प्रायश्चित्तहवनञ्च करिष्ये ।

ब्रह्मणाऽन्वारब्धः प्रायश्चित्तहोमं कुर्यात्-

ॐ भूः स्वाहा—इदमग्नये न मम ॥ १ ॥

ॐ भुवः स्वाहा—इदं वायवे न मम ॥ २ ॥

ॐ स्वः स्वाहा—इदं सूर्य्याय न मम ॥ ३ ॥

ॐ त्वन्नो ऽअग्ने०-प्रमुमुग्ध्यस्मत्स्वाहा-इदमग्निवरुणाभ्यां न मम ॥ ४ ॥ ॐ स त्वन्नोऽअग्नेवमो०-मृहवो नऽएधि स्वाहा-इदमग्निवरुणाभ्यां न मम ।५। ॐ अयाश्चाग्ने०धेहि-भेषज ँ स्वाहा इदमग्नये,अयसे

च न मम ॥ ६ ॥ ॐ ये ते शतं व्वरुणं ये०-मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा-इदं वरुणाय, सवित्रे, विष्णवे, विश्वेभ्यो-देवेभ्यो, मरुद्भ्यः, स्वर्केभ्यश्च न मम । ७ ॥ ॐ उदुत्तमं व्वरुणपाश०—नागशोऽअदितये स्याम स्वाहा-इदं वरुणाय, आदित्याय, अदितये च न मम ॥ ८ ॥ ॐ प्रजापतये स्वाहा-इदं प्रजापतये न मम ॥ ९ ॥

अथ बलिदानम् ॥ हस्ते जलाक्षतमादाय-

ॐ अद्येत्यादि०कृतस्यास्य गृहवास्तुशान्तिकर्म्मणि साङ्गतासिद्ध्यर्थं दिग्पालपूजनपूर्वकं स्थापितदेवताभ्यो बलिदानमहं करिष्ये ॥ ॐ त्रातारमिन्द्रमिति-(पूर्वे) ॐ इन्द्राय नमः ॥१॥ ॐ त्वन्नोऽअग्ग्नये-इति-(आग्नेय्याम्) ॐअग्ग्नये नमः ॥ २ ॥ ॐ यमाय त्वेति-(दक्षिणे) ॐ यमाय नमः।३। ॐ असुन्वन्तमिति-(नैर्ऋत्याम्) ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ तत्त्वायामीति-

[पश्चिमे] ॐ वरुणाय नमः ॥ ५ ॥ ॐ आ नो नियुद्भिरिति–[वायव्याम्] ॐ वायवे नमः ॥ ६ ॥ ॐ वय ँ सोमेति-[ह्युत्तरे] ॐ सोमाय नमः ॥७॥ ॐ तमीशानमिति-[ईशान्याम्] ॐ ईशानाय नमः ॥८॥ ॐ ब्रह्म यज्ञानमिति–[पूर्वेशानयोर्मध्ये,ऊर्ध्वा-याम्]–ॐ ब्रह्मणे नमः ॥ ९ ॥ ॐ स्योना पृथिवीति – [निर्ऋतिपश्चिमयोर्मध्येऽधः-स्थायाम्]--ॐ अनन्ताय नमः ॥ १० ॥ भो दशदिग्पालदेवाः ! साङ्गाः सपरिवाराः सा-युधाः सशक्तिकाः एभिर्गन्धाद्युपचारैः वोऽहं पूजयामि । दशदिग्पालदेवेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि । भो दश-दिग्पालाः ! साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः ! इमं बलिं गृह्णीत । मम सकु-टुम्बस्याऽभ्युदयङ्कुरुत । आयुः कर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः

तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाः भवत। एभिर्बलिदानैर्दशदिग्पालाः प्रीयन्ताम्।

ततः वास्तुमण्डलस्थदेवतानां बलिदानम् ॥ तदनन्तरं गणेशमातृकानवग्रहरुद्रयोगिनीक्षेत्रपाल-पीठस्थसर्पादिदेवतानां बलिदानञ्चविधाय, क्षेत्रपालमहाबलिं हरेत् ॥ घटे वंशपात्रे वा चतुर्वर्तिकायुक्तं तैलदीपं निधाय, तत्र माषभक्तदध्योदन-ताम्बूलदक्षिणाकूष्माण्डादीन् संस्थाप्य, सिन्दूरकुङ्कुमाक्ष-तपताकादिभिश्च समलङ्कृत्य, संकल्पं कुर्यात्-

ॐ अद्येत्यादि०-वास्तुकर्म्मणः साङ्गता-सिद्ध्यर्थं क्षेत्रपालाय पूजनपूर्वकं बलिदान-महं करिष्ये।

अथ क्षेत्रपालावाहनम्-

ॐ न हि स्पशमित्यस्य विश्वामित्रऋषिस्त्रि-ष्टुप्छन्दः क्षेत्रपालो देवता, क्षेत्रपालपूजने ब-लिदाने च विनियोगः। ॐ न हि स्पशमविद-न्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः। एमेनमवृधन्नमृताऽअमर्त्त्यं व्वैश्वानरङ् क्षैत्रजित्याय देवाः। ॐ भूर्भुवः स्वः, क्षं क्षेत्र-पालाय नमः। क्षेत्रपालमावाहयामि, स्थाप-

यामि । ॐ क्षेत्रपालाय नमः ।

इत्यनेन षोडशोपचारैः पञ्चोपचारैर्वा सम्पूजयेत्, प्रार्थयेच्च-

ॐनमामि क्षेत्रपाल! त्वां, भूतप्रेतगणाऽधिप ।
पूजां बलिं गृहाणेमं, सौम्यो भवतु सर्वदा ।१
आयुरारोग्यतां देहि, निर्विघ्नं कुरु सर्वदा ।
मा विघ्नं माऽस्तु मे पापं मा सन्तु परिपन्थिनः २
सौम्या भवन्तु तृप्ताश्च, भूतप्रेताः सुखावहाः।

अथ ध्यानम्-

ॐ यं यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं, सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम् । दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्वरेखाकपालं, पं पं पं पापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालम् ॥

ॐ नमो क्षेत्रपाल ! दिव्याश्ववाहन ! भूतप्रेतपिशाचशाकिनी- डाकिनीवेतालादिपरिवृत ! दधिभक्तभक्षक! मदीयां पूजां गृहाण । अनया पूजया श्रीक्षेत्रपालःप्रीयताम् । क्षेत्रपालाय साङ्गाय सपरिवाराय दीर्घकेशाय

भूतप्रेतपिशाचवेतालादिसंयुताय सायुधाय सशक्तिकाय सवाहनाय, इमं सद्दीपमाषभक्तदध्योदनादिबलिं समर्पयामि। भो क्षेत्रपाल! दिशं रक्ष, बलिं भक्ष, मम समस्तपरिवारस्य कल्याणं सौख्यञ्च कुरु कुरु, आयुः कर्त्ता, क्षेमकर्त्ता, शान्तिकर्त्ता, पुष्टिकर्त्ता, तुष्टिकर्त्ता, निर्विघ्नकर्त्ता, वरदो भव। अनेन बलिदानेन श्रीक्षेत्रपालभैरवः प्रीयतामिति।

बलिं शिरसा प्रणम्य मार्गचतुष्पथे वा क्षेत्रे निदध्यात्। हस्तौ पादौ च प्रक्षाल्याचमनं कुर्य्यात्। ततः पूर्णाहुतिहोमः।

ॐ पूर्ण्णा दर्व्वि परापत सुपूर्ण्णा पुनरापत। व्वस्न्नेव व्विक्क्रीणावहा ऽ इषमूर्ज्ज ँ शतक्क्रतो-स्वाहा॥

पुनर्वसोर्द्धाराहोमं कृत्वा शेषाज्यं रुद्रकलशे त्यजेदिति॥

ततोऽभिषेकः-

प्रार्थयेच्च—पूजितोऽसि मया वास्तो! होमाद्यैरर्चनैः शुभैः। प्रसीद पाहि विश्वेश! देहि मे गृहजं सुखम्।१। वास्तुदेव! नम-

स्तुभ्यं, भूशय्याभिरत प्रभो !, मद्गृहं धन-धान्यादिसमृद्धं कुरु सर्वदा । २ । देवेश वास्तुपुरूष ! सर्वविघ्नविनाशक ! । शान्ति कुरु सुखं देहि, सर्वकामान्प्रयच्छ मे । ३ । ॐ शिख्यादिमण्डलदेवता सहित-वास्तुपुरुषाय नमः । ॥ इति गृहवास्तुपूजनम् ॥

❀ अथ सन्तानगोपाल-मन्त्रजपविधिः ❀

अथ तुलसीपादपतले श्रीगोपालमूर्तिसन्निधौ वा पूर्वाऽभिमुखोभूत्वा श्रीगोपालं ध्यायेत्-

ॐ करारविन्देन पदारविन्दं, मुखारविन्दे विनिवेशयन्तम् । वटस्य पत्रे पुटितं शयानं, बालं मुकुन्दं शिरसा नमामि ॥

ॐ अस्य श्रीसन्तानगोपालमन्त्रस्य श्रीनारद-ऋषिः, अनुष्टुप्छन्दः, श्रीबालकृष्णो देवता, मम (यजमानस्य वा) सन्तान-गोपालप्रसादसिद्धयर्थं जपे विनियोगः ॥ ॐ नारदऋषये नमः-शिरसि । १ । ॐ अनुष्टुप्छन्दसे नमः—मुखे । २ । ॐ श्रीबालकृष्ण-

देवतायै नमः—हृदये । ३ । ॐ विनियोगाय नमः—सर्वाङ्गे ॥ ४ ॥

इति-ऋष्यादिन्यासः ॥ ततः-

ॐ देवकीसुत ! इत्यङ्गुष्ठाभ्यां नमः । १ ।
ॐ गोविन्द ! इति—तर्जनीभ्यां नमः । २ ।
ॐ वासुदेव ! इति—मध्यमाभ्यां नमः । ३ ।
ॐ जगत्पते ! इत्यनामिकाभ्यां नमः । ४ ।
ॐ देहि मे तनयं कृष्ण ! इति—कनिष्ठिकाभ्यां नमः । ५ । ॐ त्वामहं शरणं गतः—इति-करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥

इति-करन्यासाः ॥ ततः-

ॐ देवकीसुत ! इति—हृदयाय नमः । १ ।
ॐ गोविन्द ! इति—शिरसे स्वाहा । २ ।
ॐ वासुदेव ! इति—शिखायै वषट् । ३ ।
ॐ जगत्पते ! इति—कवचाय हुम् । ४ ।
ॐ देहि मे तनयं कृष्ण ! इति—नेत्रत्रयाय वौषट् । ५ । ॐ त्वामहं शरणं गत—इत्यस्त्राय-फट् ॥ ६ ॥

इति-हृदयादिषडङ्गन्यासाः ॥ अथवा-

ॐ देवकीसुत गोविन्द ! अङ्गुष्ठाभ्यां नमः १
ॐ वासुदेव जगत्पते ! तर्जनीभ्यां नमः ।२।
ॐ देहि मे तनयं कृष्ण ! मध्यमाभ्यां नमः। ३
ॐ त्वामहं शरणं गतः-अनामिकाभ्यां नमः।४
ॐ देवकी सुत गोविन्द वासुदेव जगत्पते-कनिष्ठिकाभ्यां नमः ।५। ॐ देहि मे तनयं कृष्ण, त्वामहं शरणं गतः-करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति ॥

एवं हृदयादिषडङ्गन्यासा: ॥ मानसोपचारैः सम्पूज्य, ध्यायेत्।

अथ ध्यानम्-

ॐ विजयेन युतो रथस्थितः, प्रसवानीय समुद्रमध्यतः । प्रददत्तनयान् द्विजन्मने, स्मरणीयो वसुदेवनन्दनः ॥ १ ॥

मानसोपचारैः सम्पूज्य ध्यायेत् ॥ अथ मन्त्रोद्धारः-

'ॐ क्लीम्' देवकीसुत ! गोविन्द ! वासुदेव ! जगत्पते ! देहि मे तनयं कृष्ण!, त्वामहं शरणं गतः ।

इति ॥ मन्त्रमिमं सभक्त्या तुलसीपादपतले * प्रजप्य,

---

*अस्य पुरश्चरणं लक्षजपस्तेन पुत्रप्राप्तिर्भवति ॥ जपस्य दशांशो मन्त्रहोमस्तद्दशांशं मार्जनं तर्पणञ्च ॥

हृदयादिषडङ्गन्यासाँश्च विधाय, श्रीबालकृष्णं [सन्तान-गोपालं] ध्यायेत् ॥

अनेन जपाख्येन कर्मणा श्रीसन्तानगोपालः प्रीयताम् ।

॥ इति श्रीसन्तानगोपालमन्त्रजपविधिः ॥

❀ अथ अश्वत्थपूजा-विधिः ❀

आचम्य 'प्राणानायम्य' देशकालौ स्मृत्वा सङ्कल्पं कुर्यात्-

मम समस्तपापक्षयपूर्वकाऽभीष्टसिद्धिद्वारा-श्रीपरमेश्वरप्रीत्यर्थमश्वत्थपूजां करिष्ये ।

इतिसङ्कल्प्य, मङ्गलपाठं कृत्वा, पूर्वं गणपतिं विष्णुञ्च स्मरेत् । ततो ध्यानम्-

**ॐ अश्वत्थाय वरेण्याय, सर्वैश्वर्यप्रदायिने ।
अनन्तशक्तिरूपाय, वृक्षराजाय ते नमः ॥
ॐ अश्वत्थे वो निषदनम्पर्णे वो वसति-ष्कृता । गोभाजऽ इत्किलासथयत्सनवथ पूरुषम् ॥ ॐ अश्वत्थाय नमः ॥**

इतिध्यायामि ॥ पूजयामि-

**ॐ मूलतो ब्रह्मरूपाय, मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय, सुस्वप्नफलदायिने ॥
ॐ अश्वत्थाय नमः ॥**

इत्यासनं समर्पयामी ।। ततः-

ॐ अग्निगर्भः शमीगर्भो, देवगर्भःप्रजापतिः।
हिरण्यगर्भो भूगर्भो यज्ञगर्भो नमोऽस्तु ते ।।

इति पादयोः पाद्यं समर्पयामि ।। ततः-

आयुर्बलं यशो वर्चः, प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञाञ्च मेधाञ्च, त्वन्नो देहि वनस्पते ।।

इत्यर्घ्यं समर्पयामि । ततः-

त्वं मुक्तिफलदश्चैव, शीतलश्च वनस्पते ।
त्वामाराध्य नरो विंद्यादैहिकामुष्मिकं फलम्।

इत्याचमनीयं समर्पयामि ।। ततः-

चलद्दलाय वृक्षाय, सर्वदा ऽऽश्रितविष्णवे ।
बोधतत्त्वाय देवाय ह्यश्वत्थाय नमो नमः ।।

इति स्नानीयं समर्पयामि ।। ततः-

एकादशात्मरुद्रोऽसि, वसुनाथशिरोमणिः ।
नारायणोऽसि देवानां, वृंक्षराजोऽसि पिप्पल!

इति वस्त्रं समर्पयामि ।। ततः-

क्षीरदस्त्वञ्च येनेह, येन श्रीस्त्वां निषेवते ।
सत्येन तेन वृक्षेन्द्र, मामपि श्रीर्निषेवताम् ।।

इति यज्ञोपवीतमाचमनीयञ्च समर्पयामि ।। ततः-

श्रीखण्डं चन्दनं दिव्यं, गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ ! गृह्यतां देव ! पिप्पल! ॥

इति गन्धं समर्पयामि ॥ ततः-

यं दृष्ट्वा मुच्यते रोगैः, स्पृष्ट्वा पापैः प्रमुच्यते
यदाश्रयाच्चिरञ्जीवी, तमश्वत्थं नमाम्यहम्

इति पुष्पाणि समर्पयामि ॥ ततः-

वनस्पतिरसोद्भूतः, सर्वौषधिविजृम्भितः ।
आघ्रेयः सर्वदेवानां, धूपोऽयं प्रतिगृह्यताम् ॥

इति धूपमाघ्रापयामि ॥ ततः-

साज्यञ्च वर्तिसंयुक्तं, वह्निना योजितं मया।
दीपं गृहाण देवेश ! मम ज्ञानप्रदो भव ॥

इति दीपं दर्शयामि ॥ ततः-

नैवेद्यं गृह्यतां देव !, भक्तिं मे ह्यचलां कुरु ।
ईप्सितञ्च वरं देहि, परत्रेह परां गतिम् ॥

इति नैवेद्यमाचमनीयञ्च समर्पयामि ॥ ततः-

आयुःप्रजां धनंधान्यं, सौभाग्यं सर्वसम्पदम्
देहि देव महावृक्ष !, त्वामहं शरणं गतः ॥

इति पूगीफलं-ताम्बूलञ्च समर्पयामि ॥ ततः-

ऋग्यजुः साममन्त्रात्मा, सर्वरूपी परात्परः।
अश्वत्थो वेदमूलोऽसावृषिभिःप्रोच्यते सदा।

इति दक्षिणां समर्पयामि ॥ ततःकर्पूरेण नीराजनञ्च कुर्यात्-

ॐ अश्वत्थ ! यस्मात्त्वयि वृक्षराज !,नारा-
यणस्तिष्ठति सर्वकालम् । अतःश्रुतस्त्वं सततं
तरूणां, धन्योऽसि चाऽरिष्टविनाशकोऽसि ॥

इति पुष्पाञ्जलिं समर्पयामि ॥ ततः-

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः
तेषा ँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
ॐ यानि कानि च पापानि,ज्ञाताऽज्ञातकृतानि
च। तानि सर्वाणि नश्यन्तु,प्रदक्षिण पदे पदे॥

इति-सप्तप्रदक्षिणाः कार्य्याः । पुनः प्रार्थयेत्-

आवाहनं न जानामि,न जानामि विसर्जनम्।
पूजाञ्चैव न जानामि,क्षमस्व परमेश्वर! ॥

इत्येवं षोडशोपचारैः सम्पूज्य प्रणमेत् ॥ शुभम् ॥

❀ अथ सरस्वती पूजनम् ❀

आचम्य प्राणानायम्य-(ॐ अद्येत्यादि०) संकल्प्य, ततः-

ॐ सरस्वतीति-प्रजापतिऋ षिर्जगती छन्दः,

सरस्वतीद्देवता, सरस्वत्यावाहने विनियोगः।

अथ ध्यानम्-

शुद्धां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं, वीणापुस्तकधारिणीमभयदाञ्जाड्यान्धकारापहाम् ॥ हस्ते स्फाटिकमालिकां विदधतीं, पद्मासने संस्थितां, वन्दे तां परमेश्वरीं भगवतीं, बुद्धिप्रदां शारदाम् ॥ वीणाधरे विपुलमङ्गलदानशीले, भक्तार्तिनाशिनि विरञ्चिहरीशवन्द्ये। कीर्तिप्रदेऽखिलमनोरथदे महार्हे, विद्याप्रदायिनिसरस्वति नौमि नित्यम्।

अथाऽऽवाहनम्-

आवाहयाम्यहं देवीं, कुन्देन्दुधवलद्युतिम् ॥ सरस्वतीं भव्यरूपां, वाङ्मालिन्यहरां शुभाम् ॐ सरस्वती योन्यागर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति। अपा ँ रसेन व्वरुणो न साम्नेन्द्र ँ श्रियै जनयन्नप्सु राजा ॥ १ ॥ ॐ याम्मेधान्देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ग्ने मेधाविनं कुरु स्वाहा २

ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः।
सरस्वती तु पञ्चधासोदेशेभवत्सरित् ॥३॥
ॐ भूर्भुवः स्वः भो ! सरस्वतीहागच्छेह तिष्ठेति "ॐ सरस्वत्यै नमः" ।

यथोपलब्धोपचारैर्वा सम्पूज्य प्रार्थयेत् ॥

ॐ सरस्वति महाभागे। विद्ये कमललोचने ! विद्यारूपे विशालाक्षि, विद्यां देहि नमोऽस्तु ते ॥ इति ॥

❀ श्रीलक्ष्मीपूजनम् ❀

श्रीगणेशादिदेवान्सम्पूज्य, [ॐ अद्येत्यादि०] इति-सङ्कल्प्य, ध्यायेत्-

ॐ या श्रीः पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी, गम्भीरावर्त्तनाभिः स्तन-भरणनता शुभ्रवस्त्रोत्तरीया ॥ या लक्ष्मी-र्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेम-कुम्भैः, सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥१॥

आवाहनम्-

सर्वलोकस्य जननीं, शूलहस्तां त्रिलोचनाम् ।

सर्वदेवमयीमीशां, देवीमावाहयाम्यहम्* ॥
ॐ श्रीश्चच ते लक्ष्मीश्चच पत्न्यावहोरात्रे पाश्श्वे नक्षत्राणि रूपमश्शिवनौ व्यात्तम् । इष्णन्निषाणामुम्म ऽ इषाण सर्व्वलोकम्म-ऽ इषाण ॥ ॐ श्रीमहालक्ष्म्यै नमः ॥

ततः पाद्यादिभिः सम्पूज्य, प्रार्थयेत्-

ॐ पद्मासनस्थिते देवि, परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥

❀ अथ महामृत्युञ्जयजपविधिः ❀

आचम्य प्राणानायम्य शान्तिपाठं पठित्वा ॐ सुमुखश्चे-त्यादिना गणपतिं ध्यात्वा सङ्कल्पं कुर्यात्-

ॐ अद्येत्यादि–देशकालौ संकीर्त्य–मम चात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थ-ममुकयजमानस्य, मे शरीरे वाऽमुकपीडा-निराकरणद्वारा–सद्यः सुखमारोग्यदीर्घायु-प्राप्त्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीतये ऽमुक-संख्यापरिमितं श्रीमहामृत्युञ्जयमन्त्रजप-

---

* अथ कमलामन्त्रः [शाक्तप्रमोदे]- ॐ ऐं ह्रीं श्रीं क्लीं ह्सौः जगत्प्रसूत्यै नमः ॥ इति ॥

महं करिष्ये ॥ इति संकल्प्य ॥

शिवार्चनं कृत्वादौ-ऋष्यादिन्यासं कुर्य्यात्-

ॐ अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वसिष्ठऋषिः श्रीमृत्युञ्जयरुद्रो देवता, अनुष्टुप्छन्दः । ह्रौं बीजम्, जूं शक्तिः, सः कीलकं, श्रीमहामृत्युञ्जयप्रीत्यर्थे जपे-विनियोगः ॥ ॐ वसिष्ठर्षये नमः—'शिरसि' ॥ १ ॥ ॐ अनुष्टुप्छन्दसे नमो—'मुखे' ॥ २ ॥ ॐ महामृत्युञ्जयरुद्रदेवतायै नमो—'हृदये' ॥ ३ ॥ ॐ ह्रौं बीजाय नमो—'गुह्ये' ॥ ४ ॥ ॐ जूं शक्तये नमः—'पादयोः' ॥ ५ ॥ ॐ सः कीलकाय नमः 'सर्वांगेषु' ॥ ६ ॥

मूलमन्त्रेण प्राणायामं करशुद्धिञ्च कृत्वा, करन्यासः-

ॐ त्र्यम्बकम्-अङ्गुष्ठाभ्यां नमः ॥ १ ॥ ॐ यजामहे—तर्जनीभ्यां नमः ॥ २ ॥ ॐ सुगन्धिम्पुष्टिवर्द्धनम्-मध्यमाभ्यां नमः॥ ३॥ ॐ उर्व्वारुकमिव बन्धनात्—अनामिकाभ्यां नमः ॥ ४ ॥ ॐ मृत्योर्मुक्षीय-कनिष्ठाभ्यां

नमः ॥ ५ ॥ ॐ मामृतात्-करतलकरपृष्ठा-भ्यां नमः ॥ ६ ॥

॥ एवं हृदयादिन्यासः ॥ ततः पदन्यासं कुर्यात्-

ॐ त्र्यम्बकं–शिरसि, यजामहे–भ्रुवोः-सुगन्धि-नेत्रयोः, पुष्टिवर्द्धनं–मुखे, उर्व्वारुकं–गण्डयोः, इव-हृदि, बन्धनाज्जठरे, मृत्योर्लिङ्गे, मुक्षीयोर्वोः, मा-जान्वोः, अमृतात्पादयोः ॥ इति पदन्यासाः ॥

अथ मूलेन व्यापकं कृत्वा ध्यानम्-

ॐमहामृत्युञ्जयशिवाय नमः ॥ हस्ताम्भोजयुगस्थ कुम्भयुगलादुद्धृत्य तोयं शिरः, सिञ्चन्तं करयोर्युगेन दधतं, स्वांके सकुम्भौ करौ। अक्षसृङ् मृगहस्तमम्बुजगतं मूर्द्धस्थ चन्द्रस्त्रवत्पीयूषोत्त तनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम् ॥१॥ चन्द्रोद्भासितमूर्धजं सुरपतिं पीयूषपात्रं वहद्धस्ताब्जेन दधत् सुदिव्यनमलं हास्यास्यपंकेरुहम्। सूर्य्येन्द्वग्नि-विलोचनं करतले, पाशाक्षसूत्राङ्कुशाम्भोजं

बिभ्रतमक्षयं पशुपतिं मृत्युञ्जयं संस्मरे ।२॥

ततः प्रार्थयेत्-

ॐमृत्युञ्जय!महादेव!त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैर्मुक्तिं देहि दयानिधे॥१॥

इतिसम्प्रार्थ्य देवं मानसोपचारैः सम्पूजयेत् । तद्यथा-

ॐ लं पृथिव्यात्मकं-गन्धं समर्पयामि। ॐ हं आकाशात्मकं-पुष्पं समर्प० ॥ ॐ यं वायवात्मकं-धूपं समर्प० ॥ ॐ रं तेजोरूपं-दीपं समर्प०॥ ॐ वं अमृतात्मकं-नैवेद्यं समर्प० ॥ ॐ सं सर्वात्मकं—मन्त्रपुष्पाणि समर्प० ॥

ततः-'ॐ एष ते रुद्र'-तिमन्त्रेण लिङ्गमुद्रां प्रदर्शयेत्-

ॐ एष ते रुद्द्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहैष ते रुद्द्र भाग ऽअखुस्ते पशुः ।

इत्यनेन लिङ्गमुद्रां प्रदर्श्य, रुद्राक्षमालां मन्त्रेणाऽभिमन्त्र्य शिवञ्च मनसि स्मरन्, जपं कुर्य्यात्-

(अथ मन्त्रोद्धारः*)-ॐ हौं जूँ सः ॐ भू-

* मंत्रस्य प्रकारान्तरं—ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ 'त्र्यम्बकं यजामहे०-मामृतात्' ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ ॥

र्भुवः स्वः । त्र्यम्बकँ यजामहे सुगन्धिम्पुष्टि-वर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्योर्मु-क्षीय मामृतात् । भूर्भुवः स्वरों जूं सः हौंॐ ।

ततः पूर्ववदुत्तरन्यासञ्च कृत्वा, प्रार्थयेत्-

ॐगुह्यातिगुह्यगोप्ता त्वं, गृहाणास्मत्कृतञ्जपम्
सिद्धिर्भवतु मे देव, त्वत्प्रसादान्महेश्वर ! ॥
मृत्युञ्जय ! महारुद्र ! त्राहि मां शरणागतम्।
जन्ममृत्युजरारोगैः, पीडितं कर्मबन्धनैः ॥

इति संप्रार्थ्य-

"अनेन श्रीमहामृत्युञ्जयजपाख्येन कर्मणा श्रीमहामृत्युञ्जयः प्रीयता"-मित्यर्पयेत् ।

ततो जपसाङ्गतासिद्ध्यर्थं दशांशहोमतर्पणमार्जनब्राह्मण-भोजनानि कुर्य्यात् ॥ * अथ अमृतसञ्जीवनीमन्त्रः * ॥ 'तन्त्रसारे'-

ॐ तत्सवितुर्वरेण्यं त्र्यम्बकँ य्यजामहे सुगन्धिम्पुष्टिवर्द्धनं भर्गोदेवस्य धीमहि । उर्व्वारुकमिव बन्धनाद्धियो यो नः प्रचोद-यान्मृत्योर्मुक्षीय मामृतात् ।।

ॐ शिवार्पणमस्तु ।। इति ।।

❀ अथ ब्रह्मयज्ञः ❀

तत्र प्राङ्मुखो भूत्वाऽऽसनशुद्धिं विधायाचमनं कुर्य्यात्-

ॐ केशवाय नमः ॥ १ ॥ ॐ नारायणाय नमः ॥ २ ॥ ॐ माधवाय नमः ॥ ३ ॥

पुनर्हस्तप्रक्षालनम्-

ॐगोविन्दाय ममः ॥ 'ॐपवित्रेस्थो०'-

इतिमन्त्रेण पवित्रधारणम् ॥ ततः प्राणानायम्य ॥ देशकालौ सङ्कीर्त्य सङ्कल्पं कुर्य्यात्-

ॐ अद्यामुकगोत्रः (अमुकनाम) शर्मा, वर्मा,गुप्तो वाऽहं ॐ तत्सत्परमेश्वरप्रीत्यर्थं ब्रह्मयज्ञेनाऽहं यक्ष्ये ॥

दर्भेषु दर्भपाणिः ब्रह्मयज्ञाऽऽरम्भे यथाविधिः स्नात्वा, छन्दपुरुषनिर्णोदनः शरीरे न्यसेत्-

ॐ तिर्यग्विलाय चमस उर्द्ध्वबुध्नाय छन्दपुरुषाय नमः (शिरसि) ॥ ॐ गौतम-भरद्वाजाभ्यां नमः (नेत्रयोः) ॥ ॐ विश्वा-मित्र–जमदग्निभ्यां नमः (श्रोत्रयोः) ॥ ॐ वसिष्ठ–कश्यपाभ्यां नमः (नासा पुटयोः) ॥ ॐ अत्रये नमः (वाचि) ॥

[उदकस्पर्शः]-

ॐ गायत्र्यै-छन्दसे नमः,ॐ अग्नये नमः (ललाटे) ॥ ॐ उष्णिहे—छन्दसे, ॐ सवित्रे नमः (ग्रीवायाम्) ॥ ॐ बृहत्यै-छन्दसे नमः, ॐ बृहस्पतये नमः (पृष्ठवंशे) ॥ ॐ बृहद्र-थतराभ्यां नमः, ॐ द्यावापृथिवीभ्यां नमः (बाह्वोः) ॥ ॐ त्रिष्टुभे—छन्दसे नमः, ॐ इन्द्राय नमः (मध्ये) ॥ ॐ जगत्यै छन्दसे नमः, ॐ आदित्याय नमः (श्रोण्योः) ॥ ॐ अतिछन्दसे नमः, ॐप्रजापतये नमः(लिङ्गे)।

हस्त-प्रक्षालनम्-

ॐयज्ञा यज्ञिय-छन्दसे नमः,ॐ वैश्वान-राय नमः (गुदे) ॥

हस्त प्रक्षालनम्-

ॐपंक्त्यै-छन्दसे नमः, ॐ मरुद्भ्यो नमः (जान्वोः) ॥ ॐद्विपदायै-छन्दसे नमः, ॐ विष्णवे नमः (पादयोः) ॥ ॐ विच्छन्दसे नमः, ॐवायवे नमः(नासापुटस्थप्राणेषु) ॥

ॐन्यूनाक्षराय-छन्दसे नमः, ॐअद्भ्यो नमः (सर्व्वाङ्गेषु) ॥

एवं सर्वाङ्गेषु योजयित्वा वेदमयः सम्पद्यते ॥ शापानुग्रहसमर्थो भवति ॥ ब्राह्मं तेजश्च वर्द्धते ॥ न कुतश्चिद्भयं विन्दते ॥ ऋङ्मयो यजुर्मयः साममय-अथर्वमयस्तेजोमयोऽमृतमयः सम्भूय ब्रह्मैवाभ्येति ॥ ऋगादिरूपो भूत्वा ब्रह्मैवाभ्येति ॥

ॐ इषे त्वा दिषु खं ब्रह्मान्तेषु दशप्रणवसहितेषु याः क्रियास्तत्र विवस्वानृषिः, प्रजापतिर्देवता, सर्वाणि छन्दाꣳसि, सर्वाणि सामानि, प्रतिलिङ्गोक्तादेवता, ब्रह्मयज्ञारम्भे विनियोगः ॥

दक्षिणपादोपरि वामपादं निधाय, हस्ते जलाक्षत दर्भान् गृहीत्वा, वामहस्तोपरि दक्षहस्तं निधाय–

ॐ ॐकारस्य ब्रह्माऋषिर्दैवो गायत्री–छन्दः, श्रीपरमात्मादेवता। ॐ भूर्भुवः स्वरिति महाव्याहृतीनां क्रमेण गायत्र्युष्णिगनुष्टुप्छन्दांसि, अग्निवायुसूर्य्या देवता। ॐ तत्सवितुरिति–विश्वामित्रऋषिः, गायत्री–

छन्दः, सविता–देवता, ब्रह्मयज्ञपाठारम्भे विनियोगः ॥

हरिः ॐ॥ ॐ भूर्भुवः स्वः । ॐ तत्सवितुर्व्वरेण्ण्यम्भर्ग्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॐ॥ ॐ इषे त्त्वोर्ज्जे त्त्वा व्वायवस्त्थ देवो व्वः सविता प्रार्प्पयतु श्रेष्ठतमाय कर्म्मण ऽआप्प्यायद्ध्व मग्घ्न्या ऽइन्द्राय भागम्प्रजावतीरनमीवा ऽअयक्ष्मा मावस्तेन ऽईशत माघश ᳪ सोद्ध्रुवा ऽअस्मिन्न्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥ १॥ ॐ व्वसोः पवित्त्रमसि शतधारंव्वसोः पवित्त्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः पवित्त्रेण शतधारेण सुप्प्वा कामधुक्षः ॥ २ ॥ ॐ हिरण्मयेन पात्त्रेण सत्यस्यापि हितम्मुखम् । योऽसावादित्ये पुरुषः सोऽसावहम् ॥ ॐ खम्ब्रह्म ॥ ॐ व्व्रतमुपैष्यन्नन्तरेणा हवनीयञ्च गार्हपत्यञ्च प्राङ्तिष्ठन्नप ऽउपस्पृशति ।

तद्वदप उपस्पृशत्यमेध्यो वै पुरुषो यदनृतं व्वदति तेन पूतिरन्तरतो मेध्यावाऽआपो मेध्यो भूत्वा व्व्रतमुपायानीति पवित्रं वाऽ-आपः पवित्रपूतो व्व्रतमुपायानीति तस्मा-द्वाऽअप उपस्पृशति। सोऽग्निमेवाभीक्षमाणो व्व्रतमुपैति॥ ॐ प्राश्नीपुत्रादासुरिवासिनः। प्राश्नीपुत्र ऽआसुरायणादासुरायण ऽआ-सुरेरासुरिर्य्याज्ञवल्क्याद्याज्ञवल्क्य ऽउद्दा-लकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिः कुश्रेः कुश्रिर्व्वाजश्रवसो व्वाजश्रवा जिह्वा-वतो बाध्यो गो जिजह्वान्बाध्यो गोऽसि-ताद्वार्षगणादासितो व्वार्षगणो हरिता-त्कश्यपाद्धरितः कश्यपं शिल्पात्कश्यपा-च्छिल्पः कश्यपः कश्यापन्नैर्ध्रुवेः कश्य-योनैर्ध्रुविर्व्वाचो व्वागम्भिण्या ऽअम्भि-ण्यादित्यादादित्यानीमानि शुक्लानि यजू-ꣳषि व्वाजसने येन याज्ञवल्क्येनाऽऽख्या-यन्ते ॥ ॐ अग्निमीले पुरोहितम्यज्ञस्य

देवमृत्त्विजम् । होतारं रत्नधातमम् ॥ ॐ
२ ३ १ २ ३ १ २ ३ २ ३ १
अग्ग्न आ या हि बीतये गृणानो हव्व्य
१ १ २ ३ १ २
दातये । नि हो ता सत्सि बर्हिषि ॥ ॐ
शन्नो देवीरभिष्टृयऽ आपो भवन्तु पीतये ।
शँ य्योरभिस्स्रवन्तु नः ॥

तत–अङ्गानि पठेत्–

अथाऽनुवाकान्वक्ष्यामि ॥ मण्डलं दक्षिण-मक्षि हृदयम् ॥ अथातः स्त्रैस्वर्यलक्षणं व्याख्यास्यामः ॥ अथातोऽधिकारः फल-युक्तानि कर्म्माणि ॥ अथातो गृह्यस्थाली-पाकानां कर्म्म । स्वरसंस्कारयोश्छन्दसि नियमः ॥ (वृद्धिरादैच्) स्थानाकृति-जातिगुण-क्रियारूप-विशेषेभ्योऽन्यत्वम् । (सामाम्नाय समाम्नातः) मय-रस-तेज मनलग सम्मितम् । पञ्चसम्वत्सरमयं युगाऽध्यक्षम् ॥ अथातो धर्म्मजिज्ञासा ॥ अथातो ब्रह्मजिज्ञासा । योगीश्वरो याज्ञ-

वल्क्यः। नारायणं नमस्कृत्य। इति विद्या तपो योनिरयोनिर्विष्णुपीडितः। वाग्यज्ञे-नार्चितो देवः, प्रीयतां मे जनार्दनः ॥इति॥

अनेन श्रीब्रह्मयज्ञाऽऽख्येन कर्म्मणा भगवान्परमेश्वरः प्रीयताम् ॥ शम् ॥

❀ अथ तर्पण-प्रयोगः ❀

ततः स्नात्वा शुद्धधौतवाससी परिधाय, चन्दनभस्मादिना स्वमस्तके तिलकं कृत्वा, सन्ध्यावन्दनब्रह्मयज्ञञ्च विधाय, कुशासने पूर्वाऽभिमुखश्चोपविश्य * पवित्रधारणं कृत्वा स्वशाखोक्ततर्पणं कुर्यात् ॥ [तत्र कातीय-देवर्षिपितृ-तर्पणविधिः]--

देशकालौ च सङ्कीर्त्याद्य-मम समस्तपितॄणां वैकुण्ठ-लोकप्राप्त्यर्थमात्मनश्च मुक्तिप्राप्तये, श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीपरमेश्वरप्रीत्यर्थञ्च देवर्षि-मनुष्य-पितृतर्पण-महं करिष्ये ॥ इति सङ्कल्प्य-

स्ववामहस्ते जलमादाय दक्षिणहस्तेनाच्छाद्य दक्षिणजानौ च निधाय--

---

* द्वौ दर्भौ दक्षिणे हस्ते, सव्ये त्रीणि कुशानि च।
पादमूले शिखायान्तु, तथा यज्ञोपवीतके ॥१॥

ॐ विश्वान्देवानावाहयिष्ये । आवाहय। ॐ व्विश्श्वेदेवा सऽआगत शृणुता मऽइद ँ हवम् । एदम्बर्हिर्निषीदत ॥ १ ॥ ॐ व्विश्श्वेदेवाः शृणुतेम ँ हवम्मे येऽ अन्तरिक्षे य ऽ उपविष्ठ । ये अग्निजिह्वा ऽ उतवा यजत्राऽ आसद्यास्मिन्बर्हिषि मादयध्वम्। २। ॐ आगच्छन्तु महाभागा, विश्श्वेदेवा महाबलाः । तर्पणेऽविहिता येऽत्र, सावधाना भवन्तु ते ॥ ॐ भवामः ॥

पूर्वंगृहीतं जलमेकस्मिन्पात्रे क्षिपेत् ।

❀ अथ देव तर्पणम् ❀

पुनः-बायें कन्धे पर यज्ञोपवीत रखकर [सव्य होकर] देवतीर्थ [अंगुलियों के अगले-भाग] से पूर्वाग्र-कुशा यव अक्षत अपनी अञ्जलि में लेकर २९ ब्रह्मादि-देवताओं का, तथा मरीच्यादि १० देवताओं का एक-एक अञ्जलि-जल द्वारा तर्पण करै । यथा-

ॐ ब्रह्मा तृप्यताम् १ । ॐ विष्णुस्तृप्यताम् १ । ॐ रुद्रस्तृप्यताम् १ । ॐ प्रजापतिस्तृप्यताम् १ । ॐ देवास्तृप्य-

न्ताम् १। ॐ छन्दांसि तृप्यन्ताम्१। ॐ वेदास्तृप्यन्ताम् १। ॐ ऋषयस्तृप्यन्ताम् १। ॐ पुराणाचार्य्यास्तृप्यन्ताम् १। ॐ गन्धर्वास्तृप्यन्ताम् १। ॐ इतराचार्य्यास्तृप्यन्ताम् १। ॐ सम्वत्सरः सावयवस्तृप्यन्ताम् १। ॐ देव्यस्तृप्यन्ताम् १। ॐ अप्सरसस्तृप्यन्ताम् १। ॐ देवानुगास्तृप्यन्ताम्१।ॐनागास्तृप्यन्ताम् १। ॐ सागरास्तृप्यन्ताम् १। ॐ पर्वतास्तृप्यन्ताम् १। ॐ सरितस्तृप्यन्ताम् १। ॐ मनुष्यास्तृप्यन्ताम् १। ॐ यक्षास्तृप्यन्ताम् १। ॐ रक्षांसि तृप्यन्ताम् १। ॐ पिशाचास्तृप्यन्ताम् १। ॐ सुपर्णास्तृप्यन्ताम् १। ॐ भूतानि तृप्यन्ताम् १। ॐ पशवस्तृप्यन्ताम् १। ॐ वनस्पतयस्तृप्यन्ताम् १। ॐ ओषधयस्तृप्यन्ताम् १। ॐ भूतग्रामश्चतुर्विधस्तृप्यन्ताम् १ ॥

इति देवतर्पणम् ॥ १ ॥

❀ अथ ऋषितर्पणम् ❀

पूर्वोक्तप्रकारेणैव ।। ॐ मरीचिस्तृप्यताम् १। ॐ अत्रिस्तृप्यताम् १। ॐ अङ्गिरास्तृप्यताम् १। ॐ पुलस्त्यस्तृप्यताम् १। ॐ पुलहस्तृप्यताम् १। ॐ क्रतुस्तृप्यताम् १। ॐ प्रचेतास्तृप्यन्ताम् १। ॐ वसिष्ठस्तृप्यताम् १। ॐ भृगुस्तृप्यताम् १। ॐ नारदस्तृप्यताम् १ ।। इति ।।

पुनः निवीती होकर अर्थात् अपने यज्ञोपवीत को कंठ में माला के तुल्य रखकर, प्रजापति [काय] तीर्थ [कनिष्ठांगुलिमूल] से उत्तराऽभिमुख होकर, उत्तराग्रकुशा एवं यव अपनी अञ्जलि में लेकर, ७ सनकादि ऋषियों को दो-दो अञ्जलि-जल अर्पण करै। यथा-

ॐ सनकस्तृप्यताम् २। ॐ सनन्दनस्तृप्यताम् २। ॐ सनातनस्तृप्यताम् २। ॐ कपिलस्तृप्यताम् २। ॐ आसुरिस्तृप्यताम् २। ॐ बोढुस्तृप्यताम् २। ॐ पञ्चशिखस्तृप्यताम् २ ।।

इति ऋषितर्पणम् ।। २ ।।

❀ अथ पितृतर्पणम् ❀

[ततोऽपसव्येन] पितॄनावाहयिष्ये आवाहय ॥

ॐ उदीरतामवर ऽ उत्परास ऽ उन्मध्यमाः पितरः सोम्म्या सः । असुँ य्य ऽ ईयुर वृका ऽ ऋतज्ञास्ते नोवन्तु पितरो हवेषु ॥१॥ ॐआयान्तु नः पितरः सोम्म्या सोऽग्निष्वात्ताःपथिभिर्द्देवयानैः । अस्मिन्यज्ञे स्वधया मदन्तो ऽ धिब्रुवन्तु ते ऽ वन्त्वस्मान् ॥ २ ॥

पुनः अपसव्य होकर [अर्थात्-अपने यज्ञोपवीत को दक्षिण-कन्धे पर रखकर] स्वयं दक्षिण-मुख होकर, एवं अपने बायें-घुटने को मोड़कर, पितृतीर्थ [दक्षिण-हाथ की तर्जनी और अंगूठे के मूलस्थित मध्यभाग] से द्विगुणभुग्न [दुगुनी मुड़ी हुई] तीन कुशाओं के बने हुए मोटक्र को दक्षिणाग्र अपनी अञ्जलि में रखकर, तिल जौ, चावल तथा चन्दन-मिश्रित जल-द्वारा कव्यवाट्-आदि तथा १४ यम देवताओं को पृथक्-२ तीन २ अञ्जलियाँ देवें । यथा-

ॐ कव्यवाट् तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३॥ ॐ अनलस्तृप्यतामिदं ति० तस्मै स्वधा नमः ३॥ ॐ सोमस्तृप्य-

तामिदं ति० तस्मै स्वधा नमः ३ ॥ ॐ यमस्तृप्यतामिदं ति० तस्मै स्वधा नमः३॥ ॐ अर्य्यमास्तृप्यतामिदं ति० तस्मै स्वधा नमः ३ ॥ ॐ अग्निष्वात्ताः पितरस्तृप्यन्तामिदं ति० तेभ्यः स्वधा नमः ३ ॥ ॐ सोमपाः पितरस्तृप्यन्तामिदं ति० तेभ्यः स्वधा नमः ३ ॥ ॐ बर्हिषदः पितरस्तृप्यन्तामिदं ति० तेभ्यः स्वधा नमः ३ ॥

ततश्चतुर्दशयमांस्तर्पयेत्—

ॐ यमाय नमः ३ ॥ ॐ धर्म्मराजाय नमः ३ ॥ ॐ मृत्यवे नमः ३ ॥ ॐ अन्तकाय नमः ३ ॥ ॐ वैवस्वताय नमः ३ ॥ ॐ कालाय नमः ३ ॥ ॐ सर्वभूतक्षयाय नमः ३ ॥ ॐ औदुम्बराय नमः ३ ॥ ॐ दध्नाय नमः ३ ॥ ॐ नीलाय नमः ३ ॥ ॐ परमेष्ठिने नमः ३ ॥ ॐ वृकोदराय नमः ३ ॥ ॐ चित्राय नमः ३ ॥ ॐ चित्रगुप्ताय नमः ३ ॥ इत्यलम् ॥

तातम्बात्रितयं सपत्नजननी, मातामहादित्रयं, सस्त्री स्त्रीतनयादितातजननी, स्वभ्रातरः सस्त्रियः ।। ताताम्बाऽऽत्मभगिन्यपत्यधवयुक् जायापिता सद्गुरुः, शिष्याप्ताः पितरो महालयविधौ तीर्थेषु सत्तार्पणे ।। १ ।।

ततः पितृतीर्थेनोपांशुस्वरेण जलाञ्जलिं दद्यात्-

ॐउदीरतामवर ऽउत्परास ऽउन्मध्यमाः पितरः सोम्यासः । असुँय्य ऽ ईयुरवृका ऽऋतज्ञास्ते नो ऽवन्तु पितरो हवेषु ।।(पिता) ॐ अद्याऽमुकगोत्रो ऽ स्मत्पिता ऽ मुकनाम-(शर्म्मा) वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ।।

इति-मन्त्रेण प्रथमाञ्जलिं पित्रे दद्यात् ।। १ ।। ततः-

ॐ अङ्गिरसो नः पितरो नवग्वा ऽ अथर्वाणो भृगवः सोम्यासः । तेषां व्वय ꣳ सुमतौ यज्ञियानामपि भद्द्रे सौमनसे स्याम।

इति मन्त्रेण द्वितीयाञ्जलिं पित्रे दद्यात् ।। २ ।। ततः-,

ॐ आयन्तु नः पितरः सोम्म्या सो ऽ अग्निष्वात्ताः पथिभिर्द्देवयानैः । अस्मिन्यज्ञे

स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् ॥

इति-मन्त्रेण तृतीयाञ्जलिं पित्रे दद्यात् ॥ ३ ॥ ततः-

ॐ ऊर्ज्जं व्वहन्तीरमृतं घृतम्पयः कीलालम्परिस्रुतम् । स्वधास्स्थ तर्प्पयत मे पितॄन् ॥ (बाबा) ॐ अद्याऽमुकगोत्रो ऽस्मत्पितामहो ऽमुकनाम(शर्म्मा) रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥

इति-मन्त्रेण प्रथमाञ्जलिं पितामहाय दद्यात् ॥ १ ॥ ततः-

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः, पितामहेभ्यः स्वधायिभ्यः स्वधानमः, प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः॥ अक्षन्न्पितरो ऽमी मदन्त पितरो ऽ तीतृपन्त पितरः पितरः शुन्धद्ध्वम् ॥

इति-मन्त्रेण द्वितीयाञ्जलिं पितामहाय दद्यात् ॥ २ ॥ ततः-

ॐ ये चेह पितरो ये च नेह याँश्च व्विद्म याँ ऽ उ च न प्रव्विद्म। त्वं व्वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ ७ सुकृतञ्जुषस्व ॥

इति-मन्त्रेण तृतीयाञ्जलिं पितामहाय दद्यात् ॥ ३ ॥ इति ॥

ततः-ॐ मधु व्वाता ऽ ऋताय ते मधु क्षरन्ति सिन्धवः । माध्वीर्न्नः सन्त्वोषधीः ॥ (परबाबा) ॐअद्याऽमुकगोत्रो ऽस्मत्प्रपितामहोऽमुकनाम (शर्म्मा) ऽऽदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥

इति-मन्त्रेण प्रथमाञ्जलिं प्रपितामहाय दद्यात् ॥ १ ॥ ततः-

ॐ मधु नक्तमुतोषसो मधु मत्पार्त्थिव ँ रजः । मधु द्यौरस्तु नः पिता ॥

इति-मन्त्रेण द्वितीयाञ्जलिं प्रपितामहाय दद्यात् ॥२॥ ततः-

ॐ मधु मान्नो व्वनस्स्पतिर्म्मधु माँ २ ॥ ऽ अस्तु सूर्य्यः । माध्वीर्ग्गावो भवन्तु नः ॥

इति-मन्त्रेण तृतीयाञ्जलिं प्रपितामहाय दद्यात् ॥३॥ ततः-

"तृप्यध्वम् ३" ॥ तीनबार जलाञ्जलि देवै ॥

ततः मातृणां तर्पणम्-

(माता) ॐ अद्याऽमुकगोत्राऽस्मन्माताऽमुकीदेवी गायत्रीरूपा तृप्यतामिदं जलं तस्यै स्वधा नमः ३ ॥ ॐ अद्याऽमुकगोत्राऽस्मत्पितामही (दादी) अमुकीदेवी सावित्रीरूपा

तृप्यतामिदं जलं तस्यै स्वधा नमः ३ ॥ ॐ अद्याऽमुकगोत्रा ऽ स्मत्प्रपितामही (परदादी) अमुकीदेवी सरस्वतीरूपा तृप्यतामिदं जलं तस्यै स्वधा नमः ॥ इति ॥

मातामहादीनां तर्पणम्—ॐ अद्याऽमुकगोत्रोऽस्मन्मातामहो (नाना) ऽमुकनाम (शर्म्मा) अग्निस्वरूपस्तृप्यतामिदं जलं तस्मै स्वधा नमः ३ ॥ ॐ अद्याऽमुकगोत्रो ऽस्मत्प्रमातामहो (परनाना) ऽमुकनाम (शर्म्मा) वरुणस्वरूपस्तृप्यतामिदं जलं तस्मै स्वधा नमः ३ ॥ ॐ अद्याऽमुकगोत्रोऽस्मद् वृद्धप्रमातामहो (वृद्ध परनाना) ऽमुकनाम (शर्म्मा) प्रजापतिस्वरूपस्तृप्यतामिदं जलं तस्मै स्वधा नमः ३ ॥ इति ॥

ॐ अथ मातामह्यादि तर्पणम्—ॐ अद्याऽमुकगोत्रा ऽ स्मन्मातामही [नानी] अमुकी देवी गङ्गास्वरूपा तृप्यतामिदं जलं तस्यै स्वधा नमः ३ ॥ ॐ अद्या ऽमुकगोत्रा ऽस्म-

त्प्रमातामही–(परनानी) अमुकीदेवी यमुना-
स्वरूपा तृप्यतामिदं जलं तस्यै स्वधा नमः
३ ॥ ॐ अद्याऽमुकगोत्रा ऽ स्मद्वृद्धप्रमा-
तामही–[वृद्ध-परनानी] अमुकीदेवी सर-
स्वतीस्वरूपा तृप्यतामिदं जलं तस्यै स्वधा
नमः ३ ॥ इति ॥

❀ अथ वंशजादीनां–तर्पणम् ❀

अद्याऽमुकगोत्रो ऽ स्मत्पितुर्ज्येष्ठभ्राता-
(ताऊ) ऽमुक० तृप्यतामिदं जलं तस्मै
स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मज्ज्येष्ठ-
पितृव्यो–(बड़े चाचा) ऽमुक० तृप्य० जलं
तस्मै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मत्
पितृव्यो (चाचा) ऽ मुक० तृप्य० जलं तस्मै
स्वधा नमः ३ ॥ अमुकगोत्रा पितृव्यपत्नी
(चाची) अमुकीदेवी तृप्य० जलं तस्यै
स्वधा नमः ३ ॥ अमुकगोत्रो ऽस्मन्मातृष्व-
साष्पतिः (मौसा) अमुक० तृप्य० जलं तस्मै
स्वधा नमः ३ ॥ अमुकगोत्रा–मातृष्वसा

(मौसो) ऽमुकीदेवी जलं तस्यै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मत् पितृष्वसापतिः (फूफा) अमुक० जलं तस्मै० स्वधा नमः ३ ॥ अमुकगोत्रा—पितृष्वसा—(बुआ) ऽमुकीदेवी जलं तस्यै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मन्मातुलो (मामा) ऽ मुक० जलं तस्मै स्वधा नमः ३ ॥ अमुकगोत्रा-मातुलानी (मामी) अमुकीदेवी जलं तस्यै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मच्छ्वशुरो (श्वसुरः) ऽ मुकनाम शर्मा वसुरूपस्तृप्य० इदं जलं तस्मै स्वधा नमः ३ ॥ अमुकगोत्रा-ऽ स्मच्छ्वश्रू-(सास) रमुकीदेवी गङ्गारूपा तृप्य० इदं जलं तस्यै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मत् श्यालः (शाला) अमु० इदं तिलोदकं तस्मै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मदग्रजो-(बड़ा भाई) ऽमुकनाम० इदं तिलोदकं तस्मै स्वधा नमः ३ ॥ अमुकगोत्रो ऽ स्मदनुजो-(छोटा भाई) ऽ

मुक० इदं तिलोदकं तस्मै स्वधा नमः ३ ॥
अमुकगोत्रोऽस्मद्वैमात्रेयो (सौतेला भाई)
ऽमुक० तृप्य० इदं जलं तस्मै० ३ ॥ अमुक-
गोत्राऽस्मद्भगिनी (बहिन) अमुकीदेवी
यमुनारूपा तृ० इदं जलं तस्यै० ३॥ अमुक-
गोत्राऽस्मद् भ्रातृजाया (भौजाई) ऽमुकीदेवी
तृ० इदं जलं तस्यै० ३ ॥ अमुकगोत्रोऽस्मद्
भ्रातीयो (भतीजा) ऽमुक० तृ० इदं जलं तस्मै०
३॥ अमुकगोत्रोऽस्मन्मातुलेयो-(ममेराभाई)
ऽमुक० तृप्य० इदं जलं तस्मै० ३॥ अमुकगो-
त्रोऽस्मत्पितृष्वस्रेयो-(फुफेरा भाई) ऽमुक०
तृप्य० इदं जलं तस्मै० ३॥ अमुकगोत्रोऽस्म-
न्मातृष्वस्रेयो-(मौसेरा भाई) ऽमुक० तृप्य०
इदं जलं तस्मै० ३॥ अमुकगोत्रोऽस्मद्भगिनी-
पुत्रो- (भानजा) ऽमुक० तृप्य० इदं जलं
तस्मै० ३ ॥ अमुकगोत्रास्मद्भगिनीपुत्री
(भानजी) अमुकीदेवी तृप्य० इदं जलं
तस्यै० ३ ॥ अमुकगोत्रोऽस्मद्भगिनीपतिः

[बहनोई]अमुक०तृप्य०इदं जलं तस्मै०३॥ अमुकगोत्राऽस्मत्पत्नी [स्त्री] लक्ष्मीस्वरूपा-मुकीदेवी तृप्य०इदं जलं तस्यै० ।३। अमुक-गोत्रोऽस्मत्पुत्रो[बेटा]ऽमुक०तृप्य० इदं जलं तस्मै० ३ ॥ अमुकगोत्राऽस्मत्तनया [पुत्री] ऽमुकीदेवी तृप्य० इदं जलं तस्यै स्वधा०३॥ अमुकगोत्रोऽस्मज्जामातरो [जमाई] ऽमुक० तृप्य० इदं जलं तस्मै० ३ ॥

एवमाचार्य्यं, गुरुं, गुरुपत्नीं, सुभगां, गुरुपुत्रं शिष्यं, मित्रादींश्च मृतान्यथाविधिस्तर्पयेदिति ॥

❀ अथ सव्येन काम्यतर्पणम् ❀

अपने जनेऊ को सव्य करके, पूर्व-मुख होकर तिल जौ चावल-सहित तर्पण करें--

ॐ आब्रह्मस्तम्बपर्यन्तं, देवर्षिपितृमानवाः ।
तृप्यन्तु पितरःसर्वे,मातृ-मातामहादयः॥१॥
अतीतकुलकोटीनां, सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्।२।
देवा यक्षास्तथा नागा, गन्धर्वाऽप्सरसोऽ-

सुराः। क्रूराः सर्पाः सुपर्णाश्च,तरवो जम्बुकाः खगाः॥ ३ ॥ विद्याधरा: जलाधारास्तथैवाकाशगामिनः। निराधाराश्च ये जीवाः,पापेधर्म्मे मृताश्च ये।४।नरकेषु समस्तेषु,यातनासु च ये स्थिताः। ते प्रीतिञ्च प्रयान्त्वाशु, मद्दत्तेनाम्बुनाखिलाः॥ ५ ॥ पिशाचाः गुह्यकाः सिद्धाः, कूष्माण्डाः भैरवादयः। ते सर्वे तृप्तिमायान्तु,मया दत्तेन वारिणा॥६॥

पुनः अपने जनेऊ को अपसव्य करके नीचे-खिले मन्त्र द्वारा पृथ्वी पर तीन-जलाञ्जलि देवै—

ॐ मे बान्धवा ऽ बान्धवा ये, ये ऽ न्यजन्मनि बान्धवाः। तृप्तिमायान्तु ते सर्वे,मया दत्तेन वारिणा॥ १ ॥

पुनः अपसव्य होता हुआ नीचे-लिखे मन्त्र--द्वारा अपने अँगोछे के छोर को जल से भिगोकर पृथ्वी पर निचोडे-

ॐ ये चास्माकं कुले जाता,ह्यपुत्रा गोत्रिणो मृताः। ते पिबन्तु मया दत्तं,वस्त्रनिष्पीडनोदकम्॥ १ ॥

पुनः सव्य होकर, कुशपवित्र उतार कर, पूर्व-मुख होता

हुआ नीचे-लिखे मन्त्र-द्वारा सूर्यनारायण को रक्तपुष्प तथा तुलसीपत्र सहित अर्घ्य देवै--

ॐएहि सूर्य्य सहस्रांशो ! तेजोराशे जगत्पते। अनुकम्पय मां भक्त्या, गृहाणाऽर्घ्यं दिवाकर!१

पुनः ब्रह्मचारी-पितामह-भीष्म को अर्घ्य प्रदान करै--

ॐ वैयाघ्रपदगोत्राय, साङ्कृत्यप्रवराय च ।
अपुत्राय ददाम्येतज्जलं भीष्माय वर्म्मणे ।१

ततः--**ॐ ब्रह्म जज्ञानम्प्रथ०--विवः ॥**
ॐ भूर्भुवः स्वः-ब्रह्मणे नमस्तर्पयामि ॥१॥
ॐ इदं विष्णुः०--सुरे स्वाहा ॥
ॐभूर्भुवः स्वः-विष्णवे नमस्तर्पयामि ॥२॥
ॐ नमस्ते रुद्र०--उतते नमः ॥
ॐ भूर्भुवः स्वः--रुद्राय नमस्तर्पयामि ॥३॥
ॐ आ कृष्णेन०--याति भुवनानि पश्यन् ॥
ॐ भूर्भुवः स्वः-सूर्य्याय नमस्तर्पयामि ॥४॥
ॐ मित्रस्य चर्षणीधृतो वो देवस्य सानसि । द्युम्नञ्चित्रश्रवस्तमम् ॥ ॐ भूर्भुवः स्वः --मित्राय नमस्तर्पयामि ॥ ५ ॥ ॐ इमस्मे

त्वरुण श्रुधी हवमद्या च मृडय । त्वाम-
वस्युराचके ॥ ॐ भूर्भुवः स्वः-वरुणाय नमः
स्तर्पयामि ॥ ६ ॥ ॐ भूर्भुवः स्वः ॐ तत्स-
वितुर्वरेण्ण्यं भर्ग्गो देवस्य धीमहि । धियो
यो नः प्प्रचोदयात् ॐ ॥ ॐ भूर्भुवः स्वः-
सवित्रे नमस्तर्पयामि ॥ ७ ॥

फिर मानसोपचार-- पूजन करै, अथवा गन्धाक्षत, पुष्प, धूप-आदि से अर्घ्यदान सहित पूजन करै-

ततः उपस्थान कार्यम्-

ॐ अद्दृश्श्रमस्य केतवो व्विरश्म्मयो जनाँ-
२ ॥ ऽ अनु । ब्भ्राजन्तोऽ अग्ग्नयो यथा ।
उपयाम गृहीतोऽसि सूर्य्याय त्वा ब्भ्राजायै-
षते योनिः सूर्य्याय त्वा ब्भ्राजाय । सूर्य्य-
ब्भ्राजिष्ठ ब्भ्राजिष्ठस्त्वन्देवेष्ष्वसि ब्भ्राजि-
ष्ठोऽहम्मनुष्येषु भूयासम् ॥१॥ ॐ ह ७ सः
शुचिषद्द्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथि-
र्द्दुरोण सत् । नृषद्द्वरसदृत सद्द्वचोम सद-
ब्जा गोजाऽऋतजाऽ अद्रिजाऽऋतम्बृहत् ।२।

॥ ततः ॥ प्राच्यै दिशे-

ॐ इन्द्राय नमस्तर्पयामि ॥ १ ॥

आग्नेय्यै दिशे-

ॐ अग्नये नमस्तर्पयामि ॥ २ ॥

दक्षिणायै दिशे-

ॐ यमाय नमस्तर्पयामि ॥ ३ ॥

नैर्ॠत्ये दिशे-

ॐ निर्ॠतये नमस्तर्पयामि ॥ ४ ॥

प्रतीच्यै दिशे-

ॐ वरुणाय नमस्तर्पयामि ॥ ५ ॥

वायव्यै दिशे-

ॐ वायवे नमस्तर्पयामि ॥ ६ ॥

उदीच्यै दिशे-

ॐ कुबेराय नमस्तर्पयात्ति ॥ ७ ॥

ईशान्यै दिशे-

ॐ ईशानाय नमस्तर्पयामि ॥ ८ ॥

ऊर्द्ध्वायै दिशे-

ॐ ब्रह्मणे नमस्तर्पयामि ॥ ९ ॥

अधरायै दिशे-

ॐ अनन्ताय नमस्तर्पयामि ॥ १० ॥

इस प्रकार दश दिग्देवताओं को अंजलि द्वारा जल देकर पुनः

ॐ ब्रह्मणे नमस्तर्पयामि ॥ १ ॥

ॐ अग्नये नमस्तर्पयामि ॥ २ ॥
ॐ पृथिव्यै नमस्तर्पयामि ॥ ३ ॥
ॐ ओषधीभ्यो नमस्तर्पयामि ॥ ४ ॥
ॐ वाचे नमस्तर्पयामि ॥ ५ ॥
ॐ वाचस्पतये नमस्तर्पयामि ॥ ६ ॥
ॐ विष्णवे नमस्तर्पयामि ॥ ७ ॥
ॐ महद्भ्यो नमस्तर्पयामि ॥ ८ ॥
ॐ अद्भ्यो नमस्तर्पयामि ॥ ९ ॥
ॐ अपां पतये नमस्तर्पयामि ॥१०॥
ॐ वरुणाय नमस्तर्पयामि ॥११॥

पुनः आगे लिखे मन्त्र-द्वारा जल से मुँह पोंछे-

ॐ सम्वर्चसा पयसा सन्तनूभिरगन्महि मनसा स ँ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥

पुनः अधोलिखित मन्त्र द्वारा पितृ-विसर्जन करे-

ॐ देवागातुविदोगातु वित्त्वागातु मित । मनसस्पत ऽ इमन्देवयज्ञ ँ स्वाहा वातेधाः।

पुनः पृथ्वीपर विशेष-अर्घ्य छोड़ै -

अनेन देवर्षि-पितृतर्पणाऽऽख्येन कर्म्मणा पितरः प्रीयन्ताम् ॥ इति ॥

पञ्चबलिः

[गौ ग्रास] जनेऊ को सव्य रखते हुए नीचे लिखे मन्त्र से एक पत्तल में भोजन लेकर गोग्रास संकल्प करे-

ॐ सौरभेय्यः सर्वहिताः, पवित्राः पुण्यराशयः। प्रतिगृह्णन्तु मे ग्रासं, गावस्त्रैलोक्यमातरः ॥ १ ॥ इदमन्नं गोभ्यो न मम ॥

(अतिथिबलि) ॐ देवाः मनुष्याः पशवो वयांसि, सिद्धाश्च यक्षोरगदैत्यसंघाः। प्रेताः पिशाचास्तरवः समस्ता, ये चान्नमिच्छन्ति मया प्रदत्तम् ॥ २ ॥ इदमन्नमतिथिभ्यो नमः न मम ॥

(पिपीलिकादिबलि)-पिपीलिकाः कीटपतङ्गकाद्या, बुभुक्षिताः कर्मनिबन्धबद्धाः। तृप्त्यर्थमन्नं हि मया प्रदत्तं, तेषामिदं ते मुदिता भवन्तु ॥ ३ ॥ इदमन्नं पिपीलिकादिभ्यो जलचरेभ्यो न मम ॥

(श्वान बलि)–पुनः जनेऊ को कण्ठी करके एक पत्तल में नीचे-लिखे मन्त्र से श्वान बलि देवें–

द्वौ श्वानौ श्यामशबलौ वैवस्वत कुलोद्भवौ ॥ ताभ्यामन्नं प्रदास्यामि, स्यातामेतावहिंसकौ ॥ ४ ॥ इदमन्नं श्वभ्यां न मम ॥

(काक बलि)–पुनः जनेऊका अपसव्य करके दक्षिणाऽभि मुखहोकर पृथ्वीपर कौआओं के लिए अन्नादि की बलि देवें–

ऐन्द्रवारुणवायव्याः, सौम्या वै नैर्ऋतास्तथा वायसाः प्रतिगृह्णन्तु, भूमावन्नं मयार्पितम् ॥ ५ ॥ इदमन्नं वायसेभ्यो न मम ॥

❋ अथाऽभिषेक–प्रयोगः ❋

पुनः आचार्य नीचे-लिखे मन्त्रों द्वारा पूर्व-मुख बैठे हुए यजमान का और उसके वाम भाग में बैठी हुई पत्नी का कलश के जल से अभिषेक करें–

ॐ आपोहिष्ठा मयो भुवस्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे ॥ १ ॥ ॐ यो वः शिवतमो रसस्तस्य भाजयते हनः । उशतीरिव मातरः ॥ २ ॥ तस्मा ऽअरङ्गमामवो, यस्य क्षयाय जिन्वथ । आपोजनयथाचनः ॥ ३ ॥

गणाधिपो भानुशशाङ्कभूसुताः,बुधो गुरु-र्भार्गवसूर्य्यनन्दनौ । राहुश्च केतुश्च परं नवग्रहाः,कुर्वन्तु वः पूर्णमनोरथं सदा ॥१॥ उपेन्द्रो इन्द्रो वरुणो हुताशनो, धर्मो यमो वायुहरी चतुर्मुखः । गन्धर्वयक्षोरगसिद्ध-चारणाः, कुर्वन्तु वः ॥२॥ गङ्गा च क्षिप्रा यमुना सरस्वती, गोदावरी वेत्रवती च नर्मदा । सा चन्द्रभागा वरुणा त्वसीनदी, कुर्वन्तु वः०॥३॥ तुङ्गप्रभासो गुरुचक्रपुष्करं गया विमुक्ता बदरी वटेश्वरः। केदार पम्पा-सरसी च नैमिषं,कुर्वन्तु वः पूर्णमनोरथं सदा ॥४॥नलो दधीचिः सगरः पुरूरवाः, शाकु-न्तलेयो भरतो धनञ्जयः । रामत्रयं वैन्य-वली युधिष्ठिरः, कुर्वन्तु वः ० ॥५॥ मनु-र्मरीचिर्भृगुदक्षनारदाः, पराशरो व्यासव-शिष्ठभार्गवाः । वाल्मीकिकुम्भोद्भवगर्गगौ-तमाः,कुर्वन्तु वः०।६। रम्भा शची सत्यवती च देवकी,गौरी च लक्ष्मीरदितिश्च रुक्मिणी!

कूर्मो गणेशः सचरा धराधराः, कुर्वन्तु वः ॥ ७ ॥ प्रयाणकाले यदि वा सुमङ्गले, प्रभातकाले च नृपाऽभिषेचने । धर्म्मार्थ कामाय जयाय भाषितं, व्यासेन कुर्यात्तु मनोरथं हि तत् ॥ ८ ॥

इस प्रकार यजमान का अभिषेक करके, पुनः आचार्य दक्षिणा लेवे ॥ इत्यभिषेकप्रयोगः ॥

* अथ प्रभातकृत्यम् *

ब्राह्मे काले समुत्थाय, गणेशादीन्स्मरेत्ततः ।
प्रातः स्तोत्रं मंगलानि, पठित्वा शौचमाचरेत् ॥१॥
ब्राह्मे मुहूर्ते या निद्रा, सा पुण्यक्षयकारिणी ।
तांकरोति द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति ॥२॥

* अथ प्रभातदर्शनीयम् *

श्रोत्रियं सुभगां गाञ्च, ह्यग्निमग्निर्चितिं तथा । प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ॥ २ ॥ भारद्वाजमयूराणां, चाषस्य नकुलस्य च ।
प्रभाते दर्शनं श्रेष्ठं, वामे पृष्ठे विशेषतः ॥ १ ॥
लोकेऽस्मिन्मंगलान्यष्टौ, ब्राह्मणेभौ हुताशनः ।
हिरण्यंसर्पिरादित्य आपो राजाऽष्टमः स्मृतः ॥ ३ ॥

* अथ प्रभात-स्मरणम् *

परब्रह्मस्मरणम्—

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं, सच्चित्सुखं परमहंसगतिं तुरीयम्। यत्स्वप्नजागरसुषुप्तिमवैति नित्यं, तद्-ब्रह्म निष्कलमहं न च भूतसङ्घः ॥१॥

श्रीगणेशायस्मरणम्-

प्रातः स्मरामि गणनाथमनाथबन्धुं, सिन्दूरपूर्णपरिशोभितगण्डयुग्मम्। उद्दण्डविघ्नपरिखण्डनचण्डदण्डमाखण्डलादिसुरनायकवृन्दवन्द्यम् ॥ २ ॥

श्रीदेव्याः स्मरणम्-

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं, चारुस्मेरमुखां चराचरजगत्संरक्षणीं सत्पदाम्। चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणी रञ्जितां, श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ३ ॥

श्री शिवस्मरणम्-

प्रातः स्मरामि भवभीतिहरं सुरेशं, गंगाधरं वृषभवाहनमम्बिकेशम्। खट्वांगशूलवरदाभयहस्तमीशं, संसाररोगहरमौषधमद्वितीयम् ॥ ४ ॥

विष्णुस्मरणम्-

प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् । ग्राहाभिभूतवरवारणमुक्तिहेतुञ्चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ ५ ॥

श्री रामस्मरणम्

प्रातः स्मरामि रघुनाथमुखारविन्दं, मन्दस्मितं मधुरभाषि विशालभालम् । कर्णावलम्बिचलकुण्डलशोभिगण्डं कर्णान्तदीर्घनयनं नयनाऽभिरामम् । ६ ।

सूर्यस्मरणम्-

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं, रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि । सामानि यस्य किरणाः प्रभवादिहेतुं, ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् । ७ ।

श्रीभगवद्भक्तानांस्मरणम्-

प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् । रुक्मांगदार्जुनवसिष्ठविभीषणादीन्, पुण्यानिमान् परमभागवतान् स्मरामि ॥ ८ ॥

नवग्रहस्मरणम्-

ब्रह्मा मुरारिस्त्रिपुरान्तकारी, भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः, कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ९ ॥

शंकरं शंकराचार्यं, केशवं वादरायणम् । सूत्र-भाष्यकरौ वन्दे, भगवन्तौ पुनः पुनः । १० ।

नव-नागनामस्तोत्रम्-

अनन्तं वासुकिं शेषं पद्मनाभं च कम्बलम् ।
शंखपालं धार्तराष्ट्रं तक्षकं कालियं तथा । १ ॥
एतानि नवनामानि नागानां च महात्मनाम् ।
सायंकाले पठेन्नित्यं, प्रातः काले विशेषतः ॥ २ ॥
तस्मै विषभयं नास्ति सर्वत्र विजयी भवेत् ॥ ३ ॥

अथ श्रीडामरतन्त्रोक्त--

श्री कार्तवीर्य्यं स्तोत्रम्-कार्तवीर्यः खलद्वेषी कृत-वीर्यसुतो बली । सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः । १ । रक्तगन्धो रक्तमाल्यो, राजा स्मर्तुरभीष्टदः । द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् । २ । सम्पदस्तस्य जायन्ते, जनास्तस्य वशं गताः । आनयत्याशु दूरस्थं, क्षेमलाभयुतं प्रियम् । ३ । कार्तवीर्योऽर्जुनो नाम, राजा बाहुसहस्रभृत् । तस्य स्मरणमात्रेण, हृतं नष्टञ्च लभ्यते । ४ । कार्तवीर्य महाबाहो ! सर्वदुष्टनिबर्हण । सर्वं रक्ष सदा तिष्ठ, दुष्टान्नाशय पाहि माम् । ५ । सहस्र-बाहुं सशरं सचापं, रक्ताम्बरं रक्तकिरीटकुण्डलम् । चोरादिदुष्ट-भयनाशनमिष्टदं तं, ध्यायेन्महाबल-

विजृम्भितकार्तवीर्यम् । ६ । यस्य संस्मरणादेव, सर्वदुःखक्षयो भवेत् । तं नमामि महावीर्यमर्जुनं कृतवीर्यजम् । ७ । इति ।

उत्तिष्ठोत्तिष्ठ गोविन्द ! उत्तिष्ठ गरुडध्वज ! उत्तिष्ठ कमलाकान्त ! त्रैलोक्ये मंगलं कुरु । १ । मंगलं भगवान् विष्णुर्मंगलं गरुडध्वजः । मंगलं पुण्डरीकाक्षो, मंगलायतनो हरिः । २ । लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो, हृदयस्थो जनार्दनः । ३ । समुद्रवसने देवि ! पर्वतस्तनमण्डले । विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे । ४ । त्रैलोक्यचैतन्यमयाद्यदेव ! श्रीनाथ ! विष्णो ! भवदाज्ञयैव । प्रातः समुत्थाय तव प्रियार्थं, संसारयात्रामनुवर्तयिष्ये । ५ । भृगुर्वसिष्ठः क्रतुरंगिराश्च, मनुः पुलस्त्यः पुलहश्च गौतमः । धौम्यो मरीचिश्च्यवनश्च दक्षः, कुर्वन्तु सर्वे मम सुप्रभातम् । ६ । वैन्यं पृथुं हैहयमर्जुनञ्च, शाकुन्तलेयं भरतं नलञ्च । रामञ्च यो वै स्मरति प्रभाते, तस्यार्थलाभो विजयश्च हस्ते । ७ । बलिर्विभीषणो भीष्मः, प्रह्लादो नारदो ध्रुवः । षडेते वैष्णवाः प्रोक्ताः, स्मरणात्पापनाशनम् । ८ ।

हरं हरिं हरिश्चन्द्रं, हनुमन्तं हलायुधम् । पञ्चकं वै स्मरेन्नित्यं, घोरसंकटनाशनम् ॥ ९ ॥ पुण्यश्लोको नलो राजा, पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही, पुण्यश्लोको जनार्दनः ॥ १० ॥ अश्वत्थामा बलिर्व्यासो, हनुमाँश्च विभीषणः । कृपः परशुरामश्च, सप्तैते चिरजीविनः ॥ ११ ॥ सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाऽष्टमम् । जीवेद्वर्षशतं सोऽपि, सर्वव्याधि-विवर्जित ॥ १२ ॥ अहिल्या द्रौपदी सीता, तारा मन्दोदरी तथा । पञ्चकं ना स्मरेन्नित्यं, महापातकनाशनम् ॥ १३ ॥ उमा उषा च वैदेही, रमा गंगेति पञ्चकम् । प्रातरेव स्मरेन्नित्यं, सौभाग्यं वर्द्धते सदा ॥ १४ ॥ अयोध्या मथुरा माया, काशी काञ्ची ह्यवन्तिका । पुरी द्वारावती चैव, सप्तैता मोक्षदायिकाः ॥ १५ ॥ कराग्रे वसते लक्ष्मीः, करमध्ये सरस्वती । करमूले स्थितो ब्रह्मा, प्रभाते करदर्शनम् ॥ १६ ॥ इति ॥

—❀—

अथ द्विजातिगोत्रप्रवरादि-बोधकचक्रम्

गोत्र	प्रवर	वेद	उपवेद	शाखा	सूत्र	देव	शिखा	पाद	वर्ण
कश्यपः	कश्यपः अवत्सारः नैध्रुवः	ऋगवेदः यजुर्वेदः सामवेदः अथर्वणवेदः	अथर्वणः धनुः गान्धर्वः स्थापत्यः	श्रोतिया माध्यन्दिनी	आश्वाला० पारस्करः गोभिलः वात्स्यायन	विष्णुः	दक्षाः	दक्षः	ब्राह्मण (द्राविड़)
कश्यपः	कश्यपः असितः देवलः	शुक्ल— यजुर्वेदः	धनुः	माध्यन्दिनी	पारस्करः	विष्णुः	दक्षाः	दक्षः	क्षत्रिय (सूर्यवंशी)
कश्यपः	काश्पेयः कुशिकः काशिकः	शुक्लयजुः सामवेदः	धनुः गान्धर्वः	माध्यन्दिनी कौशिकः	पारस्करः गोभिलः	विष्णुः	दक्षाः	दक्षः	क्षत्रियः (रघुवंशी)

गोत्र	प्रवर	वेद	उपवेद	शाखा	सूत्र	देव	शिखा	पाद	वर्ण
शौनकः	शुनकः रुरुः भानुमती	शुक्ल– यजुर्वेदः	धनुः	माध्यन्दिनी	पारस्करम्	विष्णुः	दक्षा	दक्षः	क्षत्रियः (चंद्रवशी)
शौनकः	शौनकः सौवः भावनः	कृष्ण यजुर्वेदः	धनु	तैत्तरीया	आश्वालय– नम्	शिवः	वामा	वामः	क्षत्रियः– (पंवार)
शौनकः	सुनकः रौरवः गृत्समदः	ऋग्वेद–	अथर्वणः	ऐतरीया	आश्वालय– नम्	शिवः	वामा	वामः	चंद्रवंशी– (जन्मेजयः)
कौण्डिन्य	कौण्डिन्यः जैमिनी कुशतन्तुः वत्सारण्य वशिष्ठ	कृष्ण– यजुर्वेदः	धनुः	तैत्तरीया	आश्वालय– नम्	शिवः	वामा	वामः	ब्राह्मण– (द्राविड़)

द्विजातिगोत्रप्रवरादि–बोधकचक्रम्

वशिष्ठ

गोत्र	प्रवर	वेद	उपवेद	शाखा	सूत्र	देव	शिखा	पाद	वर्ण
काश्यप	कश्यपः अवत्सारः नैध्रुवः	ऋग्वेद यजुर्वेद सामवेद अथर्ववेद	अथर्व धनु गान्धर्व	तैत्तरेय माध्यन्दिनी कौशिक शैव्य	आश्वाल० पारस्कर गोभिलः वात्स्यायन	विष्णु	दक्षा	दक्षः	क्षत्रिय भोजवंशी परिहार
काश्यपः	काश्पेयः कुशिकः काशिकः	शुक्लयजुः सामवेदः	धनु गान्धर्व	माध्यन्दिनी कौशिक	पारस्कर गोभिलः	विष्णु	दक्षा	दक्षः	क्षत्रिय पुंडरीक वंशी
भारद्वाज	भारद्वाज आंगिरस वार्हस्पत्य	शुक्ल यजुः	धनुः	माध्यन्दिनी	पारस्कर	विष्णु	दक्षा	दक्षः	ब्राह्मणआद्य गौड़ सार० क्षत्रियचंद्र वंशी भी हैं
शौनकः	शुनकः रु रुः भानुमती	शुक्ल यजु	धनुः	माध्यन्दिनी	पारस्करम्	विष्णु	दक्षा	दक्षः	ब्राह्मणाः आद्य गौड़

गोत्र	प्रवर	वेद	उपवेद	शाखा	सूत्र	देव	शिखा	पाद	वर्ण
कौण्डित्य	वशिष्ठ कौडिन्य मित्रावरुण	शुक्ल यजु:	धनु:	माध्यन्दिनी	पारस्कर	विष्णु	दक्षा	दक्ष	क्षत्रिय– चन्द्रवंशी
गर्ग	गर्ग, गाणेय: वत्सभविष्य करण:	शुक्ल यजु:	धनु:	"	"	"	"	"	ब्राह्मण– कान्य कुब्ज
वशिष्ठ:	आत्रेय: आर्चनावस: श्यावाश्व:	कृष्ण यजु:	"	तैत्तरीय	आश्वालयनम्	शिव	वामा	वाम:	क्षत्रिय– सूर्यवंशी असवाल
वशिष्ठ:	भारद्वाज सेन्द्र: प्रभा	शुक्ल यजु:	"	माध्यन्दिनी	पारस्कर	विष्णु	दक्षा	दक्ष:	क्षत्रिय– चंद्रवंशी पंवार

गोत्र	प्रवर	वेद	उपवेद	शाखा	सूत्र	देव	शिखा	पाद	वर्ण
शांडिल्य	शाण्डिल्यः असितः देवल	साम	गान्धर्व	कौथुमी	गोभिलं	विष्णुः	दक्षा	दक्षः	
वशिष्ठः	वशिष्ठ नैपुन्य देवाग्नि	शुक्ल यजुः	धनु	माध्यन्दिनी	पारस्करं	"	"	"	
गौतमः	आंगिरस वार्हस्पत्य भारद्वाज	साम	गान्धर्व	कौथुमी	गोभिलं	"		"	
कात्यायन	विश्वामित्रः वशिष्ठः किलः	शुक्ल— यजु	धनुः	माध्यन्दिनी	पारस्करं	"	"	"	

द्विजातिगोत्रप्रवरादि–बोधकचक्रम्

गोत्र	प्रवर	वेद	उपवेद	शाखा	सूत्र	देव	शिखा	पाद	
अत्रिः	अत्रिः वशिष्ठः आपूर्वातिथ्य	शुक्लः यजुः	धनुः	माध्यन्दिनी	पारस्करं	विष्णुः	दक्षा	दक्षः	
कौशिकः	कौशिक अजतिथ्यः देवरः	ऋग्शुक्ल यः	अथर्वण धनुः	तैत्तरीया माध्यन्दिनी	आश्वाला– यनं पारस्करं				
कौशल्यः	विश्वामित्रः अघमर्षणः मधुश्छंदसः	कृष्ण यजुः	धनुः धनुः	तैत्तरीया	आश्वालायनं	शिवः	वाम	वाम	
मुद्गलः	मुद्गल भार्गव आमवान भार्न्मच्यवन	यजुः साम	धनुः गान्धर्वः	माध्यन्दिनी कौथुमी	पारस्करं गोभिलं	विष्णुः	दक्षा	दक्षः	

अथ वैवाहिक—मङ्गलाष्टकम्

खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं, प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् । दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं, वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् । (स्तो०२०)

लक्ष्मीर्यस्य परिग्रहः कमलभूः,सूनुर्गरुत्माँस्तथा, पत्रं चन्द्रविभूषणं सुरगुरुः, शेषस्तु शय्यासनः । ब्रह्माण्डं वरमन्दिरं सुरगणा, यस्य प्रभोः सेवकाः, त्रैलोक्यस्य कुटुम्बपालनकरः, कुर्य्यात्सदा मंगलम् । १ । ब्रह्मावायुगिरीशशेषगरुडा, देवेन्द्रकामौ गुरुश्चन्द्राकौं वरुणानिलौ मनुयमौ वित्तेशविघ्ने-श्वरौ । नासत्यौ निऋतिर्मरुद्गणयुताः पर्जन्यमित्रादयः, सर्वे चासुरपुंगवाः प्रतिदिनं, कुर्य्युः सदा मंगलम् । २ । मान्धाता नहुषो बली च सगरो, राजा पृथुर्हैहयः । श्रीमान्धर्मसुतो नलो दशरथो, रामो ययातिर्यदुः । इक्ष्वाकुश्च विभीषणश्च भरत-श्चोत्तानपादध्रुवावित्याद्या भुवि पार्थिवाः प्रतिदिनं, कुर्य्युः सदा मंगलम् । ३ । श्रीमेरुर्हिमवाँश्च मन्दिरगिरिः, कैलाशशैलस्तथा, माहेन्द्रो मलयादि-विन्ध्यनिषधाः सिंहस्तथा रैवतः । सत्याद्रिर्वरग-

न्धमादनगिरिर्मैनाकगोमान्तकावित्याद्या भुविभूभृतः प्रतिदिनं, कुर्य्युः सदा मंगलम् ।। ४ ।। विश्वामित्र-पराशरौ च भृगवोऽगस्त्यः पुलस्त्यः क्रतुः, श्रीमानत्रि मरीचि-कौत्स-पुलहाः शक्तिर्वसिष्ठोऽगिरा ।। मा-ण्डव्यो जमदग्निगौतमभरद्वाजादयस्तापसाः, श्रीवि-ष्णोर्गुणराशिकीर्तनपराः, कुर्य्युः सदा मंगलम् ।।५।। गंगा सिन्धु सरस्वती च यमुना, गोदावरी नर्मदा कृष्णा भीमरथी च फल्गुसरयू, श्री गण्डकी गोमती। कावेरी कपिला प्रयागबनिता वेत्रावतीत्यादयो नद्यः श्रीहरिपादपंकजभवाः, कुर्युः सदा मंगलम् ।६। वेदा श्चोपनिषद्युताश्च विविधाः, सांगाः पुराणान्विताः। वेदान्ता अपि मन्त्रतन्त्रसहितास्तर्काःस्मृतीनां गणाः। काव्यालंकृतिनीतिनाटकगणाः शब्दाश्च नानाविधाः श्रीविष्णोर्गुणराशिकीर्तनपराः, कुर्युः सदा मंगलम् ।। ७ ।। आदित्यादिनवग्रहाः शुभकराः मेषादयो राशयो, नक्षत्राणि सुयोगकाः सुतिथयस्तद्देवता-स्तद्गुणाः ।। मासाब्दा ऋतवस्तःथैव दिवसाः सन्ध्या-स्तथा रात्रयः सर्वे स्थावरजंगमाः प्रतिदिनं, कुर्युः सदा मंगलम् ।। ८ ।। इत्येतद्वरमंगलाष्टकमिदं "श्रीवाणिराजोदितं," व्याख्यानं पठतामभीष्ट-फलदं सर्वाऽशुभध्वंसनम् ।। मांगल्यादिशुभक्रिया-

दिसततं सन्ध्यासु प्रात। पठेत्सर्वार्थान्समुपागतान् प्रतिदिनं, कुर्य्यात्सदा मंगलम् ।। स्वस्तिः ।।

* अथ शाखोच्चारणे मङ्गलाष्टकम् *

सिन्दूरारुणमस्तकोऽर्द्ध विलसद् व्यालोलतुण्डः स्वराट, प्रीतो मोदकपूजया सुवरदः सन्तुष्टचित्तः सदा ।। यो 'वृन्दाकरवृन्दबन्दितपदो विश्वस्य गोप्ता गुरुर्गार्ग्यो गणको गणेश्वर-गुहभ्राता दिशेन्मंगलम् ।। १ ।। यो लोकत्रयवन्द्यशंकरशिरः सम्प्राप्तपुण्यासनो, यः स्वर्भूवलि-सद्म-चारु-गतिमां गंगास्वरूपोऽमलः ।। यो ब्रह्माण्डनिवासि-पन्नगनगादीनां महज्जीवनोऽसौ यादःपति पावनः प्रतिदिनं सम्पादयेन्मंगलम् ।। २ ।। ब्रह्मा वेदनिधि, प्रजापति जगत्स्रष्टा ऽखिलार्थप्रदो विष्णुर्वीर्य्यप-रास्तदैत्यनिकरो विश्वस्य गोप्ता विभुः ।। शंभुः शंकर शर्व गर्व शमनः, श्रेष्ठोऽगजा शक्तिमान्, ब्रह्माविष्णुमहेश्वराः शुभकरा दद्युर्मुहुर्मंगलम् । ३ । भानुर्भां महतीं मुदञ्च कुमुदः सद्भूतिदो भूमिजः, ज्ञः प्रज्ञामचलां गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।। राज्यार्थादिकरश्च राहुरनिशं केतुः क्रतूनां पति आदित्यादिनवग्रहाः सुगृहगा कुर्य्यु सुखं मंगलम्

। ४ । श्रेयः सिद्धिसमन्वितो गणपतिर्लम्बोदरः शुण्डभृद् दुर्गा दुर्गतिहारिणी भगवती वायुर्जगद्-व्यापकाः । आकाशो ह्यवकाशपूरितजगत् प्रीताश्विनीजौ तथा, पञ्चैते भुवनाधिपा अमृतपा दद्युर्मुहुर्मंगलम् । ५ । इन्द्रश्चाऽथ हुताशनश्च यमराट् नैर्ऋत्य देव्यप्पतिर्वायव्यो धनदेश्वरो धन-युतस्त्वीशान ईशाः क्रमात् । उर्द्ध्वं ब्रह्म रसातले-ऽहिनिर्चयाद्युक्तो भुजंगेश्वरो, दिक्पालाः स्वकलत्र-पत्रसहितः कुर्यात् सदा मंगलम् । ६ । मेषोऽथ वृषयुग्मकर्कहरयः कन्या तुलाली क्रमाद्धन्वी नक्र-घटौ शुभग्रहयुतौ मीनोऽ मितार्थप्रदाः । आचंभो-बुगुकाः शरान्वथ च केऽथैषामधीशाः सदा, सद्यः संस्मरतां समस्तविदुषां सिञ्चन्त्वपामंगलम् । ७ । अश्विन्यादिसमस्तभानि चतुरंगाख्यैर्युता विंशति-र्योगाः स्वीयकुटुम्बवाहनयुता अष्टौ वसुस्वामिनः । सप्तैते मुनयश्च वारिधिनगा नद्योह्रदाः सर्वशो, देवाः कोट्यधिकोटिसंख्यसहिताः कुर्युर्मुदा मंगलम् । ८ । इत्येतद्धितमंगलाष्टकमिदं सर्वार्थ-लाभप्रदं, सम्वन्नार्थहुताशनांकशमिनीषे मासि पक्षे सिते । वारेऽर्के कथितं पराह्नसमये 'विश्वालसम्भा-षितं,' सम्पूर्णफलदं महत्फलयुतं देयात्फलं मंगलम् । ९

विषय-सूची